पत्रसंख्या १९

Acc No. 20/(7)

भा०प्र० ७५

पांडुसुतानांप्रियः अतःसंस्थापैतधस्त्रेयानांप्रीत्यर्थं तंज्ञात्रयस्येत्यत्रांतंस्वीकृतंनबांधवंबंधुकुलसंयेन ३५ अन्यथाश्रीकृष्णप्रस
दर्शनात्क्रमात्त्वागतिर्यस्यम्रियमाणानांनितरांकथंस्यात् वनपितायाचयितावनर्पतत्तमोवनीयात्तेन तस्यत्वत्सुदारतयामाया
चेष्टा प्रतिपूर्वर्त्तकस्येत्यर्थः ३६ सम्यक्संसिद्धिर्यस्मात् यत्कार्यंकर्तुयोग्यंकर्त्तव्यंतत्वावश्यकमिति भेदअतएवसर्वथाम्रियमाणस्यपुरु
षस्ययस्मिन्कृतंसंसिद्धिःमोक्षलक्षणासिद्धिर्भवतिन्वायोगिनोंरुक्तं पृच्छामि ३७ यतश्रोतव्यपञ्जाप्यंयत्कर्तव्यंस्मरतव्यंयदारविपर्य
यंअंश्रोतव्यादि ३८ त्वद्दर्शनस्यपुनर्दुर्लभत्वादिदानीमेवकथनीयमित्याशयेनाह नूनमिति गोदोहनमात्रकालमपि ३९ एवंअहोद्व

अथेमंभगवान्प्रीतःकृष्णःपांडुसुतप्रियः पैत्रष्वसेयप्रीत्यर्थंतज्ज्ञोतस्यात्तबांधवः ३५ अन्यथातेव्यक्तगतेर्दर्शनंनःक
थंनृणां नितरांम्रियमाणानांसंसिद्धस्यवनीयसः ३६ अतःपृच्छामिसंसिद्धिंयोगिनांपरमंगुरुं पुरुषस्येहय
त्कार्यंम्रियमाणस्यसर्वथा ३७ यच्छ्रोतव्यमथोजाप्यंयत्कर्तव्यंनृभिःप्रभो स्मर्तव्यंभजनीयंवाब्रूहियद्वाविपर्य
यं ३८ नूनंभगवतोब्रह्मन्गृहेषुगृहमेधिनां नलक्ष्यतेह्यवस्थानमपिगोदोहनंक्वचित् ३९ सूत उवाच
एवमाभाषितःपृष्टःसराज्ञाश्लक्ष्णयागिरा प्रत्यभाषतसधर्मज्ञोभगवान्बादरायणिः ४० इतिश्रीमद्भागवतेमहा
पुराणेपारमहंस्यांसंहितायांवैयासिक्यांप्रथमस्कंधेएकोनविंशोध्यायः ॥१९॥ संवत् १७८६

त्वादिकयाश्लक्ष्णयामधुरयागिराआभाषितःअभिमुखीकृतःपृष्टश्च ४० प्रथमस्कंधगूढार्थपद्मभावार्थदीपिका सद्भिरुद्दीपनीयेयं
यथास्यात्तत्वदीपनं १ आर्यंधर्मज्ञमाहतारिमवनोकृत्वापरीक्षिन्नृपंब्रह्मलास्वादभरक्षितंकलिजयख्यातंचकृत्वामुविश्रांतेयः राम
शुकरूपतःस्वपरमज्ञानोपदेशेनतंशापाद्विमुचद्गजामिपरमानंदाकृतिंमाधवं २ इतिश्रीमद्भागवतेमहापुराणेश्रीधरस्वामि ७५
विरचितायांभावार्थदीपिकायांप्रथमस्कंधेएकोनविंशोध्यायः ॥१९॥ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧ ✧

श्री· हिंकिंब्रह्माहिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीदितिश्रुते॥नेत्याह॥तेनइत्यादिकवयेब्रह्मणेपिब्रह्मवेदं
यःतेनेप्रकाशितवान्योवैब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणम
हंप्रपद्यइतिश्रुतेः॥नन्वब्रह्मणोन्यतोवेदाध्ययनमप्रसिद्धं॥सत्यं॥तत्तुहृदामनसैवतेनेअनेनबुद्धिवृत्तिप्रवर्त्तकत्वेनगा
यत्र्यर्थोदर्शितः॥वक्ष्यतिहि॥प्रचोदितायेनपुरासरस्वतीवितन्वताजस्यसतींस्मृतिंहृदि॥स्वलक्षणाप्रादुरभूत्किलास्यतः
समेऋषीणामृषभःप्रसीदतामिति॥ननुचब्रह्मास्वयमेवसुप्तप्रतिबुद्धन्यायेनवेदमुपलभतांनेत्याह॥यद्यस्मिन्ब्रह्मणि
सूरयोपिमुह्यंति॥तस्माद्ब्रह्मणःपराधीनज्ञानत्वात्॥स्वतःसिद्धज्ञानपरमेश्वरएव॥जगत्कारणंअतएवसत्यःअसतः
सत्ताप्रदत्वाच्च॥परमार्थसत्यःसर्वज्ञत्वेनचनिरस्तकुहकःतंधीमहि॥इतिगायत्र्याप्रारंभेणचगायत्र्याख्यब्रह्मविद्यारूपमे
तत्पुराणमितिदर्शितं॥यथोक्तं॥मात्स्यपुराणेपुराणदानप्रस्तावे॥यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः वृत्रासुर
वधोपेतंतद्भागवतमिष्यते॥लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं॥प्रौष्ठपद्यांपौर्णमास्यांसयातिवैष्णवंपदं॥अ
ष्टादशपुराणानांतत्प्रकीर्तितं॥पुराणांतरेच॥ग्रंथोष्टादशसाहस्रोद्वादशस्कंधसंमितः॥हयग्रीवब्रह्मविद्यायत्रवृत्रवध
सहस्राणि स्तथा॥गायत्र्याचसमारंभस्तद्वैभागवतंविदुः॥पद्मपुराणेअंबरीषंप्रतिगौतमवचनं॥अंबरीषशुकप्रोक्तंनित्यं राम
भागवतंशृणु॥पठस्वस्वमुखेनापियदीच्छसिभवक्षयंइति॥अतएवभागवतंनामान्यदपिनशंकनीयं॥२॥ २

श्रीमुनं

भा०पु० बहुवचनं च शिष्याभिप्रायं तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति तत्र स्वरूपलक्षणं सत्यमिति सत्यत्वे हेतुः
१८ यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः यत्सत्यतया मिथ्या
सर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः अत्र दृष्टांतः तेजोवारिमृदां यथा विनिमयो व्यत्ययः अन्यस्मिन्नन्याव
भासः स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः तत्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा मृदि काचादौ वारिबुद्धिरि
त्यादि यथायथमूह्यं यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं यत्र मृषैवायं त्रिसर्गो न व
स्तुतः सन्निति एतद्रूपेण न प्रतीतं उपाधिसंबंधं वारयति स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं यस्मिन्तं
तटस्थलक्षणमाह जन्मादीति अस्य विश्वस्य जन्मस्थितिभंगं यतो भवति तं धीमहीति तत्र हेतुः अन्वयादितर
तश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् अकार्येभ्यश्च खपुष्पादिभ्यस्तद्व्यतिरेकात् यद्वा अन्वयशब्देनानु
वृत्तिरितरशब्देन व्यावृत्तिः; अनुवृत्तत्वात्सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् व्यावृत्तत्वाद्विश्वं कार्यं घटकुंडलादि
दित्यर्थः यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति संबंधः तथा च श्रुतिः यतो वा इमा
नि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या स्मृतिश्च यतः सर्वाणि भूतानि भवंत्यादियुगागमे
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इत्याद्या तर्हि किं प्रधानं जगत्कारणत्वाद्ध्येयं अभिप्रेतं नेत्याह अभिज्ञ इति स ऐ
१९ क्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजतेति ईक्षतेर्नाशब्दमिति न्यायाच्च स ऐक्षत तद्बहु स्यां प्रजायेयेति चेतन
स्यैव जगत्कारणत्वस्य श्रुतत्वात् तर्हि जीवः स्यात् नेत्याह स्वराट् स्वेनैव राजते यः तं स्वतः सिद्धज्ञानमित्यर्थः त

भा० पु०
३
इदानींतुनकेवलंसर्वशास्त्रेभ्यःश्रेष्ठत्वादस्यश्रवणंविधीयते ॥ अपितुसर्वशास्त्रफलरूपमिदंअतःपरमादरेणसे
व्यमित्याहनिगमेति ॥ निगमोवेदःसएवकल्पतरुःसर्वपुरुषार्थोपायत्वात्तस्यफलमिदंभागवतंनामतत्तुवैकुंठगतं
ब्रह्मणानीय ३ नारदाय दत्तं
नारदेनानीयमह्यंदत्तंमयाचशुकमुखेनिहितं ॥ तच्चतन्मुखाद्भुविगलितंशिष्यप्रशिष्यादिरूपपल्लवपरंपरयाशनैर
खंडमेवावतीर्णं ॥ नतूच्चनिपातेनस्फुटितमित्यर्थः ॥ एतच्चमोक्षपदमपिभूतवन्निर्दिष्टं ॥ अनागताख्यानेन्यवास्यशाख
स्प्रवृत्तेः अतःएवामृतरूपेणद्रवेणसंयुतं ॥ लोकेहिशुकमुखस्पृष्टंफलममृतमिवस्वादुभवतीतिप्रसिद्धं ॥ अत्रशुकोमु
निः अमृतंपरमानंदःसएवद्रवोरसःरसोवैसःरसंह्येवायंलब्ध्वानंदीभवतीतिश्रुतेः ॥ अतेहेरसिकाहेरसज्ञाः ॥ तत्रापि

3 निगमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं ॥ पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ॥ ३ ॥

भावुकाः ॥ रसविशेषभावनाचतुराः ॥ अहोभुविगलितमित्यलभ्यलाभोक्तिः इदंभागवतंनामफलंमुहुःपिबत ॥ नन्वत्व
गस्थ्याद्विकंविहायफलाद्रसःपीयतेकथंमेवफलंपातव्यंतत्राहरसंरसरूपंअतःत्वगस्थ्यादेर्हेयस्याभावात् ॥ फलमेवकृ
त्स्नंपिबत ॥ अत्रचरसतादात्म्यविवक्षयारसवत्वस्याविवक्षितत्वात्गुणवचनेनपिरसशब्देमतुपः ॥ प्राप्तभावात्तेनविने
ऊक्तं ४ वरसंफलमितिसामानाधिकरण्यंतत्रफलमित्युक्तेपानासंभवाद्धेयांशप्रशक्तिश्चभवेदितितन्निवृत्त्यर्थंरसमित्यु
क्तं ॥ रसमित्युक्तेपिगलितस्यरसस्यपातुमशक्यत्वात्फलमित्युक्तं ॥ नचभागवतामृतपानंमोक्षेपित्याज्यमित्याह ॥ आ राम
लयंलयोमोक्षः अभिविधावाकारः ॥ लयमभिव्याप्यनहीदंस्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतुसेव्यतएव ॥ आत्मारामाश्च ३
मुनयोनिर्ग्रंथाअप्युरुक्रमेकुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिरिति ॥ ३ ॥ ॥ ॥ ३ ॥ रामरामराम

इतेद्ववसं ३ वक्ष्यति हि २

इदानींश्रोतृप्रवर्त्तनायश्रीभागवतस्यकांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यंदर्शयति ॥ धर्मइति ॥ अत्रश्रीमतिसुंदरेभा
गवतेपरमोधर्मोनिरूप्यते ॥ परमत्वेहेतुः प्रकर्षेणउज्झितंकैतवंफलाभिसंधिलक्षणंकपटंयस्मिन्सः ॥ प्रश
ब्देनमोक्षाभिसंधिरपिनिरस्तः ॥ केवलमीश्वराराधनलक्षणोधर्मोनिरूप्यतइति ॥ अधिकारितोपिधर्मस्यपर
त्वमाह ॥ निर्मत्सराणांपरोत्कर्षासहनंमत्सरः ॥ तद्रहितानांसतांभूतानुकंपिनां एवंकर्मकांडविषयेभ्यःशा
स्त्रेभ्यःश्रैष्ठ्यमुक्तं ॥ ज्ञानकांडविषयेभ्योपिश्रैष्ठ्यमाह ॥ वेद्यमिति ॥ वास्तवंपरमार्थभूतंवस्तुवेद्यंनतुवैशेषिकाणा
मिवद्रव्यगुणादिरूपं ॥ यद्वावास्तवशब्देनवस्तुनोंशोजीवः वस्तुनः ॥ शक्तिर्मायाचवस्तुनः कार्यंजगच्चतत्सर्वं

धर्मःप्रोज्झितकैतवोत्रपरमोनिर्मत्सराणांसतांवेद्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनम् ॥ श्रीमद्भा
गवतेमहामुनिकृतेकिंवापरैरीश्वरः ॥ सद्योहृद्यवरुध्यतेत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात् ॥ २ ॥ ॥ ॥

वस्त्वेवनततःपृथगितिवेद्यंप्रयत्नेनेवशास्त्रानुभवकं ॥ ततःकिमतआह ॥ शिवदंपरमसुखदं ॥ किंचआध्यात्मिकादिताप
तं२ त्रयोन्मूलनंचअनेनज्ञानकांडविषयेभ्यःश्रैष्ठ्यंदर्शितं ॥ कर्त्तृतोपिश्रैष्ठ्यमाह ॥ महामुनिःश्रीनारायणःतेनप्रथमंसंक्षे
पतःकृते देवताकांडगतेभ्यःश्रैष्ठ्यमाह ॥ परैःशास्त्रैःतदुक्तसाधनैर्वाईश्वरोहृदिकिंवासद्यएवावरुध्यतेस्थिरीक्रियते
वाआहोस्वित्कदाचित्किंतुविलंबेनकथंचित्अत्रशुश्रूषुभिःश्रोतुमिच्छद्भिरेवतत्क्षणादेवावरुध्यते ॥ इदमेवकर्तादि।
किमितिसर्वेनशृण्वंतितत्राह ॥ कृतिभिरिति ॥ श्रवणेच्छातुपुण्यैर्विनानोत्पद्यतइत्यर्थः ॥ तस्मात्कांडत्रयार्थस्यापिय
थावत्प्रतिपादनादिदमेवसर्वशास्त्रेभ्यःश्रेष्ठंअतोनित्यमेतदेवश्रोतव्यमितिभावः ॥ २ ॥ ॥ ॥ ॥

भा०प्र०
५

प्रातःकाले हुता एव हुताः अग्नयो यैस्ते अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितं ॥ इदं वक्ष्यमाणं आदरात् प
पप्रच्छुः ॥ विवक्षितानर्थान्प्रष्टुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः त्वयेति त्रिभिः श्लोकैः ॥ इतिहासा महाभारता
दयस्तैः सहितानि न केवलमधीतानि ॥ अपि तु आख्यातान्यपि व्याख्यातानि च ॥ उत अपि यानि धर्मशास्त्राणि म

ते एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय ऊचुः ॥
त्वया खलु पुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥
यानि वेदविदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्
सर्वं तत्त्वतस्तदनुग्रहात् ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्रांजसायुष्म
न्भवता यद्विनिश्चितं ॥ पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ राम ॥ ॥

न्वादीनि तान्यपि ॥ ६ ॥ किंच यानीत्यादि ॥ विदां विदुषां मध्ये श्रेष्ठः व्यासः यानि वेद परावरे सगुणनिर्गुणे ब्रह्म
णी विदंतीति तथा ॥ ७ ॥ वेत्थ जानासि सौम्य हे साधो ॥ तेषामनुग्रहात् ॥ नन्वतोस्तानि हेतुमाह ॥ ब्रूयुरिति ॥ स्नि
ग्धस्य प्रेमवतः ॥ अतः गुह्यं रहस्यमपि ब्रूयुरेव ॥ ८ ॥ अंजसा सांग्रथार्जवेन ॥ एकांततः ॥ श्रेयः अव्यभिचारि श्रेयः साधनम् ॥ ९ ॥

राम
५

नैमिश

तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिसंबंधाधिका
रिणो विशिष्य नसुरवसेव्यत्वेन चेष्टान्नैमिषुर्वीकृत्य शास्त्रमारभते ॥ नैमिष इति ॥ ब्रह्मणा विसृष्टस्य चक्रस्य मनो
मयस्य नेमिः शीर्यते कुंठीभवति यत्र तन्नैमिषं मिषं वै नैमिषं ॥ तथा च वायवीयेपि एतन्मनोमयं चक्रं मया सृष्टं विसृज्य
ते ॥ यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥ प्रणिपत्य महादेवं विसस
र्ज पितामहः ॥ तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं
नैमिषं मुनिपूजितमिति ॥ नैमिष इति पाठे वाराहपुराणोक्तं द्रष्टव्यं तथाहि गौरमुखं ऋषिं प्रति भगवद्वाक्यं ॥ एवं कृ

नैमिषेनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥४॥

त्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं निहितं दानवं बलं ॥ अरण्येस्मिंस्ततस्त्वेतन्नैमिषारण्यसं
ज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिषः श्रीविष्णुः अत्र प्रदृष्टित्वात्तस्य क्षेत्रे ॥ तथा
चोक्तं वै शौनकादिवचनं ॥ क्षेत्रेस्मिन्वैष्णवे वयं स्वर्गगीयत इति ॥ स्वर्गाये हरिः स एव लोकः भक्तानां निवा
सस्थानं तस्मै तत्प्राप्तयेत्यर्थः ॥ सहस्रं समाः संवत्सरा अनुष्ठानकालो यस्य तत्सत्रं सत्रसंज्ञकं कर्मोद्दिश्य सत्रा
सत उपविविशुः ॥ यद्वा सत्रं कुर्वतेत्यर्थः ॥ आलभंते निर्वपंति ॥ उपयंति इत्यादिवत् सूत्रप्रयोगात्कारणमात्रार्थत्वे
नन्वासउपवेशनस्य धात्वर्थस्याविवक्षितत्वात् ॥४॥ ॥ ॥ ॥ रामराम ॥ रामरामराम

भा०प्र०
५

तत्प्रभावमनुवर्णयंस्तद्यशः॥ श्रवणोत्सुकत्वमाविष्करोति॥ आपन्न इति त्रिभिः संसृतिमापन्नः प्राप्तो विवशो
पि ततः संसृतेः अत्र हेतुः॥ यद्यतो नाम्नः भयमपि स्वयं बिभेति॥१४॥ किंच॥ यस्य पादः संश्रयो येषां त्वत्त एव
प्रशमो अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः संनिधिमात्रेण सेविताः सद्यः पुनंति॥ स्वर्धुनी
गंगा तत्स्या आपस्तत्पादाद्गलिताः सत्यः॥ ननु तत्रैव तिष्ठंति॥ अतः तत्संबंधेन पुनंत्यो पि अनुसेवया पुनंति॥ न

आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं॥१४॥ यत्पा
दसंश्रयाः सूत मुनयः प्रशमायनाः॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया॥१५॥ को वा भगव
तस्तस्य पुण्यश्लोकेड्यकर्मणः॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं॥१६॥ तस्य कर्माण्युदा
राणि परिगीतानि सूरिभिः॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः॥१७॥ अथाख्याहि हरेर्धीम
न्नवतारकथाः शुभाः॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया॥१८॥ रामराम॥ राम॥ ॥ ॥ या

तु स्रवंत्यः ततः सद्यः शतः मुनीनामुत्कर्षोक्तिः॥१५॥ पुण्यश्लोकैरीड्यानि स्तव्यानि कर्माणि यस्य तस्य यशः
कलिमलापहं संसारदुःखोपशमनं॥१६॥ प्रश्नांतरं तस्येति॥ उदाराणि महांति॥ विश्वसृष्ट्यादीनि॥ सूरिभि
र्नारदादिभिः कला ब्रह्मरुद्रादिमूर्तीः॥१७॥ अथेति प्रश्नांतरे॥ अवतारकथाः स्थित्यर्थमेव तत्तदवसरे॥ ये राम
मत्स्याद्यवताराः तदाश्रयाः कथाः स्वैरं लीलां कुर्वतः॥ श्रीकृष्णावतारप्रयोजनेनैव तच्चरितयशो विज्ञातव्यं॥१८ ५

अन्येपि बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चितं च तु नेत्याहुः प्रायेणेति ॥ सभ्य हे साधो ॥ अस्मिन्
युगे कलौ अल्पायुषो जनाः ॥ तत्रापि मंदा अलसाः ॥ तत्रापि सुमंदमतयः ॥ तत्रापि मंदभाग्याः विघ्नाकुलाः
तत्रापि उपद्रुताः रोगादिभिः ॥ १० ॥ न च बहुशास्त्रश्रवणेपि तावत्तत्फलसिद्धिरित्याहुः ॥ भूरीणि कर्माणि
श्रोतव्यानि येषु तानि ॥ समुद्धृत्य यथा बहु द्धृत्य येन उद्धृतेन वचनेन आत्मा बुद्धिः सुप्रसीदति सम्यगुपशाम्य

प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥ १० ॥ भूरी
णि भूरिकर्माणि श्रोतव्यानि विभागशः ॥ अतः साधोऽत्र यत्सारं समुद्धृत्य मनीषया ॥ ब्रूहि नः श्रद्द
धानानां येनात्मा संप्रसीदति ॥ ११ ॥ सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥ देवक्यां वसुदेवस्य जातो
यस्य चिकीर्षया ॥ १२ ॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥ यस्यावतारो भूतानां क्षेमाय च भवाय च ॥ १३ ॥

ति ॥ ११ ॥ प्रष्टव्यांतरं सूत जानासीति पंचभिः ॥ भद्रं त इत्यास्तु वचनाशीर्वादः ॥ भगवान्निरतिशयैश्वर्यादिगुणः
सात्वतां सत्त्वांशेन सत्त्वमूर्तिर्भगवान्स उपास्यते यया विधया तेन पांत इति ॥ सत्वंतो भक्ताः स्वार्थे अण् राद्धसवाय ।
सात्वत ॥ तस्य चाश्रवणमार्गीते देवं सात्वंत इति भवतीति तेषां पतिः ॥ पालकः ॥ यस्यार्थः विशेषस्य चिकीर्षया ।
वसुदेवस्य भार्यायां देवकस्य भार्यायां देवक्यां जातः ॥ १२ ॥ अंग हे सूत तन्नोऽनुवर्णयितुमर्हसि ॥ सामान्यतः ।
तावत् यस्यावतारो भूतानां क्षेमाय च पालनाय भवाय समृद्धये ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा०प्र० अस्मिन् संप्रसमये त्वद्दर्शनमीश्वरेणैव संपादितमिति अभिनंदंति त्वमिति ॥ कलिं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां क
६ र्णधारो नाविक इव ॥ २२ ॥ पुनः प्रश्नांतरं ब्रूहीति ॥ धर्मस्य वर्मणि कवचवद्रक्षके ॥ स्वां काष्ठां मर्यादां स्वस्वरूपमि
त्यर्थः ॥ अस्य चोत्तरं कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥ १ ॥ ३ ॥
त्यंशेन ॥ क ॥ २३ ॥ इति प्रथमस्कंधे प्रथमोऽध्यायः ॥ १ ॥ ॥ तदेवं प्रथमेऽध्याये षट्प्रश्ना मुनिभिः कृताः ॥ द्वितीये तूत्तरं
सूतस्तूर्णमाहते ध्यय ॥ १ ॥ विप्राणामिति एवंभूतैः सम्यक्प्रश्नैः सम्यक् हृष्टः रौमहर्षणस्य पुत्र उग्रश्रवाः ते
षां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपक्रांतवान् ॥ १ ॥ प्रवचनस्योपक्रमेऽनुरूपं तेन नमस्कारं शिवतमाह त्रिभिः ॥ तत्र स्व

6 त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्वहरं पुंसां कर्णधार इवार्णवं ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्म
ण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे नै
मिषीयोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वच
स्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥ सूत उवाच ॥ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥
पुत्रेति तन्मयतया तरवोऽभिनेदुः तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

गुरोः शुकस्यैश्वर्यं तच्चरितैर्नैव द्योतयन्नाह
यमिति ॥ यं प्रव्रजंतं संन्यासाय गच्छंतं अनुपेतम् उपनयनार्थम् अनुपपन्नं यद्वा केनाप्यनुपेतं अनन्यगतमेका
किनमित्यर्थः ॥ तत्र हेतुः ॥ अपेतकृत्यं कृत्यशून्यं कर्ममार्गेऽप्रवर्तमानं नैष्ठिकत्वात् ॥ द्वैपायनो व्यासः विरहात्कातरो
भीतः पुत्रेति तेनाजुहाव आहूतवान् तदा ... तदा तन्मयतया तरवोऽभिनेदुः प्रत्युत्तरमुक्त
वंतः पितुः स्नेहानुबंधपरिहाराय वृक्षरूपेणोत्तरं दत्तवानित्यर्थः ॥ तं मुनिमानतोऽस्मि ॥ तन्मयत्वोपपादनाय विशिन

एवंश्रौत्सुक्येनपुनरपिभगवच्चरितान्येवश्रोतुमिच्छंतस्तत्रात्मन ।। स्तृप्त्यभावमावेदयंति ।। वयंत्विति ।। योगयागा
दिषुतृप्ताःस्म ।। उद्गच्छतितमोयस्मात्सउत्तमस्तथाभूतः ।। श्लोकोयशोयस्यतस्यविक्रमेतुविशेषेणनतृप्यामः
अलमितिनमन्यामहे ।। तत्रहेतुः ।। यच्छृण्वतां ।। पदेऽन्यदन्यन्नूतनम ।। वयंतुनेतितुशब्दस्यान्वयः ।। अयम
र्थः ।। त्रेधाहितृप्तिर्भवति ।। उदरादिभरणेनवारसाज्ञानेनवास्वादुविशेषाभावाद्वा तत्रशृण्वतामित्यनेनश्रो
त्रस्याकाशात्वान्नभरणमित्युक्तं ।। रसज्ञानामित्यनेनवाऽज्ञानतः ।। पशुवत्तृप्तिर्निराकृता ।। इक्षुभक्षणवद्र

वयंतुनवितृप्याम उत्तमश्लोकविक्रमे ।। यच्छृण्वतांरसज्ञानांस्वादुस्वादुपदेपदे ।। १९ ।। कृतवान्कि
लवीर्य्याणिसहरामेणकेशवः ।। अतिमर्त्यानिभगवान्गूढःकपटमानुषः ।। २० ।। कलिमागतमा
ज्ञायक्षेत्रेस्मिन्वैष्णवेवयं ।। आसीनादीर्घसत्रेणकथायांसक्षणाहरेः ।। २१ ।। राम ।। राम

सांतराभावेनतृप्तिंनिराकरोति ।। पदेपदेप्रतिक्षणंस्वादुतोपिस्वादु ।। १९ ।। अतःकृष्णचरित्राण्येवकथयेत्याशयेनाहुः
कृतवानिति ।। अतिमर्त्यानिमर्त्यातिक्रांतानिगोवर्द्धनोद्धरणादीनिमनुष्येष्वसंभावितानीत्यर्थः ।। २० ।।
ननुयजनाध्ययनादिव्यग्राणांकुतएतच्छ्रवणावकाशःस्यात् ।। अतआहुः ।। कलिमागतंज्ञात्वातद्भिया
विपदंगंतुकामाः ।। दीर्घसत्रेणनिमित्तेनात्रासीनाहे ।। कथायांसक्षणाकृतावसराः ।। २१ ।। राम ।।

भा०प्र०
७॥

ननुतमेतमात्मानंवेदानुब्राह्मणावचनेनं॥विविदिषंति॥यज्ञेनदानेनतपसाऽनाशकेनेत्यादिश्रुतेर्भ्यो
धर्मस्यज्ञानांगत्वंप्रसिद्धं॥तत्कुतोभक्तिहेतुत्वमुच्यते॥सत्यं॥तत्तुभक्तिद्वारेणेत्याह॥वासुदेवेति॥अहैतुकं
शुष्कतर्काद्यगोचरं॥औपनिषदमित्यर्थः॥७॥व्यतिरेकमाह॥धर्मइति॥योधर्मइतिप्रसिद्धः सः यदि
विष्वक्सेनस्यकथासुरतिंनोत्पादयेत्॥तर्हिस्वनुष्ठितोऽपिसन् अयंश्रमोज्ञेयः ननुमोक्षार्थस्यापिधर्मस्य

वासुदेवेभगवतिभक्तियोगःप्रयोजितः॥जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकम्॥७॥
धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः॥नोत्पादयेद्यदिरतिंश्रमएवहिकेवलं॥८॥

श्रमत्वमस्त्येव अतआह॥केवलंविफलश्रमइत्यर्थः॥नन्वस्तितत्रापिस्वर्गादिफलमित्याशंक्यैवकारेण
निराकरोति॥क्षयिष्णुत्वात्नतत्फलमित्यर्थः॥नन्वक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतीत्यादिश्रु राम
तेर्नतत्फलस्यक्षयिष्णुत्वमित्याशंक्यमहिशब्देनसाधयति॥तद्यथेहकर्मजितोलोकः क्षीयतएवमेवा ७
ऽमुत्रपुण्यजितोलोकः क्षीयतइतितर्कानुगृहीतयाश्रुत्याक्षयिष्णुत्वप्रतिपादनात्॥॥८॥ रामरामराम

कृपालुतां दर्शयन्नाह य इति ॥ अंधं गाढं तमः संसाराख्यं ॥ अतितर्तुमिच्छतां पुराणानां मध्ये गुह्यं गोप्यं तत्त्वे हेतुत्वेन
चन्यासविशेषणनिरस्तः निजः असाधारणः अनुभावः प्रभावो यस्य तत्स्वानुभावं ॥ अखिलश्रुतीनां सारं ॥ एकम
द्वितीयं अनुपममित्यर्थः ॥ आत्मानेकपंकारणसंघातमधिकृत्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं साक्षात्प्र
काशकं उपयामि शरणं व्रजामि ॥ ३ ॥ अथाभ्यां गुरुं नमस्कृत्य देवं प्रणमति ॥ जयत्यनेन संसारमिति जयो ग्रंथः तमु
दीरयेदिति ॥ स्वयं तथोदीरयन् ॥ अन्यान्पौराणिकान् उपशिक्षयति ॥ ४ ॥ नित्यं च वः प्रतिहन्तुं मतिय दुक्तं तन्मत्ति पूजनं न

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धं ॥ संसारिणां करुणयाह पुराणगु
ह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ॥ ३ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं चैव ततो
जयमुदीरयेत् ॥ ४ ॥ मुनयः साधु पृष्टोहं भवद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नो येनात्मा सुप्रसीदति का
॥ ५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥ ६ ॥ राम ॥ राम ॥

मुनय इति ॥ हे मुनयः साधु यथा भवति तथाहं पृष्टः ॥ यतो लोकानां मंगलमेतत् ॥ यतः कृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रा
र्थसारोद्धारप्रश्नस्यापि कृष्ण एव पर्यवसानादेवमुक्तं ॥ ५ ॥ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमैकान्तिकं श्रेयो ब्रूहीति ॥ तत्रो
त्तरं स वै पुंसामिति द्वयमर्थः ॥ धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च ॥ तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षण
सोऽपरः यतस्तु धर्मात् ॥ श्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकान्तिकं श्रेय इति ॥ कथंभूता अहै
तुकी हेतुः फलानुसंधानं तद्रहिता ॥ अप्रतिहता विघ्नैरनभिभूता ॥ ६ ॥ ॥ ॥ ॥ ॥

भा०प्र०
८

नत्वतत्त्वंसपरिकरयाभक्त्यैवप्राप्यतइत्याह॥ तच्छ्रेत्यन्वयः॥ ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षं॥ तच्च
तत्त्वंआत्मनिदेहेपश्यंति॥ आत्मानंपरमात्मानं॥ श्रुतेनवेदांतादिश्रवणेनगृहीतयाप्राप्तयेति
भक्तेर्हार्दत्वमुक्तं॥ १२॥ धर्मस्यफलंभक्तिःनार्थकामादिकमितीममर्थमुपपाद्यउपसंहरति॥ अतइति हेद्वि
जश्रेष्ठाःहरितोषणंहरेराधनंसंसिद्धिःफलं॥ १३॥ यस्माद्भक्तिविहिनोधर्मःकेवलंश्रमएवतस्माद्भक्तिप्रधा

तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया॥ पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया॥ १२॥ अतः
पुंभिर्द्विजश्रेष्ठावर्णाश्रमविभागशः॥ स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणं॥ १३॥ तस्मादेके
नमनसाभगवान्सात्वतांपतिः॥ श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा॥ १४॥ यदनु
ध्यासिनायुक्ताःकर्मग्रंथिनिबंधनं॥ छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं॥ १५॥

नएवधर्मोऽनुष्ठेयइत्याह॥ तस्मादिति॥ एकेनएकाग्रेणमनसा॥ १४॥ भक्तिरहितोधर्मःकेवलंश्रमइति
प्रपंचितं इदानींतुभक्तेर्मुक्तिफलत्वंप्रपंचयति॥ यदितियस्यअनुध्याअनुध्यानंसैवअसिःखड्गःते
नयुक्ताविवेकिनःग्रंथिमहंकारंनिबध्नातियत्कर्मतत्छिंदंति॥ तस्यकथायांरतिंकोनकुर्यात्॥ १५॥

राम
८

तदेवं हरिभक्तिद्वारा तदितरवैराग्यात्मज्ञानपर्यंतः ॥ परो धर्म इत्युक्तं ॥ अन्ये तु मन्यंते धर्मस्यार्थः फलं तस्य च
कामः फलं तस्य चेंद्रियप्रीतिः ॥ तत्प्रीतेः अपुनरपि धर्मार्थादिपरंपरेति ॥ यथाहुः धर्मादर्थश्च कामश्च
स किमर्थं न सेव्यते तस्मादेतन्निराकरोति धर्मस्येति द्वाभ्यां ॥ आपवर्गस्य आत्कन्यायेनापवर्गपर्यंतस्य ।
अर्थाय फलत्वाय अर्थो नोपकल्पते योग्यो न भवति ॥ न यार्थस्यापि एवं सत धर्माव्यभिचारिणः कामो लाभाय
फलत्वाय न हि स्मृतो मुनिभिः ॥९॥ कामस्य च विषयभोगस्य इंद्रियप्रीतिर्लाभः फलं न भवति ॥ किंतु यावता जीवि

धर्मस्य ह्यापवर्ग्यस्य नार्थोर्थायोपकल्पते ॥ नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ॥९॥ कामस्य नेंद्रिय
प्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥१०॥ वदंति तत्तत्त्वविदस्तत्त्वं य
ज्ज्ञानमद्वयं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥११॥

वेतावानेव कामस्य लाभः जीवनपर्याप्त एव
कामः सेव्य इत्यर्थः ॥ जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्यः इह प्रसिद्धः स्वर्गादिः सोर्थो न भव
ति किंतु तत्त्वजिज्ञासैवेति ॥१०॥ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित्तत्राह ॥ त
त्त्वविदस्तदेव तत्त्वं वदंति किं तत् ज्ञानं नाम अद्वयमिति ॥ क्षणिकविज्ञानपक्षं व्यावर्तयति ॥ ननु तत्त्वविदोपि
विगीतवचना एव नैवं तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह ॥ औपनिषदैर्ब्रह्मेति ॥ हैरण्यगर्भैः परमात्मा।

अत्र सदाचारं दर्शयन्नुपसंहरति ॥ अत इति ॥ आत्मनः प्रसादिनीं मनःशोधिनीं ॥ वासुदेवे भक्तिं कुर्वंतीति भज
भा०१प्र० नीयविशेषो दर्शितः २२ ॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेपि वासुदेवस्याधिक्यमाह सत्वमि
९ ति ॥ इह यद्यप्येक एव परः पुमान् अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं संज्ञा केवलं भिन्ना धत्ते हरि
विरंचिहरा इति वक्तव्ये संधिरार्षः ॥ तत्रैतेषां मध्ये श्रेयांसि शुभफलानि सत्वतनोर्वासुदेवादेव स्युः २३ ॥ उपाधि
वैशिष्ट्येन फलवैशिष्ट्यं सदृष्टान्तमाह ॥ पार्थिवात्त्वप्रवृत्तिप्रकाशरहितात् ॥ दारुणः काष्टात्सकाशात्धूमः
उत्कृष्टः प्रवृत्तिस्वभावस्त्रयीमयः वेदोक्तकर्मप्रचुरः ॥ इयत्कर्मप्रत्यासत्तिस्तस्मादप्यग्निस्त्रयीमयो यस्मा

9

अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादिनीं ॥ २२ ॥ सत्वं रजस्तम इति
प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्याद्ये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्व २४
तनोर्नृणां स्युः ॥ २३ ॥ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥ तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं ॥

त्साक्षात्कर्मसाधनत्वात् ॥ एवं तमसः सकासात् रजो सत्वं ब्रह्मदर्शनं ब्रह्मप्रकाशकं तु श्रेष्ठेन लयात्मकात्तमसः स
कासात्रजसः ॥ सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षे राम
पकत्वात् ॥ अतः सत्वं तत्साक्षाद्ब्रह्मदर्शनं ॥ अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः ॥ २४ ॥ ९

ननु सत्यमेवं कर्मनिर्मूलनी हरिकथारतिस्तथापि तस्यां रुचिर्न जायते किं कुर्मस्तत्राह॥ शुश्रूषोरिति॥
पुन्यतीर्थनिषेवणादिभिर्निःपापस्य महत्सेवा स्यात्॥ तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्या
दित्यर्थः॥१६॥ ततश्च शृण्वतामिति॥ पुण्ये श्रवणकीर्तने यस्य सः॥ सतां सुहृत् हितकारी हृदि यान्यभद्राणि
कामादिवासनाः तानि विधुनोति तस्य हृदयस्थः सन्॥१७॥ ततश्च नष्टप्रायेष्विति॥ सर्वाभद्रनाशस्य ज्ञानोत्तरकाल

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्॥१६॥ शृण्व
तां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः॥ हृद्यंतःस्थो ह्यभद्राणि विधुनोति सुहृत्सतां॥१७॥ नष्टप्रायेष्वभ
द्रेषु नित्यं भागवतसेवया॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी॥१८॥ तदा रजस्तमोभावाः काम
लोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति॥१९॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः
भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते॥२०॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य।
कर्माणि दृष्ट एवात्मनीश्वरे॥२१॥

त्वात् प्रायग्रहणं॥ भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्च
लाविक्षेपकाभावात्॥१८॥ रजश्च तमश्च ये च तत्स्वभावा भावाः कामादयः॥ एतैरनाविद्धमनभिभूतं प्रसीदति उप
शाम्यति॥१९॥ भगवद्भक्तियोगतः प्रसन्नमनसः॥ अत एव मुक्तसंगस्य॥२०॥ ज्ञानफलमाह भिद्यत इति हृदयमेव ग्रं
थिः॥ चिज्जडग्रंथनरूपोऽहंकारः॥ अत एव सर्वसंशयाः॥ असंभावनादिरूपाः कर्माण्यनारब्धफलानि॥ आत्मस्वरू

पश्चात्तु ईश्वरे दृष्टे एवकारो ज्ञानानंतरमेवेति दर्शयति॥२१॥

भा० पु० २०

ननुजगत्सर्गप्रवेशनियमादिनोविलासयुक्तेव स्फुरति सर्वशास्त्रसमन्वयोदृश्यते कथंवासुदेवपरत्वंसर्वस्येत्यत्राह॥ सए
वेतिचतुर्भिः॥ एतैरवतारैर्लोकैः तस्यकर्माण्युदाराणिब्रूहीतिप्रश्नस्योत्तरं॥ सदसद्रूपयाकार्यकारणात्मिकया अगुणश्चेत्यन्व
यः स्वतोनिर्गुणोपिसन्नित्यर्थः॥ भगवतोजगत्कारणत्वमुक्तं॥२९॥ प्रवेशनियमनलक्षणांलीलामाह॥ तयेति॥ विल
सितेषु उद्भूतेषु गुणाकाशादिषु अंतःप्रविष्टः सन् गुणवानिव कर्मदर्शनात् एते गुणा इत्यभिमानवानिव नतुवस्तुतः यथेत्ता
विज्ञानेन चिद्रूपत्वात् विजृंभितः अस्फूर्जितः॥३१॥ बहुरूपत्वलीलामाह॥ यथेति॥ स्वयोनिषु स्वाभिव्यंजकेषु अवहितो

सएवेदंससर्जाग्रेभगवानात्ममायया॥ सदसद्रूपयाचासौगुणमय्यागुणोविभुः॥३०॥ तयाविलसितेष्वेषुगुणेषुगुण
वानिव॥ अंतःप्रविष्टआभातिविज्ञानेनविजृंभितः॥३१॥ यथाह्यवहितोवह्निर्दारुष्वेकःस्वयोनिषु॥ नानेवभाति
विश्वात्माभूतेषुचतथापुमान्॥३२॥ असौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः॥ स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूते
षुतद्गुणान्॥३३॥ भावयत्येषसत्त्वेनलोकान्वैलोकभावनः॥ लीलावतारानुरतोदेवतिर्यङ्नरादिषु॥३४॥

॥इतिश्रीभा० पु० द्वितीयोध्यायः॥२॥

निहितः विश्वात्मापुमान्परमेश्वरोभूतेषुप्राणिषु॥ अंतर्यामित्वेनापिप्रतीयतेति
नानाभावमिवोच्यते॥ क्षेत्रज्ञरूपेणवा॥३२॥ भोगरूपांलीलामाह॥ असौहरिः भूतसूक्ष्माणिचइंद्रियाणिच॥ आत्मामनः
भ्यैतैः॥ स्वयंनिर्मितेषुभूतेषुचतुर्विधेषुचितिभेदेषुस्वात्मत्वंप्रद्योतयते॥ तद्गुणान्तत्तदनुरूपान्विषयान्॥ इच्छयाभुंक्तेभेजयती
ति राजर्यावास्तेयःपालः पतीतिवात्तदात्मनेपद्मार्षेवाभुंजो नवृत्तिइतिस्मरणात्॥३३॥ इदानींसूतजानासीतिप्रश्नोत्तर
माह॥ भावयतिपालयति॥ एतत्तुसर्वावतारसाधारणंप्रयोजनं॥ विशेषतःश्रीकृष्णावतारस्यकुंत्यात्मनोक्तत्वात्॥ लोकभा

वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिर इति ॥ अथ अतो हेतोः अग्रे पुरा विशुद्धसत्त्वमूर्तिं भगवंतमधोक्षजं ॥ अतो ये ता
न् अनु अनुवर्त्तंते ते इह संसारे क्षेमाय कल्पंते ॥२५॥ ननु अन्यानपि केचिद्भजंतो दृश्यंते सत्यं ॥ मुमुक्षवस्तु अन्यान्न भ
जंति ॥ किंतु को विशेष एवेत्याह मुमुक्षव इति ॥ घोरान् भूतपतीन् इति ॥ पितृप्रजेशादीनामुपलक्षणं ॥ अनसूयवः देवतांत
रानिंदकाः संतः ॥२६॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते ॥ अत एव पितृभूतादिभिः समशीलाः येषां ते श्रिया सह ऐ
श्वर्यं प्रजाश्च ईप्संतीति तथा ते ॥२७॥ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह
द्वाभ्यां ॥ वासुदेवपरास्तात्पर्यगोचरो येषां ते ॥ ननु वेदा मखप्रधाना दृश्यंत इत्याशंक्य तेषामपि तदाराधनार्थत्वात् तत्पराणि

भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजं ॥ सत्त्वं विशुद्धं क्षेमाय कल्पंते येऽनुतानिह ॥२५॥ मुमुक्षवो घोररूपान्हित्वा
भूतपतीनथ ॥ नारायणकलाः शांता भजंति ह्यनसूयवः ॥२६॥ रजस्तमःप्रकृतयः समशीला भजंति वै ॥ पितृभूतप्र
जेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥२७॥ वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ व
॥२८॥ वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥२९॥

इत्युक्तं योगा योगशास्त्राणि
तेषामप्यासनप्राणायामादिक्रियापरत्वमात्रं क्वचित्तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं ॥२८॥ ज्ञानं ज्ञानशास्त्रं ननु
चान्यत् शास्त्रं ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपो ज्ञानं धर्मो यथार्थशास्त्रं दानव्रतादिविषयं ॥ ननु तत्स्वर्गप
रमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं सोऽपि तदानंदांशरूपत्वात्तत्परं वेत्युक्तं ॥ यद्वा वेदा इत्यनेनैव तन्मूलत्वात्
सर्वाण्यपि वासुदेवपराणीत्युक्ते ॥ ननु तत्तेषां मखयागक्रियादिनानार्थपरत्वात् तद्देवापरत्वमित्याशंक्य मखादीनां

भा०प्र० एतच्चयोगिनांप्रत्यक्षमित्याह ॥ पश्यन्तीति ॥ अदभ्रमनल्पंज्ञानात्मकंयच्चक्षुः तेन ॥ सहस्राण्यपरिमितानियानि
२१ पादादीनितैरद्भुतंसहस्रंमूर्धादयोयस्मिंस्तत् ॥ सहस्राणिमौल्यादीनितैरुल्लसत्भ्राजमानं ॥ ४ ॥ एतत्तुकूटस्थं
नत्वन्यावतारवदाविर्भावतिरोभाववदित्याह ॥ एतदिति ॥ आदिनारायणरूपंनिधीयन्तेयस्मिन्नितिनिधानंकार्याव
सानेप्रवेशस्थानमित्यर्थः ॥ बीजंउद्गमस्थानंबीजत्वेपिनान्यबीजतुल्यंकिंत्वव्ययं ॥ नकेवलमवताराणामेव
बीजंकिंतुसर्वप्राणिनामित्याह ॥ यस्यांशोब्रह्मातस्यांशामरीच्यादिस्तैः ॥ ५ ॥ सनत्कुमाराद्यवतारंतच्चरितं

पश्यंत्यदोरूपमदभ्रचक्षुषासहस्रपादोरुभुजाननाद्भुतं ॥ सहस्रमूर्धश्रवणाक्षिनासिकंसहस्रमौल्यं
बरकुंडलोल्लसत् ॥ ४ ॥ एतन्नानावताराणांनिधानंबीजमव्ययं ॥ यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरा
५ दयः ॥ सएवप्रथमंदेवः कौमारंसर्गमाश्रितः ॥ चचारदुश्चरंब्रह्माब्रह्मचर्यमखंडितं ॥ ६ ॥ द्वितीयंतुभ
वायास्यरसातलगतांमहीं ॥ उद्धरिष्यन्नुपादत्तयज्ञेशःसौकरंवपुः ॥ ७ ॥ ॥ राम ॥ राम

ब्रह्मर्षिसर्गः चाह ॥ सएवेति ॥ कौमारः आर्षः प्राजापत्योमानवइत्यादीनिसर्गविशेषनामानि ॥ यःपौरुषंरूपंजगृहेसएवदेवः
कौमाराख्यंसर्गमाश्रितःसन्ब्रह्मा ब्राह्मणोभूत्वाब्रह्मचर्यंचचार ॥ प्रथममिति द्वितीयादिशब्दाश्चनिर्देशमात्रापेक्षया राम
६ अस्यविश्वस्यभवायउद्भवायमहीमुद्धरिष्यन्नितिकर्मोक्तिः ॥ एवंसर्वत्रावतारस्तत्कर्मचोक्तमित्यनुसंधेयम् ॥ ७ ॥ २१

अवतारकथाप्रस्तावेन तृतीयेन्तु निरूपिताः ॥ पुरुषाद्यवतारोक्त्यावतारश्चावर्ण्यते ॥ १ ॥ यदुक्तं ॥ अथाख्याहि हरेर्धी
मन्नवतारकथाः शुभाः इति तदुत्तरत्वेनावताराननुक्रमिष्यन्प्रथमं पुरुषावतारमाह ॥ जगृहे इति पंचभिः
महदादिभिः ॥ महदहंकारपंचतन्मात्रैः ॥ एकादशेंद्रियाणि पंचमहाभूतानी तैः षोडशकला अंशा यस्मिन् ॥ ननु
यद्यपि भगवद्विग्रहो नैवंभूतः ॥ तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति द्र

सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥
यस्यांभसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजांपतिः ॥ २ ॥ यस्या
वयवसंस्थानैः कल्पितो लोकविस्तरः ॥ तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ॥ ३ ॥ रामराम ॥

ष्टव्यं ॥ १ ॥ कोसौ भगवानित्यपेक्षायां तं विशिनष्टि ॥ यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तत्र च योगः ।
समाधिः तद्रूपां निद्रां विस्तारयतः ॥ नाभिरेव ह्रदः तस्मिन् यदंबुजं तस्मादात्मकोशात् ॥ ब्रह्मा आसीत् अत्र भूतपाद्मे
कल्पे स पौरुषं रूपं जगृहे ॥ २ ॥ कीदृशं रूपं तदाह ॥ पश्यंतीति ननु कीदृशो विग्रहस्तस्य योंभसि शेते स्म तदाह ॥ तत्त
स्य भगवतो रूपं ॥ तु विशुद्धं रजस्तमोऽसंभिन्नं ॥ अत एवोर्जितं निरतिशयं सत्वं ॥ ३ ॥ ॥ ॥ ॥ ॥

भा॰पु॰ १२ पृथ्ववतारमाह ॥ पार्थिवं वपुः राजेदं हं पृथुनृपं ॥ पाठांतरे ॥ पृथोरिदं पार्थिवं ॥ ओषधीरित्युपलक्षणं इमां पृथ्वीं सर्वा
णि वस्तूनि दुग्ध अडागमाभाव आर्षः ॥ हे विप्रास्तेन पृथ्वीदोहनेन सोयमवतार उशत्तमः कमनीयतमः ४ वश
कांता विपत्यस्मात् ॥ १४ ॥ मत्स्यावतारमाह ॥ चाक्षुषमन्वंतरेपउदधिसंप्लवः ॥ तस्मिन्यद्यपि मन्वंतरावसाने प्रल
यो नास्ति ॥ तथापि केनचित्कौतुकेन सत्यव्रताय माया दर्शिता ॥ यथाऽष्टके डे मार्कंडेयायेति द्रष्टव्यं ॥ महीमय्यां ना
वि नौकारूपायां मह्यामित्यर्थः ॥ अपात्ररक्षितवान् ॥ वैवस्वत इति भाविनी संज्ञा ॥ १५ ॥ कमठः कूर्मस्तद्रूपः तद्रूपेण ११ एका

12 ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः १४ रूपं स जगृहे मात्स्यं चा
क्षुषोदधिसंप्लवे ॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं ॥ १५ ॥ सुरासुराणामुदधिं मथ्नतां मंदराचलं ।
दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥ १६ धान्वंतरं द्वादशमं त्रयोदशमम एव च ॥ अपाययत्सुरानन्यान्मो
हिन्या मोहयन् स्त्रिया ॥ १७ ॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं ॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा १८
पंचदशं वामनकं कृत्वागादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं ॥ १९ ॥ ॥ ॥

देऽवतारो विभुर्दध्रे ॥ १६ ॥ धन्वंतर्य्यवतारमाह ॥ धान्वंतरं धन्वंतरिरूपं द्वादशमादिष्टयोगस्त्वार्षः त्रयोदशम
मेवरूपं तच्चरितेन सह दर्शयति ॥ अपाययदित्यसुधामध्याहारः मोहिन्या स्त्रिया रूपेण अन्यान् असुरान् मोह
यन् धन्वंतरिरूपेण मथ्यमानीयमोहिन्याऽपाययदित्यर्थः ॥ १७ ॥ नारसिंहं स्वरूपं बिभ्रत् ॥ एरकां निर्गोपितृणं ॥ १८ राम १२
दुष्टानां मदं वामयंती वामनकं रूपं ह्रस्वं वा ॥ प्रत्यादित्सुः तस्मात् आच्छिद्य ग्रहीतुमिच्छुः ॥ १९ ॥ रामरामरामरामः

नारदावतारमाह ॥ तृतीयमिति ॥ ऋषिसर्गमुपेत्य तत्र देवर्षित्वमुपेत्येत्यर्थः ॥ सात्वतं वैष्णवं तंत्रं पंचरात्रागमं आच
ष्ट उक्तवान् ॥ यतस्तंत्रात् निर्गतं कर्मबंधहेतुत्वं येभ्यः ॥ तानि नैष्कर्म्याणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचक
त्वं यतो भवति तदाचष्टेत्यर्थः ॥ ८ ॥ तुर्येऽवतारे धर्मस्य कलांशः भार्येत्यर्थः ॥ ऋषिर्वा एष आत्मनो यत्पत्नीति श्रु
तेः ॥ तस्यां सर्गे ऋषी भूत्वेत्येकावतारं दर्शयति ॥ ९ ॥ कपिलावतारमाह ॥ आसुरये एतन्नाम्ने ब्राह्मणाय तत्त्वानां ग्राम
स्य संघस्य विनिर्णयो यस्मिन् तत्सांख्यं ॥ १० ॥ दत्तात्रेयावतारमाह ॥ षष्ठ इति ॥ अत्रेरपत्यत्वं तेन वृतः सन् प्राप्तः

तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥ तुर्ये धर्मकलासर्गे न
रनारायणावृषी ॥ भूत्वात्मोपशमोपेतमकरोत् दुश्चरं तपः ॥ ९ ॥ पंचमः कपिलो नाम सिद्धेशः कालविप्लु
तं ॥ प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ॥ १० ॥ षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ॥ आन्वीक्षिकीम
श्र २ लर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपा
त्स्वायंभुवांतरं ॥ १२ ॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं ॥ १३ ॥

अत्रेरपत्यमभिकांक्षत आह ॥ तुष्ट इति वक्ष्यमाणत्वात् कथं प्राप्तः ॥ अनसूयया भर्त्रासहशापत्यमिषेण मामेवापत्यं वृ
तवानिति ॥ दोषदृष्टिमकुर्वन्नित्यर्थः ॥ आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥ ११ ॥ यज्ञावतारमाह ॥ स यज्ञः
यामाद्यैः स्वपुत्रैः यामा नाम देवाः ॥ तदाद्यैः सह स्वायंभुवमन्वन्तरं पालितवान् तदा स्वयमिंद्रोऽभूदित्यर्थः
१२ ऋषभावतारमाह ॥ सर्वाश्रमनमस्कृतं अत्याश्रमपरमहंसपदं वर्त्म धीराणां दर्शयन् नाभेराग्नीध्रपुत्रात् ॥ ऋषभो जातः ॥ १३

भा॰ प्र॰ विस्तृतीराह । ऋषय इति ॥ २७ ॥ तत्र विशेषमाह ॥ एते चेति ॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कला विभूत
॥१३॥ य्यः । तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं ॥ कु
मारनारदादिष्वधिकारिकेषु यथोपयोगमंशकलावेशः । पृथ्वादिषु शक्त्यावेशः । कृष्णस्तु भगवान्नारा
न्नारायण एव आविर्भूतसर्वशक्तित्वात् ॥ सर्वेषां प्रयोजनमाह ॥ इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं
13 मृडयंति सुखिनं कुर्वंति ॥ २८ ॥ एतत्कीर्तनफलमाह ॥ जन्मेति ॥ गुह्यं अतिरहस्यं जन्म प्रयतः शुचिः सन्

ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ एते चांशकलाः
पुंसः कृष्णस्तु भगवान्स्वयं ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥ २८ ॥ जन्म गुह्यं भगवतो य ए
तत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदा
त्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥

दुःखग्रामात् संसाराद्विमुच्यत इत्युक्तं ॥ २९ ॥ तत्र
थं१ कं देहद्वयसंबंधे सति तद्धि मुक्तिरित्याशंक्य ॥ देहसंबंधस्य भगवन्मायोत्थाविद्याविलसितत्वादेतच्छ्रव
णादिजनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह ॥ एतदिति ऽ पंचभिः ॥ अरूपस्य चिदेकरसस्यात्म
नो जीवस्य एतत्स्थूलं रूपं शरीरं ॥ भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितं ॥ क्व आत्मनि आत्मस्थाने राम ॥१३॥

परशुरामावतारमाह ॥ अवतार इति त्रिः त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारान् एकविंशतिवारानित्य
र्थः ॥ २० ॥ व्यासावतारमाह ॥ अल्पमेधसः ॥ अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥ २१ ॥ नरदेवत्वमा
पन्नः सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥ २२ ॥ रामावतारमाह ॥ नरदेवत्वं राघवरूप
एप्राप्तः सन् अतः परं अष्टादशे ॥ २२ ॥ रामकृष्णावतारमाह ॥ विंशतितमे वक्तव्ये तकारलोपः ॥ छंदोनुरोधेन ति
रामकृष्णावित्येवं नामनी जन्मनी प्राप्य ॥ २३ ॥ अजनस्य सुतः जिनसुत इति पाठे जिनः स एव कीकटेषु म

अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥ २० ॥ ततः सप्त
दशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥ २१ ॥ नरदेवत्वमापन्नः ।
सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं ॥ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य
जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भरं ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो
नाम्नाजिनसुतः कीकटेषु भविष्यति ॥ २४ ॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णु
यशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥ अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः ॥ यथाऽविदासिनः कुल्याः ।
सरसः स्युः सहस्रशः ॥ २६ ॥

ध्यगयाप्रदेशे ॥ २४ ॥ युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्सकाशात् जनिता जनि
ष्यते ॥ २५ ॥ अनुक्तसर्वसंग्रहार्थमाह ॥ अवतारा इति ॥ असंख्येयत्वे दृष्टांतः यथेति अविदासिनः उपक्षयशून्यात्
दासउपक्षयइत्यस्मात् ॥ सरसः सकाशात् ॥ कुल्याः क्षुद्रप्रवाहाः ॥ २६ ॥ ॥ ॥ ॥ ॥ ॥ रामराम

भा० प्र० तदेवंउपाधिद्वयमुक्तातद्वादेनजीवस्यब्रह्मतामाह || यत्रयदाइमेस्थूलसूक्ष्मेरूपेस्वसंविदास्वरूपसम्यक्
|| १४ || ज्ञानेनप्रतिषिद्धेभवतः || ज्ञानेनप्रतिषेधाहेतुत्वमेवहेतुमाह || अविद्ययात्मनिकृतेकल्पितेइतिहेतो || तद्ब्रह्म
तदाजीवोब्रह्मैवभवतीत्यर्थः || कथंभूतंदर्शनं || ज्ञानेकस्वरूपं || ३३ || तथापिभगवन्मायायाः सत्त्वात्कार
णभूतयाविद्यमानत्वात्कथंब्रह्मतेत्याह || यदीति || असंदेहसंदेहवंचनंपरिवेदाः प्रमाणस्तुःरितिव
14 त् || वैशारदीविशारदः सर्वज्ञः ईश्वरः तदीयादेवीसंसारचक्रेण || क्रीडन्तीएषामायायद्युपरतोभवति || कि

यत्रेमेसदसद्रूपेप्रतिषिद्धेस्वसंविदा || अविद्ययात्मनिकृतेइतितद्ब्रह्मदर्शनम् || ३३ ||
यद्येषोपरतादेवीमायावैशारदीमतिः || संपन्नएवेतिविदुर्महिम्निस्वेमहीयते || ३४ || ए वि
वंजन्मानिकर्माणिह्यकर्तुरजनस्यच || वर्णयंतिस्मकवयोवेदगुह्यानिहृत्पतेः ३५ ||

मिद्युपरताभवेत् || तत्राह || मतिः विद्या अयंभावः || यावत् विद्यात्मनात्रावरणंविक्षेपंकरोति || तावन्नोप
रमतियदातुसैवविद्यारूपेणपरिणतातदासदसद्रूपंजीवोपाधिं || दग्ध्वानिरिंधनाग्निवत्स्वयमेवोपर
मेदिति || तदासंपन्नःब्रह्मस्वरूपंप्राप्तएवेतिविदुस्तत्त्वज्ञाः किमतोयद्येवं || स्वेमहिम्निपरमानंदस्वरूपे राम
महीयतेपूज्यतेविराजतइत्यर्थः || ३४ || यथाजीवस्यजन्मादिमाययाएवमीश्वरस्याजन्मकर्मादि || मायाइत्या १४
ह || एवमिति || अकर्तुः || कर्माणि || अजनस्यजन्मानिहृत्पतेः || अंतर्यामिणः || ३५ || || || ||

कथमित्यपेक्षायां स्वरूपावरणेन तदध्यासित इति सदृष्टांतमाह ॥ यथेति ॥ अनेन मेघौघो नभसि आका
शे अबुद्धिभिरारोपितः ॥ यथा वा पार्थिवो रेणु ॥ तत्कृतं धूसरत्वादि अनिले एवं द्रष्टरि ॥ आत्मनि दृश्य
त्वं दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ३१ ॥ किंच ॥ अतः स्थूलाद्रूपात्परं अन्यद्रूपं आरो
पितमित्यनुषंगः ॥ कथंभूतं तत् यदव्यक्तं सूक्ष्मं तत्र हेतुः ॥ अव्यूढ [illegible] गुणबृंहितं व्यूढः करचरणादिपरि
णामः तथाऽपरिणता अव्यूढा ॥ [illegible]ते गुणैर्बृंहितं रचितं ॥ आकारविशेषरहितत्वादव्यक्तमि
त्यर्थः ॥ एतदेव कु[illegible]तः ॥ तत्राह ॥ अदृष्टाश्रुतवस्तुत्वात् ॥ यत्आकारविशेषवद्वस्तु तदस्मदादिवत् ॥ दृश्यतेश्रु

यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥
अतः परं यदव्यक्तमव्यूढगुणबृंहितं ॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥

तं वा इंद्रादिवत् ॥ इदं तु न तथा तर्हि तस्य सत्वे किं प्रमाणं ॥ तत्राह ॥ स जीवः ॥ जीवोपाधि ॥ जीवो जीवेन
निर्मुक्तो जीवो जीवं विहाय चेत्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् ॥ जीवोपाधि ॥ तया कल्प्यत इ
त्यर्थः ॥ ननु स्थूलमेव भोगायतनत्वात् जीवोपाधिरस्तु किमन्यकल्पनयेत्यत आह ॥ यदस्मात्सूक्ष्मात्
पुनर्भवः ॥ पुनर्जन्म ॥ उत्क्रांतिगत्यागतीनां तेन विना असंभवादिति भावः ३२ ॥ राम ॥ राम ॥ राम ॥

भा० पु० स्तत्किमेतच्छास्त्रमत्यपूर्वंकथयसित्तत्राह । इदमिति । ब्रह्मसंमितंसर्ववेदतुल्यं उत्तमश्लोकस्यचरितंयस्मिन्तत्ऋषिर्व्या
२५ सः ४० तत्संप्रदायप्रवृत्तिमाह । तदिदमिति । सुतंशुकं ४१ ४२ प्रायेणमरणपर्यंतेनानाशकेनोपविष्टमिति । परमैवराग्योक्तिः
४३ हेविप्राः । विप्रर्षेः शुकाशात् । अध्यगमंज्ञातवानस्मितत्रकीर्तयतः तत्रनिविष्टइतिचान्वयभेदात्तत्रपदावृत्तिरदोषः

इदंभागवतंनामपुराणंब्रह्मसम्मितं । उत्तमश्लोकचरितंचकारभगवानृषिः ४० निःश्रेयसायलो
15 कस्यधन्यंस्वस्त्ययनंमहत् । तदिदंग्राहयामाससुतमात्मवतांवरं ४१ सर्ववेदेतिहासानांसारंसासमु । रं
द्धृतं । सतुसंश्रावयामाससमहाराजंपरीक्षितं ४२ प्रायोपविष्टंगंगायांपरीतंपरमर्षिभिः । कृष्णेस्वधामो
पगतेधर्मज्ञानादिभिःसह ४३ कलौनष्टदृशामेषपुराणार्कोऽधुनोदितः । तत्रकीर्तयतोविप्राविप्रर्षे
र्भूरितेजसः ४४ अहंचाध्यगमंतत्रनिविष्टस्तदनुग्रहात् । सोहंवःश्रावयिष्यामियथाधीतंयथामति
इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेअष्टादशसाहस्र्यांसंहितायांतृतीयोध्यायः॥ ॥३॥

४४ यथाधीतंनतुस्वमतिविलसितं । तत्रतुयथामतिस्वमत्यनुसारेणसंक्षेपतः । कथितंविस्तरतःश्रावयिष्यामि राम
४५ इतिश्रीभागवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांवैयासिक्यांश्रीधरस्वामिविरचितायांभावार्थ २५
दीपिकायांप्रथमस्कंधेतृतीयोध्यायः॥

तर्हि जीवादीश्वरस्य को विशेषः स्वातंत्र्यमेव विशेष इत्याह ॥ स वा इति ॥ षाड्वर्गिकं इंद्रियषड्वर्गविषयं जिघ्रति दूराद्देव
गं [illegible] धवज्जुहाति ॥ न तु सज्जत इत्यर्थः ॥ कुतः षड्गुणेशः षडिंद्रियनियंता ॥ ३६ ॥ ननु किं ईश्वर
स्य सृष्ट्यादिकर्मभिर्विषयभोगैर्वा तत्त्वाहन्नेचेति ॥ धातुर्जगद्विधातुरीश्वरस्य ऊतीर्लीलाः कुमनीषः कुबु
द्धिर्निपुणेन तर्कादिकौशलेन नावैति न जानाति ॥ मनसा रूपाणि वचसा नामानि संतन्वतः विस्तारयतः वचोभि
रिति वक्तृत्वं श्रुत्यभिप्रायेण मनोवचोभिः सहेति वा ॥ ३७ ॥ ननु कोपि न जानाति तर्हि अनर्थोदि प्रसंगः स्यादित्याशंक्य

स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेस्मिन् ॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गु
णेशः ॥ ३६ ॥ न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनोवचोभिः संत
न्वतो नटचर्यामिवाज्ञः ॥ ३७ ॥ स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः ॥ योमायया संततयानुवृ
त त्त्या भजेत तत्पादसरोजगंधं ॥ ३८ ॥ अथेह धन्या भगवंत इत्थं यद्वासुदेवेखिललोकनाथे ॥ कुर्वंति सर्वा
कमात्म त्मभावं न यत्र भूयः परिवर्त उग्रः ॥ ३९ ॥ भक्तास्तु कथंचिज्जानंतीत्याह ॥ स वेदेति ॥ अमायया अकुटिलभावेन
संततया निरंतरया अनुवृत्त्या आनुकूल्येन भजेत ॥ ३८ ॥ भक्तिमार्गेण प्रवृत्तान् हर्षेणाभिनंदति अथेति ॥ यतो भक्त एव
भगवत्तत्त्वं जानाति ॥ अथातः भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः कुतः यद्यस्मात् इत्थं प्रभौ वासुदेवे आत्मभावं
नोच्छिन्नं कुर्वंति ॥ सर्वात्मकं ऐकांतिकं यत्र यस्मिन् भावे सति भूयः परिवर्तो जन्ममरणावर्तो न भवति ॥ ३९ ॥ ॥

भा०प्र० निर्विकल्पकत्वं प्रपंचयति दृष्ट्वेति ॥ आत्मजं शुकं प्रव्रजंतमनुगच्छंतं व्यासं अनग्नमपि दृष्ट्वा लज्जिता देव्योऽप्स
॥१९॥ रसः ह्रिया लज्जया वस्त्रपरिधानं कृतवंत्यः ॥ अनग्नमपत्यं ने नार्यस्तत्सुतो नग्न इत्युक्तं ॥ नग्नस्य पुरतो गच्छत सुत
स्य ह्रिया न परिदधुः ॥ तच्चित्रं वीक्ष्य इयं स्त्री अयं पुमान् इति भिदा भेदस्तव अस्ति विविक्ता शुद्धा दृष्टिर्यस्य ॥५॥ एवंभूतो
सौ कथमालक्षितः ज्ञातः कुरुजांगलाख्यदेशविशेषास्तान्प्राप्तः ॥ प्रथमं ततो गजसाह्वये किंचिच्चरन् गजेन सहित
19 आह्वयो नाम यस्य तस्मिन् हस्तिनापुरे हस्तिना मराज्ञा तेन निर्मितत्वात् ॥६॥ एवंभूतेन मुनिना सह ॥ यत्र संवादे एषा

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं ॥ तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवा
स्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥५॥ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् ॥ उन्मत्तमूक
जडवद्विचरन् गजसाह्वये ॥६॥ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह ॥ संवादः समभूत्तात यत्रैषा सा
त्वती श्रुतिः ॥७॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां ॥ अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम्
८॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमं ॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥ ९ ॥

सात्वती भागवती श्रुतिः संहिता ॥७॥ एतद्व्याख्यानं बहुकालावस्थानापेक्षं पतत्स्यात् एकत्रावस्थानं दुर्लभमित्याह स इ
ति ॥ गोदोहनमात्रं कालं प्रतीक्षते तदपि न भिक्षार्थं ॥ किंतु तेषामाश्रमान् गृहान् तीर्थीकुर्वन् तस्माद् एवंभूतो स्वक्लेशा
श्चर्यं ॥८॥ श्रोतुस्तु चरितमतीवाश्चर्यं अतः कथयेत्याह ॥ अभिमन्युसुतमिति पंचभिः ॥ गृणीहि कथय ॥९॥ राम

राम
१९

तुर्येभागवतारंभकारणत्वेनवर्ण्यते ॥ व्यासस्यापरितोषस्तु तपःप्रवचनादिभिः ॥१॥ इतीति एवंप्रसन्नतयाश्रावयिष्यामि
इतिब्रुवाणंमुनीनांबहूनांमध्येएकेनवक्तव्येयोवृद्धः वृद्धेष्वपिबहुषुयः कुलपतिर्गणमुख्यः तेष्वपिबहुषुयोबह्वृच
ऋग्वेदीतेनवक्तव्यं अतएवंभूतत्वात्शौनकोब्रवीत् ॥१॥ पुण्यांकथामाह ॥२॥ कस्मिन्वास्थानेकेनहेतुनेतिमहा
भारतादिधर्मशास्त्राणिकृतवतः पुनरेतत्संहिताकरणेकिंकारणमित्यर्थः ॥ कुतइतिसार्वविभक्तिकस्तस् केनप्रेरित

व्यासउवाच ॥ इतिब्रुवाणंसंस्तूयमुनीनांदीर्घसत्रिणां ॥ वृद्धःकुलपतिःसूतंबह्वृचःशौनकोब्रवीत्
॥१॥ शौनकउवाच ॥ सूतसूतमहाभागवदनोवदतांवर ॥ कथांभागवतींपुण्यांयदाहभगवान्शुकः
॥२॥ कस्मिन्युगेप्रवृत्तेयंस्थानेवाकेनहेतुना ॥ कुतःसंचोदितःकृष्णःकृतवान्संहितांमुनिः ॥३॥
तस्यपुत्रोमहायोगीसमदृङ्निर्विकल्पकः ॥ एकांतमतिरुन्निद्रोगूढोमूढइवेयते ॥४॥ ॥ ॥

इत्यर्थः कृष्णोव्यासः ॥३॥ यदुक्तंसतुसंश्रावयामसेतितत् ॥ शुकस्यव्याख्यानादिकंकथंघटितमितिप्रष्टुंतस्यासंगोदा
सीनतामाह ॥ द्वाभ्यां ॥ तस्येति ॥ समदृक्सर्वमेवब्रह्मपश्यति ॥ अतोनिर्विकल्पकः स्वार्थिकः निरस्तभेदः ॥ किंच एकस्मि
न्नेवक्रांतः समाप्तिर्यस्याः ॥ तथाभूतामतिर्यस्यसः ॥ अतःउन्निद्रः मायाशयनाद्बुद्धः ॥ यानिशासर्वभूतानांतस्यांजाग
र्तिसंयमीतिस्मृतेः ॥ अतएवगूढः अप्रकटः मूढइवप्रतीयते ॥४॥ ॥ ॥ राम ॥ राम ॥ राम ॥

भा०प्र० जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः । आसीनो बभूवेति शेषः । विविक्तदेश इत्यादिचिह्नैः काम्यार्थमुक्तं । अनेनैव ब
७ दरिकाश्रमस्थानं सूचितं । १५ । तत्र च स ऋषिर्युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्दध्याविति त्रि
येनान्वयः । परावरज्ञः अतीतानागतवित् । अव्यक्तरंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वी

४४ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः । विविक्त एक आसीन उदिते रविमंडले । १५ । परावरज्ञः स
ऋषिः कालेनाव्यक्तरंहसा । युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे । १६ । भौतिकानां च भावानां शक्तिह्रा
८३ सं च तत्कृतं । अश्रद्दधानान्निःसत्वान् दुर्मेधान् ह्रसितायुषः । १७ । दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन च
घ४ क्षुषा । सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् । १८ । चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं । व्यद
धाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं । १९ । ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः । इतिहासपुरा
णं च पंचमो वेद उच्यते । तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः । वैशंपायन एवैको निष्णा
तो यजुषामुत । २१ । अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः । इतिहासपुराणानां पिता मे रोमहर्षणः । २२

त्मनथा भुवि युगे युगे । १६ । भौतिकानां शरीरादीनां तत्कृतं कालकृतं । निःसत्वान् धैर्यशून्यान् दुर्मेधान् मंदमतीन् । १७ । १८ राम
ततश्चातुर्होत्रोपलक्षिताश्चत्वार ऋत्विजश्चतुर्होतारः तैरनुष्ठेयं कर्म शुद्धं मुक्तिकरं यज्ञसंतत्यै यज्ञानविच्छेदाय । १९ ७
चातुर्विध्यमेवाह ऋगिति । उद्धृताः पृथक्कृताः । २० । २१ । दारुणः अथर्वोक्ताभिचारादिप्रवृत्तेः । २२ ॥ ॥ २२ ॥

सम्राट् चक्रवर्त्तीवेति वितर्कः किं कस्य वा हेतोः ॥ कस्मात्कारणात् अधिराज्ञां श्रियं संपदाम् अनादृत्य ॥ १० ॥ यस्य पादनिकेतं
चरणपीठं हस्कु ... धनान्यानीय शत्रवो नमंति ॥ अंग हे सूत ॥ युवा तरुण एव एषितुं ॥ ऐत्तत् अत्रार्षमात्मनेपदं ॥ अ
सुभिः प्राणैः सह ॥ ११ ॥ विरक्तोऽपि लोके किं धनादिभिरिति चेत्तत्राह ॥ लोकस्य शिवाय सुखाय भवाय समृद्ध्यै भूतये ऐश्वर्याय च ॥ ते
जीवंति न त्वात्मार्थं एवं सति असौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं ॥ कुतो हेतोर्मुमोच न हि परोपजी

कस्माद्वा कस्य वा हेतोः पांडूनां मानवर्द्धनः ॥ प्रायोपविष्टो गंगायाम् अनादृत्याधिराट्श्रियं ॥ १० ॥ नमंति
यत्पादनिकेतमात्मनः ॥ शिवाय हानीय धनानि शत्रवः ॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषितोत्स्र
ष्टुमहो सहासुभिः ॥ ११ ॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवंति ना
त्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं ॥ १२ ॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥
मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् ॥ १३ ॥ सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये
जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥

वनं स्वयं त्यक्तुमुचितमित्यर्थः ॥ १२ ॥ यत्किंचन पृष्टोऽसि तत्
वाचां विषये गिरां गोचरे वेदे स्नातं पारंगतं त्वां मन्ये ॥ छंदसाद् अन्यत्र वैदिकव्यतिरेके ॥ अवर्णिकत्वात् ॥ १३ ॥ क
स्मिन् युग इत्यादि प्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह ॥ द्वापरे समनुप्राप्ते ॥ कोऽदः पदं पूरयन्नाह ॥ तृती
ये युगस्य पर्यये परिवर्त्ते वासव्यां उपरिचरवसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥ १४ ॥

भा० प्र० २९ देहभृद्देह्यः आत्मा जीवः वस्तुतो विभुः परिपूर्ण एव आत्मना स्वेन रूपेण असंपन्नः तादात्म्यमप्राप्त इवाभाति ब्रह्मवर्चसं वेदाध्य
यनाध्यापनोत्कर्षजं तेजः तत्र साधवो ब्रह्मवर्चस्याः तेषु सत्तमः अतिश्रेष्ठोपि यद्यानं केवलमसंपन्न इवाभाति प्रस्तुतब्रह्मव
र्चसी ब्रह्मवर्चसवानपि असत्तम इवाभाति पाठांतरे कर्मनीतमापत्नीऽशत्तमः ३१ असंपन्ने हेतुं स्वयमेवाशंकते किंवेति ३

18

अथापि वत मे दैह्यो ह्यात्मा चैवात्मना विभुः ॥ असंपन्न इवाभाति ब्रह्मवर्चस्य सत्तमः ॥ ३१ ॥ किंवा भाग
वता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३२ ॥ तस्यैवं खिलमात्मा
नं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोभ्यागादाश्रमं प्रागुदाहृतं ॥ ३३ ॥ तमभिज्ञाय सहसा प्रत्यु
त्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥ ३४ ॥ इति श्रीभागवते महापुराणे प्रथम
स्कंधे नारदव्याससंवादो नाम चतुर्थोध्यायः ॥ ४ ॥ ॥ ॥ राम ॥ राम ॥ राम ॥

ति प्रायेण भूयस्त्वेन ॥ हि यस्मात्ते धर्मा ॥ अच्युतस्य प्रियाः ॥ ३२ ॥ खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः ॥ कृष्णस्य व्यासस्य प्रागुदा
हृतं सरस्वतीतीरस्थं ॥ ३३ ॥ तं नारदमागतं अभिज्ञाय सहसा प्रत्युत्थाय ॥ विधिवत्पूजयामासेति ॥ ३४ ॥ इति श्रीभागवते राम २९
प्रथमस्कंधे चतुर्थोध्यायः ॥ ४ ॥

व्यसन विभक्तवंतः २३ वेदविभागप्रयोजनमाह तएवेति मेधः स्वल्पमतिमेधावीभिर्धार्यंते तएव २४ किंच स्त्रीशूद्रे
ति द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषां कर्मश्रेयसि श्रेयःसाधने एवं भवेत् अतएवेति तेषां कृपया भारतमाख्या
रिव१

तएतऋषयोवेदंस्वंस्वंव्यस्यन्ननेकधा शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोभवन् २३ तएववेदा
दुर्मेधैर्धार्यंतेपुरुषैर्यथा एवंचकारभगवान्व्यासःकृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनां
त्रयीनश्रुतिगोचरा कर्मश्रेयसिमूढानांश्रेयएवंभवेदिह २५ इतिभारतमाख्यानंकृपयामुनिना
कृतं २६ एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः सर्वात्मकेनापियदानातुष्यत्हृदयंततः २७
नातिप्रसन्नहृदयःसरस्वत्यास्तटेशुचौ वितर्कयन्विविक्तस्थइदंचोवाचधर्मवित् २८ धृतव्र
तेनहिमयाछंदांसिगुरवोग्नयः मानितानिर्व्यलीकेनगृहीतंचानुशासनं २९ भारतव्यपदे
शेनह्याम्नायार्थश्चदर्शितः दृश्यतेयत्रधर्मादिःस्त्रीशूद्रादिभिरप्युत ३० ॥ रामराम

नं मुनिना कृतं अनेनैव प्रकारेण भवत्विति २६ भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा २७ नातिप्रसीदत्
हृदयं यस्य सः चित्तप्रसन्नौ हेतुं वितर्कयन् इदमुवाच मानिताः पूजिताः २९ ३० ॥ ॥ ॥

भा० प्र०
२९

अगाधबोधतां प्रपंचयन्नाह ॥ स्वाइतियाभ्यां ॥ सर्वगुह्यज्ञाने हेतुः ॥ यद्यस्मात्पुराणपुरुषः उपासितस्त्वया कथंभूतः परावरेशः
कार्यकारणनियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किंच ॥ त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योग
बलेन च प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः ॥ अतः परे ब्रह्मणि धर्मतः योगेन निष्णातस्य तदु
क्तं याज्ञवल्क्येन ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां ॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति ॥ अवरे च ब्रह्मणि

59

स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥
॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ परे वरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यू
नमलं विचक्ष्व ॥ ७ ॥ श्रीनारद उवाच ॥ भवतानुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ न तुष्येत मन्ये तद्दर्श
नं खिलं ॥ ८ ॥ यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥

वेदस्वाध्यायव्रतैः स्वाध्यायनियमैर्निष्णातस्य मे अलं अत्यर्थं यत् न्यूनं तद्विचक्ष्व ॥ वितर्कय ॥ ७ ॥ अनुदितप्रायं अनुक्तप्रा
यं भगवद्यशो विमलं विना येनैव धर्मादिज्ञानेनासौ भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्ये ॥ ८ ॥ ननु भगवद्य
शः एव तत्रतत्रानुवर्णितं ॥ तत्राह ॥ यथेति चशब्दाद्धर्मादिसाधनानि च ॥ तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा नो [illegible] ६
राम

पंचमे सर्वधर्मेभ्यो हरिकीर्त्तनगौरवं ॥ व्यासचित्तप्रसादाय नारदेनोपदिश्यते ॥ १ ॥ उपसमीपे आसीनं विप्रर्षिं व्यासं बृहच्छ्रवाः महा
यशाः स्मयन्नीषद्धसन्निवेत्यनेन मुखप्रसादि तिद्योत्यते ॥ यद्वा इत्वेत्यनधिकारार्थे अहो महानप्युमुह्यतीति स्मयमानः ॥ १
शारीरः शरीराभिमानी आत्मा आत्मना ॥ शरीरेण कच्चित्किं परितुष्यति ॥ मानस आत्मा मनोभिमानी तेन मनसा परि
तुष्यति कच्चित्स्वरूपेनोभाविति ॥ २ ॥ तेजिज्ञासितं ज्ञातुमिष्टं धर्मादि यत्तत्सर्वं सुसंपन्नं सम्यक्कृतात्तं ॥ अपि शब्दस्तुष्टितं चेत

सूत उवाच ॥ अथ तं सुखमासीनं उपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥
श्रीनारद उवाच ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥
२ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं ॥ कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥ जिज्ञासितमधीतं च
ब्रह्म यत्तत्सनातनं ॥ तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येवमे सर्वमि
दं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं ॥ ५ ॥

र्थः अपीति पाठे संबोधनं सुसंपन्नत्वे हेतुः महदद्भुतं इत्यादि सर्वैरर्थैर्धर्मादिभिः परिबृंहितं परिपूर्णं ॥ ३ ॥ किंच यत्सनातनं
नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तं चेत्यर्थः ॥ अथापि शोचसि तत्किमिति शेषः ॥ ४ ॥ आत्मा
शारीरो मानसश्च ॥ तन्मूलं तस्यापरितोषस्य ॥ कारणं ॥ अव्यक्तमस्फुटं हे नारद त्वां पृच्छामः ॥ आत्मभवो ब्रह्मा तत्स्याप्म
नो देहाद्भूतः ॥ तेज्ञानं एव च ॥ गाधेति गंभीरो बोधो यस्य तं त्वां ॥ ५ ॥

भा०प्र० भक्तिहीनंकर्मबंधनमेवेतिकैमुतिकन्यायेनदर्शयति॥ नैष्कर्म्यंनिष्कर्मब्रह्मतदेकाकारत्वान्निष्कर्मतारूपंनैष्कर्म्यंअज्यतेऽ
२० नेनेत्यंजनमुपाधिःतन्निवर्तकंनिरंजनंएवंभूतमपिज्ञानंअच्युतेभावोभक्तिस्तद्वर्जितंचेत्॥ अलमत्यर्थंनशोभतेसम्यगपरो
क्षायनकल्पतइत्यर्थः॥ तदाशश्वत्साधनकालेफलकालेचअभद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणं॥ अकाम्यंतच्चेतिचकार
स्यान्वयः॥ तदपिकर्मईश्वरेनार्पितंचेत्॥ कुतःपुनःशोभेतबहिर्मुखत्वेनसत्वशोधकत्वाभावात्॥ तदेवंभक्तिशून्यानिनैष्कर्म्य

२० नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं॥ कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितं
कर्मयदप्यकारणम्॥१२॥ अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः॥ उरुक्रमस्या
खिलबंधमुक्तयेसमाधिनानुस्मरतद्विचेष्टितम्॥१३॥ ॥ ॥ ॥ ॥ रामराम ॥ रामराम

ज्ञानवाक्चित्तकर्मकौशलानिव्यर्थान्येवयतस्ततोहेऋषेहरितमेवानुवर्णयेत्याह॥ अथोअतःकारणात्अमोघायथार्थो
दृक्वीर्यंयस्यशुचिश्रुतंयशोवायस्यसत्यरतः॥ धृतानिव्रतानियेनसभवानेवमहागुणस्तावत्॥ अतउरुक्रमस्यविवि राम
धश्वर धिचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणअखिलस्यबंधमुक्तयेत्वमनुस्मरस्मृत्वानुवर्णयेत्यर्थः॥ एकवाक्यांतर २०.
मितिमध्यमपुरुषप्रयोगोनानुपपन्नः॥१३॥
नु२

वासुदेवव्यतिरिक्तार्थविषयप्रज्ञानवदेवान्यविषयं वाक्चातुर्यंच विकलमेवेत्याह ॥ नेति ॥ चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत
तद्वायसंतीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते ॥ कुतः मानसाः सत्वप्रधाना मनस्विनो हंसा यतयः यत्र न नि
रमंति ॥ कर्हिचिदपि नितरां न रमंते ॥ उशिक्क्षयाः उशिक् कमनीयं ब्रह्म तस्मिन्निवासो येषां ते यथा प्रसिद्धा हंसा मानससरश्च
रंत कमनीय पद्मखंडनिवासाः त्यक्तविचित्रान्नादिभुक्ता उच्छिष्ट ॥ गर्ते काकक्रीडास्थाने न रमंत इति श्लेषः ॥ १० ॥ विनापिपद

नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित् ॥ तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्यु
शिक्क्षयाः ॥ १० ॥ तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपिनामान्यनंतस्ययशोंकि
तानियच्छृण्वंतिगायंतिगृणंतिसाधवः ॥ ११ ॥ ॥ ॥ ॥ ॥

चातुर्यं भगवद्यशः ॥ प्रधानं वचः पवित्रमित्याह ॥ तद्वाग्विसर्गः सचासौवाग्विसर्गः वाचांप्रयोगः ॥ जनानां समूहो जनता त
स्य अघं विप्लावयति नाशयतीति तथा ॥ यस्मिन्वाग्विसर्गे ॥ अबद्धवत्यपि ॥ अपशब्दादियुक्तेपि प्रतिश्लोकं अनंतस्य यशसां
कितानि नामानि भवंति ॥ तत्र हेतुः यत् यानि नामानि महांतः साधवः श्रोतरि सति शृण्वंति श्रोतरि सति गृणंति अन्यदा तु स्वयमेव
गायंति कीर्तयंतीति ॥ ११ ॥

भा०प्र० ननुयद्येवंप्रवृत्तिमार्गोनिंद्यतेतर्हिनिवृत्तिमार्गेण सर्वक्रियात्यागेनैव परमेश्वरसुखस्वरूपानुभूतेः किंतद्यशःकथनेना
२२ पित्याह विचक्षणइतिनिपुणःकश्चिदेवनिवृत्तितःसर्वक्रियानिवृत्त्याअस्यविभोः सुखंनिर्विकल्पकसुखात्मकंस्व
रूपंवेदितुंज्ञातुमर्हति नपुनरविचक्षणः प्रवृत्तिस्वभावःविषयित्वेहेतुः नअंतःकालतःपारंचदेशतोयस्यतस्य विभो
श्चेष्टितं ततःकारणात् हेविभो अनात्मनोदेहाद्यभिमानिनअतएवगुणैः सत्वादिभिःप्रवर्त्तमानस्यजनस्यदर्शय
21 भवानितित्वमित्यर्थः पाठांतरेहेभागवन्निति संबोधनं १६ एवंतावत्काम्यधर्मादेरनर्थहेतुत्वात्तं विहायहरेर्लीलैव

य विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं प्रवर्तमानस्यगुणैरनात्म
नस्ततोभवान्दर्शयचेष्टितंविभोः १६ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथ
त पतेत्ततोयदि यत्रक्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोभजतांस्वधर्मतः १७ ७

वर्णनीयेत्युक्तं इदानींतुनित्यनैमित्तिकस्व धर्मैकनिष्ठामप्यनादृत्यकेवलंहरिभक्तिरेवोपदेष्टव्याइत्याशयेनाह त्यक्त्वे
ति ननुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेनयदिकृतार्थोभवेत्तदानकाचिच्चिंतायदिपुनरपक्वएवम्रियेतततःभ्रंशे
द्वा तदास्वधर्मत्यागनिमित्तोनर्थःस्यादित्याशंक्याह ततोभजनात्पतेत्कथंचित्भ्रश्येत् म्रियेतवायदितदापिभक्ति
रसिकस्यकर्मानधिकारान्नानर्थः शंक्या अंगीकृत्याप्याह वाशब्दःकटाक्षेयत्रक्ववानीचयोनावपिअमुष्यभक्तिरसि राम
कस्यअभद्रमभूत्किं नाभूदेवेत्यर्थः भक्तिवासनासद्भावादितिभावः अभजद्भिस्तुकेवलंस्वधर्मतः कोवार्थःप्राप्तःअभ २२

हरि

विद्वेषदोषं तमाह ॥ ततउक्तकर्मविचेष्टितानुपृथग्दृशः ॥ अतएवान्यथाप्रकारांतरेण यत्किंचिदर्थांतरं विवक्षितं नयावि
वद्व्याकृतेः स्फुरितं रूपैर्नामभिश्चवक्तव्यत्वेनोपास्यते दुःस्थितानवस्थितासतीमतिः कदाचित्क्वापिविषयेआस्पदं
स्थानंनलभेत ॥ वातैर्नहताआघूर्णितानौरिव ॥ तदुक्तं गीतासु ॥ व्यवसायात्मिकाबुद्धिरेकेह कुरुनंदन ॥ बहुशाखाह्य
नंताश्चबुद्धयोऽव्यवसायिनामित्यादि ॥ तदेवं हरियशो विना भारतादिषु कृतं धर्मादिवर्णनमकिंचित्करमित्युक्तं ॥ २
४ ॥ प्रत्युत विरुद्धमेव जातमित्याह ॥ जुगुप्सितं निंद्यं काम्यकर्मादिस्वभावतएवरक्तस्यतत्ररागिणः ॥ पुरुषस्य धर्मकृते धर्मा

ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ॥ नकुत्रचित्क्वापिचदु
स्थितामतिर्लभेतवाताहतनौरिवास्पदं ॥ २४ ॥ जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्त
स्यमहान्व्यतिक्रमः ॥ यद्वाक्यतोधर्मइतीतरः स्थितोनमन्यतेतस्यनिवारणंजनः ॥ २५ ॥

र्थमनुशासतस्तव महानयं व्यतिक्रमः ॥ अन्यायः कुतइत्यतआह ॥ यस्य वाक्यतोयमेवमुख्योधर्मइतिस्थितः इतरःप्रा
कृतोजनः तस्य काम्यकर्मादेः अन्येन तत्त्वज्ञेन क्रियमाणं निवारणं स्वयमेव वा तया क्रियमाणं प्रधानकर्मणा नप्रज
यानधनेन त्यागेनैके ॥ अमृतत्वमानशुरित्यादिश्रुत्या क्रियमाणं निवारणं यथार्थमेतदिति नमन्यते ॥ किंतुप्रवृत्तिमा
र्गनिधिक्तत्वविषयंतदितिकल्पयति ॥ तदुक्तमनंतरोपन्यासेन महैः ॥ तेनैवंशक्यतेवक्तुंयेन प्रवादयोजनाः गृहस्थत्वेन
शस्तेति कर्तुं नयामयंविधिः ॥ नैष्ठिकब्रह्मचर्यं वापरिव्राजकतापिवा ॥ तैरवश्यंगृहीतव्यातेनादावेतदुच्यतइत्यादि ॥ २५

तदेवंभगवल्लीलाप्राधान्येनानुवर्णयेत्युक्तं ॥ तत्रकोभगवान्का ॥ अस्यलीलाइत्यपेक्षायामाह ॥ इदंविश्वंभगवानेवस
तुअस्माद्विश्वस्मादितरः ॥ अस्मात्प्रपंचोनपृथक्ईश्वरस्तुप्रपंचात्पृथगित्यर्थः ॥ तत्रहेतुः यतोभगवतोऽस्यजगतः स्थि
त्यादयोभवंतिअनेनैवलीलाअपिदर्शिताः ॥ यद्वा ॥ इदंविश्वंभगवानिवइतरइवयःसजीवोपि ॥ भगवान्चेतनत्वेननप्र
पंचस्तद्व्यतिरेकेणनास्तिसरावैकस्तत्वमित्यर्थः ॥ हित्वाहेनसर्वंखल्विदंब्रह्मेत्यादिप्रमाणंसूचितंतद्धिस्वयमेवभवा

इदंहिविश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः ॥ तद्धिस्वयंवेदभवांस्तथापिवैप्रादेशमात्रंभवतः
प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक्परस्यपुंसःपरमात्मनःकलां ॥ अजंप्रजातंजगतःशि
वायतन्महानुभावाभ्युदयोऽधिगण्यतां ॥ २१ ॥ इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः
अविच्युतोऽर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानुवर्णनम् ॥ २२ ॥

न्वेदप्रादेशमात्रमेकदेशमात्रंआचार्यवान्पुरुषोवेदेत्यादिश्रुत्यर्थसंपादनायप्रदर्शितः ॥ नचतवाचार्यापेक्षाईश्वराव
तारत्वादित्याह ॥ त्वमिति ॥ हेअमोघदृक्त्वंआत्मनास्वयंआत्मानमजमेवसंतंजगतःशिवायप्रजातमवेहि ॥ कुतःप
रस्यपुंसःकलांअंशभूतं ॥ ततस्तस्मान्महानुभावस्यहरेरभ्युदयः ॥ पराक्रमोऽधिकंगण्यतांनिरूप्यतां ॥ २१ ॥ अनेनैवतपआदि
सर्वंतवसफलंस्यादित्याह ॥ इदंहीति ॥ श्रुतादेर्योभावनिष्ठाइदमेवहितपःश्रवणादेरविच्युतोनित्योऽर्थःफलंकिंतत् ॥ उत्तम
श्लोकस्यगुणानुवर्णनमितियत् ॥ २२ ॥

ननु स्वधर्ममात्रादपि कर्मणः पितृलोकः श्रूयते ॥ पितृलोकप्राप्तिफलमस्त्येव तत्राह ॥ तस्यैव हेतोः ॥ तदर्थं यत्नं कुर्यात् यत्
उपरि ब्रह्मलोकपर्यंतं अधः स्थावरपर्यंतं च भ्रमद्भिर्जीवैर्न लभ्यते ॥ प्रश्नानुपूर्ववत् ॥ ननु विषयसुखं अन्यत एव प्राची
नकर्मणः सर्वत्र नरकादावपि लभ्यते दुःखवत् ॥ यथा दुःखं अप्रयत्नेनापि लभ्यते तद्वत् ॥ तदुक्तं ॥ अप्रार्थितानि दुःखा
नि यथैवायांति देहिनां ॥ सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यत इति ॥ १८ यदुक्तं यत्र क्व वाभद्रमभूदिति ॥ तदुपपा

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्लभ्यते दुःखवदन्यतः सुखं
कालेन सर्वत्र गभीररंहसा ॥ १८ ॥ न वै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग सं
सृतिं ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जनः ॥ १९ ॥ १९ ॥

दयति ॥ न वा इति मुकुंदसेवी जनः जातु कदाचित्कथंचन कुयोनिगतोपि संसृतिं नाव्रजेत् ॥ नाविशत् ॥ अं
ग अहो अन्यवत् ॥ केवलकर्मनिष्ठवदिति वैधर्म्यदृष्टांतः ॥ कुत इत्याह ॥ मुकुंदांघ्र्युपगूहनं आलिंगनं पुनः स्मरन्
विहातुं नेच्छेत् ॥ यतोयं जनो रसग्रहः ॥ रसेन रसनीयेन गृहीतो वशीक्रियते ॥ यद्वा रसनीयो ग्रहः आग्रहो यस्य ॥ तदु
क्तं भगवता ॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः इति ॥ १९ ॥ १९ ॥ ॥

भा०प्र० एवंशुद्धेत्वंपदार्थेज्ञातेदेहादिकृतविक्षेपनिवृत्तेः तत्कारणभूतरजस्तमोनिवर्तिकादृढाभक्तिर्जातेत्याह इत्थमिति हरेर्य
२३ शः अनुसवंत्रिकालं २८ तस्येति शुद्धत्वंपदार्थस्यदृढभक्तिमतोमेप्रश्रितस्यविनीतस्य २९ गुह्यतममिति साधनभू
तधर्मतत्त्वज्ञानंगुह्यं तत्साध्यंविविक्तात्मज्ञानंगुह्यतरं तस्यापीश्वरज्ञानंगुह्यतमं भगवतोदितंभागवतशास्त्रंअन्ववोच
नुउपदिष्टवंतः ३० तदेवज्ञानंपूर्वोक्तत्वंपदार्थज्ञानात् विवेकेनदर्शयति येनैवाहमिति अविदंज्ञातवानहं ३१ तत्साधनध

23 इत्थंशरत्प्रावृषिकावृतूहरेर्विशृण्वतोमेनुसवंयशोऽमलं संकीर्त्यमानंमुनिभिर्महात्मभिर्भक्तिःप्रवृत्तात्मरजस्तमो
पहा २८ तस्यैवंमेनुरक्तस्यप्रश्रितस्यहतैनसः श्रद्दधानस्यबालस्यदांतस्यानुचरस्यच २९ ज्ञानंगुह्य
५ तमंयत्तत्साक्षाद्भगवतोदितं अन्ववोचन्गमिष्यंतःकृपयादीनवत्सलाः ३० येनैवाहंभगवतोवासुदेवस्यवेध १०
सः मायानुभावमविदंयेनगच्छंतितत्पदं ३१ एतत्संसूचितंब्रह्मंस्तापत्रयचिकित्सितं यदीश्वरेभगवतिक
र्मब्रह्मणिभावितं ३२ आमयोयश्चभूतानांजायतेयेनसुव्रत तदेवह्यामयंद्रव्यंनपुनातिचिकित्सितं ३३

र्मरहस्यंचसूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितंभेषजंनिवर्तकंसत्त्वसाधकमितियावत् किंतत्
भगवतिभावितंसमर्पितंयत्कर्मतत्कथंभूतेभगवति ईश्वरेनियंतरि एवमपिब्रह्मणि अप्रच्युतपूर्णरूपे ३२ ननुसंसा राम
रहेतोःकर्मणःकथंतापत्रयनिवर्तकत्वंसामग्रीभेदेनघटतइतिसदृष्टांतमाह आमयइति आमयोरोगः येनघृतादिनाजा २३
यतेतदेवकेवलंआमयकारणंद्रव्यंतमामयंनपुनातिननिवर्तयतीत्यर्थः किंतुचिकित्सितंद्रव्यांतरैर्भावितंसत्पुनात्येवयथा ३३

सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति ॥ अहं पुरा पूर्वकल्पे अतीते भवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशा वे१
दभवं जातोस्मि ॥ निरूपितः नियुक्तः केषां योगिनां शुश्रूषणे ॥ प्रावृषि वर्षाकाले तेन चतुर्मास्ये निर्विविक्षतां निवेशमेकत्र वासं कर्तुमि
च्छतां ॥ २३ ॥ अपेतानि गतान्यखिलानि चापलानि यस्मात्तस्मिन् दांते नियतेंद्रिये अधृत क्रीडासाधने ॥ अनुवर्तिनि अनुकूले
२४ ॥ उच्छिष्टस्य लेपान् पात्रलग्नान्नानि तैर्द्विजैरनुज्ञातः सन् भुंजे स्म तेन भोजनेनापास्तकिल्बिषो जातोस्मि तत्र एवमेतं गाढं मे २८

अहं पुरातीतभवेभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्वि
विक्षतां ॥ २३ ॥ ते मय्यपेताखिलचापलेर्भके दांतेधृतक्रीडनकेनुवर्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रू
षमाणे मुनयोल्पभाषिणि ॥ २४ ॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्र
वृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोह
राः ॥ ताः श्रद्धया मेनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः ॥ २६ ॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रव
स्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥ २७ ॥ ॥ ॥ ॥ ॥ ॥

तद्भजन एव आत्मनो रुचिः प्रजायते स्मेत्यनुषंगः ॥ २५ ॥ अशृणवं श्रुतवान् तस्मिंश्च श्रद्धया मे मेवशृण्वतः मिश्र यानन्येन बला
नीतया अतो ममैत्यस्य पौनरुक्त्यं ॥ २६ ॥ प्रियः श्रवो यस्य तस्मिन् भगवति लब्धरुचेर्मम अस्खलिता अप्रतिहता मतिः अभवदि
त्यनुषंगः ॥ ययामत्या परे प्रपंचातीते ब्रह्मरूपे मयि सदसत् स्थूलसूक्ष्मं च एतत् शरीरं स्वमायया स्वाविद्यया कल्पितं न तु वस्तुतो

श्रीभागवतटीकायां ॥ २७ ॥

भा॰ प्र॰ एवं च कृतनतिमयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह इमं स्वनिगमं स्वोपदेशं मया अनुष्ठितं अवेत्य ज्ञात्वा भावं प्रीतिं च
२४ चक्रे आत्मत्वमप्येवं कुर्वित्याह त्वमिति अभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत विभोर्विष्णोः यशः प्रख्याहि कथय येन
विश्रुतेन बुधेन विदां विदुषां बुभुत्सितं बोद्धुमिष्टं समाप्यते यतो दुःखैः पीडितानां क्लेशशांतिं प्रकारांतरेण न मन्यंते
४० इति प्रथमे पंचमः ॥५॥ व्यासस्य प्रत्ययार्थं च षष्ठे प्राग्जन्मसंभवं स्वभाग्यं नारदः प्राह कृष्णसंकथनोद्भवं १ स्वय

24

इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः ३९ त्वमप्यदभ्रश्रुत विश्रुतं
विभोः समाप्यते येन विदां बुभुत्सितं प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा ४० इति
श्रीभागवते महापुराणे प्रथमस्कंधे पंचमोध्यायः ॥५॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च
भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः १ श्रीव्यास उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव वर्तमानो
वयस्याद्ये ततः किमकरोद्भवान् २ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः कथं चेदमुदस्राक्षीः काले प्राप्ते कले
वरं ३ प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ४ श्रीनारद उवाच
वि भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम वर्तमानो वयस्याद्ये तत एतदकारिषम् ५ ॥ ॥ ॥

मयि तस्याश्चिकीर्षुं गुरूपदेशानंतरं भावितव्यचरितं पृच्छति भिक्षुभिरिति विप्रवसिते दूरदेशगमने कृते सति विज्ञानस्योप राम
२ देष्टृभिः २ परं वयः उत्तमायुः तत्त्वया कथं वर्तितं नीतं इदमिति दासीपुत्रभूतं कलेवरं उदस्राक्षीः उत्सृष्टवानसि ३ एष क २४
ल्पांतरलक्षणः कालः ते स्मृतिं कथं न व्यवधात् न खंडितवान् अडागमाभाव आर्षः यत एष सर्वस्य निराकृतिः प्रलयो

तथा आत्मविनाशाय कर्मनिवृत्तये कल्पंते समर्था भवंति ॥ परे ईश्वरे कल्पिताः अर्पिताः संतः ॥ अत्र च ॥ प्रथमं महत्सेवा ततस्त
त्कृपया ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवान्निरतिः ॥ तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भ
गवत्तत्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादि भगवद्गुणा कर्मनाशः स्यात्तत्राह ॥ यदिति भगवदर्पणेन क्रियमाणं कर्म भक्ति

एवंनृणांक्रियायोगाः सर्वे संसृतिहेतवः ॥ त एवात्मविनासाय कल्पंते कल्पिताः परे ॥ ३४ ॥ यदत्र क्रियते कर्म भगवत्परि
तोषणं ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ॥ ३५ ॥ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयाऽसकृत् ॥ गृणंति गुणना
मानि कृष्णस्यानुस्मरंति च ॥ ३६ ॥ ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणा
यच ॥ ३७ ॥ इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकं ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ ३८ ॥ ॥ ॥

योगं जनयतीति ॥ ३५ ॥ सदाचारेण दर्शयति यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति तदा कृष्णस्य गुणना
मानि गृह्णंति ॥ अनुस्मरंति च कृष्णमित्यर्थः ॥ इत्थं भगवदर्पितं ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्त
पस्यसि कौंतेय तत्कुरुष्व मदर्पणं ॥ मिति ॥ ३६ ॥ कीर्त्तनश्रवणरूपा भक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह द्वाभ्यां ॥ ॐ
नम इति नमो धीमहि मनसा नमनं कुर्वीमहि ॥ ३७ ॥ अमूर्तिकं मंत्रोक्तव्यतिरिक्तमूर्तिशून्यं यजेत ॥ यजति स पुमान् स
म्यग्दर्शनो भवति ॥ ३८ ॥

मा॰ प्र॰ २५ स्फीतान् जनपदादीन् निर्यातः सन् महद्विपिनं भद्राद्दमिति चतुर्थेनान्वयः । जनपदादिषु नानागुणदोषयुक्तेषु समहाष्ट
; सत्सु गतोहमिति तात्पर्यार्थः । स्फीतान् समृद्धान् जनपदान् देशान् तत्र तत्रस्थान् । विशिष्टपुरग्रामव्रजाकरान् । तत्र पुराणि राज
धान्यः । ग्रामास्तु प्रोक्ताः विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति ते । सतु ग्राम इति प्रोक्तः शूद्राणां वास एव चेति । व्रजा गो
कुलानि । आकराः रत्नाद्युत्पत्तिस्थानानि । खेटः कर्षकग्रामः । खर्वटा गिरितटग्रामाः । कर्वटं वा । एकतो यत्र तु
ग्रामो नगरं चैकतः स्थितं । मिश्रं तु खर्वटं नाम नदी गिरिसमाश्रयमिति । व्याघ्रमृगमुख्यादीनां स्थाः वनानि स्वकः सिद्ध

स्फीतान् जनपदांस्तत्र पुरग्रामव्रजाकरान् । खेटखर्वटवाटीश्च वनान्युपवनानि च ॥ ११ ॥ चित्रधातुवि
चित्राद्रीनिभभग्नभुजद्रुमान् । जलाशयान् शिवजलान् नलिनीः सुरसेविताः ॥ १२ ॥ चित्रस्वनैः पत्ररथैर्विभ्रम
द्भ्रमरश्रियः । नलवेणुशरस्तंबकुशकीचकगह्वरं ॥ १३ ॥ एक एवातियातोहमद्राक्षं विपिनं महत् ॥ १४ ॥

वृक्षाणां समूहः । उपवनानि रोपितवृक्षाणां तानि च ॥ ११ ॥ चित्रैर्धातुभिः स्वर्णरजतायैः विचित्रानद्रींश्च इभै
र्भग्ना भुजाः शाखा येषां ते द्रुमा येषु तान् शिवानि भद्राणि जलानि येषां तान् नलिनीः सरसीः सुरसेविताः देवैः स्वर्गा
त्ताः ॥ १२ ॥ चित्राः स्वनाः येषां तैः पत्ररथैः पक्षिभिः उन्नादवद्भिः विभ्रमद्भिः भ्रमरैः श्रीः शोभा यासां ताः नलि
नीः । अतियातः अतिक्रम्य गतः सन् महद्विपिनं वनमद्राक्षं कीदृशं नलवेणुशराणां स्तंबैः कुशैः कीचकैश्च

गह्वरं दुर्गमं तच्च वेणुजातय एव विपुलां नलास्तर्गर्भाः कीचकाः ॥ १४ ॥

मा॰ प्र॰ २५

तत्र तावत्किंचित्कालं तत्रैव मातृस्नेहयंत्रितो न्यवसमित्याह त्रिभिः ॥ एक एवाहमात्मजो यस्याः सा ॥ योषित् मूढा तेन च
स्नेहानुबंधे हेतुः ॥ ६ ॥ किंकरीत्यस्या वैवश्यं प्रपंचयति ॥ अस्वतंत्रा सा अतो न कल्पा न समर्था आसीत् ॥ दारुमयी योषि
त्यतिपारवश्ये दृष्टांतः ॥ तदेवं सा स्नेहं चक्रे ॥ ७ ॥ अहं च दिग्गादिष्वनभिज्ञः ॥ अतस्तत्रैव न्यवसमित्याह ॥ अहं च त
तस्मिन्ब्रह्मकुले तस्याः मातुः स्नेहानुबंधस्यापेक्षया ॥ कदाचिद्विरमेदिति प्रतीक्षेत्यर्थः ॥ उषिवान् वासं कृतवान्

एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ सा स्वतंत्रा न क
ल्पासीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुले ऊषिवां
स्तदपेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥ एकदा निर्गतां गेहाद्दुहंतीं निशि गां पथि ॥ स
र्पोदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शमभीप्सतः ॥ अनुग्रहं मन्यमानः प्रातिष्ठं
दिशमुत्तरां ॥ १० ॥

पंचहायनः पंचवर्षः ॥ ८ ॥ गेहान्निर्गतां गां दुहंतीं दुहितेति शतृप्रत्ययः दोग्धुं निर्गतामित्यर्थः ॥ पदा पादेन स्पृष्टः इत्या
क्रांतः अदशत् अखादत् ॥ ९ ॥ तत् मातुर्मरणं भक्तानां कल्याणमभीप्सतः ईशस्यानुग्रहं मन्यमानः प्रातिष्ठं प्रस्थितोस्मि ॥ १० ॥

भा०प्र० कुतस्तर्हि दृष्टोसि तत्राह सकृदिति यद्दर्शितं मयेति युत् एतत्कामाय मय्यनुरागाय तत्कामेन किमित्यत आह मत्कामः पुमान् हृच्छयान् कामा
२६ न् २३ अदीर्घयापि सतां सेवया त्वं घनिंद्यं लोकं देहं मज्जनतां मत्पार्षदतां गंतासि २४ प्रजानां सर्गे सृष्टौ निरोधे संहारेपि प्र
जोसर्गसुनिरोध इति २५ नभोलिंगमहद्भूतं अस्य महतो भूतस्य निश्वसितमेतमितदृष्टवेदस्य दिष्कृतैः कीदृशं ईश्वरं
ना १ सर्वनियंतृ नभसि लिंगं मूर्तिर्यस्य तत् नभोलिंगं संनिहितमपि न लिंग्यत इत्यलिंगं तस्मै अहं शीर्ष्णा अवनामं प्रणामं विदधे कृत

सकृद्यद्दर्शितं रूपमेतत्कामाय तेनघ मत्कामः शनकैः साधु सर्वान्मुंचति हृच्छयान् २३ सत्सेवयादीर्घयापि
जाता मयि दृढा मतिः हित्वावद्यमिमं लोकं गंतामज्जनतामसि २४ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् प्रजा
सर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् २५ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं अहं च तस्मै म
हतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः २६ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्
ती गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः २७ एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यामलात्मनः कालः
प्रादुरभूत्काले तडित्सौदामिनी यथा २८

वाचं हंतेनानुकंपितः मनुते चेति हृच्छयान् २६ हतत्रपः त्यक्तलज्जः विम
त्सरो जातोस्मीति शेषः २७ कालेस्वावसरे कालः मृत्युः प्रादुरभूत् ननु कथंभूतः कस्मात्प्रादुर्भावे दृष्टांतः विद्युदि
वेति सौदामिनीति विशेषणं स्फुटत्वप्रदर्शनार्थं सुदाम्ना मालातत्र भवा सौदामिनी मालाकारेत्यर्थः यद्वा सुदामा पर्व
तः तेनैकदिग्गिरिस्त्रोणण स्फाटिकादिमयपर्वतप्रांतभवा हि विद्युदति स्फुटा भवति तद्वदित्यर्थः यद्वा तडिदिति त्रैतिकड

२८
राम २६

26

दुरंदुःसहं ॥ प्रतिभयाकारंभयंकरंरूपं ॥ व्यालादीनामजिरंक्रीडास्थानं ॥ परिश्रांतानींद्रियाणिआत्मादेह
श्चयस्यतृषापरीतोव्याप्तः ॥ १४ उपस्पृष्टः आचांतः पिप्पलीपस्थेअश्वत्थस्यमूलेआश्रितः उपविष्टः ॥ १५ ॥
आत्मनाबुद्ध्याः आत्मस्थंहृदिस्थंआत्मानंपरमात्मानं ॥ भावेनभक्त्यानिर्जितंवशीकृतं यश्चेतःतेन ॥ १६ ॥
औत्कंठेनअश्रुकलायुक्तेअक्षिणीयस्यतस्यमेहृदिआविर्बभूव ॥ प्रेमातिभरेणनिर्भिन्नपुलकांगः ॥

घोरंप्रतिभयाकारंव्यालोलूकशिवाजिरं ॥ परिश्रांतेंद्रियात्माहंतृट्परीतोबुभुक्षितः ॥ १४ ॥ स्नात्वा
पीत्वाह्रदेनद्याउपस्पृष्टोगतश्रमः ॥ तस्मिन्निर्मनुजेरण्येपिप्पलोपस्थआश्रितः ॥ १५ ॥ आत्मनात्मा
नमात्मस्थंयथाश्रुतमचिंतयं ॥ ध्यायतश्चरणांभोजंभावनिर्जितचेतसा ॥ १६ ॥ औत्कंठ्याश्रुकला
क्षस्यहृद्यासीन्मेशनैर्हरिः ॥ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः ॥ १७ ॥ आनंदसंप्लवेलीनोना
पश्यमुभयंमुने ॥ रूपंभगवतोयत्तन्मनःकांतंशुचापहं ॥ १८ ॥ अपश्यन्सहसोत्तस्थेवैक्लव्याद्दुर्मनाइव
दिदृक्षुस्तदहंभूयःप्रणिधायमनोहृदि ॥ १९ ॥ वीक्षमाणोपिनापश्यमवितृप्तइवातुरः ॥ एवंयतंतंविजनेमा
महागोचरोगिरा ॥ २० ॥ गंभीरश्लक्ष्णयावाचाशुचःप्रशमयन्निव ॥ हंतास्मिन्जन्मनिभवान्नमांद्र
ष्टुमिहार्हति ॥ २१ ॥ अविपक्वकषायाणांदुर्दर्शोहंकुयोगिनां ॥ २२ ॥
निर्वृतः ॥ १७ ॥ आनंदानांसंप्लवेमहापूरेपर
मानंदेअयंआत्मानंपरंच ॥ मनसाकांतंश्रीशंशुचंशोकं तदपहंतीतितथा ॥ १८ ॥ तत्तदूतस्यदृशितेउत्थितोस्मिहृ
दिमनःप्रणिधायस्थिरीकृत्य ॥ १९ ॥ अवितृप्तोहमातुरइवअभवमितिशेषः ॥ गिरामगोचरः संवेदनस्याविषयभूतःस्वे

न

भा० प्र० यक्रमेण: सर्वैर्हरिर्नेष्यांतितयन्मादिभिर्ब्रह्मलोकं गता अंतर्नयंति अहं विष्णोरनुग्रहात् ॥ अखंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च
२७ पर्येमि पर्यटामि ॥ क्वचिदपि अविघाता अप्रतिहता गतिर्यस्य सः ॥ ३२ ॥ ननु किमिति पर्येसि ॥ इत्यवाप्ता लोकमंगलार्थमित्याह
देवेनेश्वरेण दत्तां स्वराः निषादर्षभगांधारषड्जमध्यमधैवतपंचमाः इति सप्त त एव ब्रह्म ब्रह्मलाभिव्यंजकत्वात् ॥ तेन विभूषितां स्वतः
सिद्धसप्तस्वरामित्यर्थः मूर्छयित्वा मूर्छनालापवतीं कृत्वा ॥ ३३ ॥ स्वप्रयोजनमाह प्रगायत इति ॥ ३४ ॥ परप्रयोजनमाह ॥ एत ।
द्धि मात्रा विषयास्तेषां स्पर्शा भोगाः तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यत् ॥ एतदेव भवसिंधोः प्लवः

27 अंतर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३२ ॥ देवदत्तामिमां वी
णां स्वरब्रह्मविभूषितां ॥ मूर्छयित्वा हरिकथां गायमानश्चराम्यहं ॥ ३३ ॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ॥ आहू
त इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३४ ॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुव
र्णनं ॥ ३५ ॥ यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३६ ॥ सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्व
यानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥ ३७ ॥ सूत उवाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां
रणयन् ययौ यादृच्छिको मुनिः ॥ ३८ ॥ अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं ज
गत् ॥ ३९ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे नारदव्याससंवादे षष्ठोऽध्यायः ॥ ६ ॥

पीतः नैकत्र तिष्ठति प्रमाणेन किंच
त्वन्यथ यथा प्रतिस्कारं दृढ एवेत्यर्थः ॥ ३५ ॥ एतदेव व्यतिरेकमुखेन धारणामनुभवेन दृढयति ॥ यमादिभिस्तथा न शाम्यति यथा मुकुंदसेवयात्र
अद्धा साक्षादात्मा मनः उपशाम्यति कथं चात्मा मुकुंदसेवामात्रेण शाम्यति ॥ किं पुनस्तद्गुणवर्णनेनेति भावः ॥ भवतश्चात्मनः परितोषकं च आ
ख्यातं ॥ ३६ ॥ आमंत्र्य अनुज्ञाप्य यादृच्छिकः स्वप्रयोजनसंकल्परहितः हरिकथागायकभाग्यं श्लाघयति ॥ अहो इति ॥ मादयन् हृष्यन् तंत्र्या राम
२७

प्रयुज्यमाने मयि तामिति ॥ अयमर्थः । हे ब्रह्मविद्युमि मल्लोकं गंता भज्ञाननामसीति ॥ पा भागवती भगवत्पार्षदरूपा शुद्धा
सत्वमयी तनुः प्रतिश्रुता । तां प्रति भगवता मां पिप्रयुज्यमाने नीयमाने ॥ आरब्धं यत्कर्म तन्निर्वाणं समाप्तिर्यस्य स आरब्ध
कर्मणां निर्वाणं यस्य निर्वाणं यस्येति सः पंचभूतात्मको देहो न्यपतत् ॥ अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वंनि
त्यत्वमित्यादि सूचितं भवति ॥ २९ ॥ इदं त्रैलोक्यं आदाय उपसंहृत्य उदन्वतः एकार्णवस्यांभसि शयाने श्रीनारायणे ।

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुं ॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः ॥ २९ ॥
कल्पांत इदमादाय शयानेंभस्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेंतरहं विभोः ॥ ३० ॥
सहस्रयुगपर्यंते उत्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋषयः प्राणेभ्योहं च जज्ञिरे ॥ ३१ ॥

शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्मणः अंतः मध्यं ॥ अनुप्राणं निश्वासेन सह विविशे प्रविष्टोहं ततोऽवतीर्य विश्वा
मा देहमाविश्य चक्रिणः ॥ अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुनेति ॥ कूर्मोक्तेः ॥ स्वापेनंभसि इति पाठे । स्वा
पेन स्वस्य शयनेन अंभसि शिशयिषोर्ब्रह्मणः इति श्रीनारायणेनाभेदविवक्षया ज्ञातमिति गमयितव्यं ॥ प्राणेभ्यः इंद्रिये
भ्यः ॥ अहं मरीचिमिश्राः ॥ तत्पुरस्यांतःस्थश्च जज्ञिरे ॥ ३१ ॥

भा०प्र०
२८

अनर्थमुपशमयतीति योऽधोक्षजे साक्षाद्भक्तियोगस्तं चापश्यत् ॥ एतत्सर्वं स्वयं दृष्ट्वा ॥ एवमजानतो लोकस्यार्थे सात्वतसंहितां ॥ श्रीभागव
ताख्यां चक्रे ॥ तदनेन श्लोकत्रयेण भगवतार्थः ॥ संक्षेपतो दर्शितः ॥ एतदुक्तं भवति ॥ विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्व
रूपः ॥ सर्वज्ञः सर्वशक्तिरीश्वरः ॥ तन्मायया सम्मोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवः तस्य चेश्वरस्य भक्त्या लब्धज्ञानेन मोक्ष
इति ॥ तदुक्तं स्वामिना ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः ॥ स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः तथा ॥ स ईशो यद्वशे मा
या स जीवो यस्तयार्दितः ॥ स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः ॥ १ ॥ स्वादृगुत्थविपर्याससभवभेदजभीशुचः ॥ यन्मायया जुषन्ना

28

अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ॥ ६ ॥ यस्यां वै श्रूयमाणायां कृष्णे
परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसां शोकमोहभयापहा ॥ ७ ॥ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं ॥ शुकमध्यापया
मास निवृत्तिनिरतं मुनिः ॥ ८ ॥ शौनक उवाच ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः कस्य वा बृहतीमेतामात्मा
रामः समभ्यसत् ॥ ९ ॥ सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगु
णो हरिः ॥ १० ॥

स्ते तमिमं नृहरिं नम इत्यादि ॥ ६ ॥ संहितायाश्चानर्थोपशमकत्वं दर्शयति ॥ तस्यां श्रूयमाणायामेव किंपु
नः श्रुतायामित्यर्थः ॥ ७ ॥ अनुक्रम्य शोधयित्वा ॥ ८ ॥ कस्य वा हेतोर्महतीं विततां ॥ ९ ॥ निर्ग्रंथा ग्रंथेभ्यो निर्गताः ॥ तदुक्तं गीता
सु ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति ॥ यद्वा ग्रंथिरेव ग्रंथः ॥ निवृत्तहृद राम
यग्रंथय इत्यर्थः ॥ ननु मुक्तानां भक्त्यत्यादि ॥ सर्वाक्षेपपरिहारार्थमाह ॥ इत्थंभूतगुण इति ॥ १० ॥ राम ॥ राम ॥ २८

श्रिं

अथभागवतंश्रोतुंजन्मवक्तुंपरिज्ञातः ॥ सुप्तबालवधान्द्रौणेर्दंडःसमभूच्चोक्त ॥ १ ॥ तस्यनारदस्याभिप्रेतंश्रुतवान्स
न् ॥ १ ॥ ब्रह्मनद्यांब्रह्मदेवत्यायांब्राह्मणैरन्वितायांवा ॥ सत्रंकर्मवर्द्धयतीतितथा ॥ २ ॥ बदरीणांखंडेनसमूहेनमंडि
ते ॥ मनःप्रणिदध्यौस्थिरंचकार ॥ समाधिनानुस्मरेदितिनारदोपदिष्टंध्यानंकृतवानित्यर्थः ॥ ३ ॥ प्रणिहितेनिश्च
लेऽमलेहृदभक्तियोगेनामले ॥ पूर्वंप्रथमंपुरुषमीश्वरमपश्यत् ॥ पूर्णमितिचापाठः ॥ तदपाश्रयांईश्वराश्रयांतद

शौनकउवाच ॥ निर्गतेनारदेसूतभगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेतंततःकिमकरोद्विभुः ॥ १ ॥
सूतउवाच ॥ ब्रह्मनद्यांसरस्वत्यामाश्रमःपश्चिमेतटे ॥ शम्याप्रासइतिप्रोक्तऋषीणांसत्रवर्द्धनः ॥ २ ॥
तस्मिन्स्वआश्रमेव्यासोबदरीखंडमंडिते ॥ आसीनोपउपस्पृश्यप्रणिदध्यौमनःस्वयम् ॥ ३ ॥ भक्तियो
न गेनमनसिसम्यक्प्रणिहितेमले ॥ अपश्यत्पुरुषंपूर्वंमायांचतदपाश्रयां ॥ ४ ॥ ययासंमोहितोजीव रा
आत्मानंत्रिगुणात्मकं ॥ परोपिमनुतेनर्थंतत्कृतंचाभिपद्यते ॥ ५ ॥ ॥ ॥ ॥ रामराम

धीनांमायांचापश्यत् ॥ ४ ॥ इशमायाकृतांचजीवानांसंसृतिमपश्यदित्याह ॥ ययामोहितःस्वरूपावरणेनविक्षि
प्तः ॥ परोपिगुणत्रयाद्व्यतिरिक्तोपितत्कृतंत्रिगुणाभिमानकृतमनर्थंचकर्तृत्वादिकंप्राप्नोति ॥ ५ ॥ रामरामराम

भा.प्र. शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामि यत् यदा ब्रह्मबंधोः ब्राह्मणाधमस्य ॥ आततायिन इति ॥ अग्निदो गरदश्चैव शस्त्र
२८ पाणिर्धनापहः ॥ क्षेत्रदारहरश्चैव षडेते आततायिन इति स्मरणात् ॥ आततायी शस्त्रपाणिः ॥ तेन च पुत्रहंतृत्वं लक्ष्यते
गांडीवात् धनुषः मुक्तैर्विशिखैर्बाणैः रूपाहरे त्वत्समीपमानयामि ॥ यच्छिरः आक्रम्य आसनं विधाय दग्धपुत्रा सती ॥ १६ ॥ वल
गुभीरम्या विचित्रा जल्पाः भाषणानि तैः स अर्जुनः अच्युतः ॥ एव मित्रं सूतश्च यस्य दंशितः कृतकवचः उग्रं धनुः चापं यस्य
कपिर्हनूमान् ध्वजे यस्य सः ॥ गुरुपुत्रं रथेन अन्वाद्रवत् अन्वधावत् ॥ १७ ॥ आपतंतं अथोनुवंतं स द्रौणिः कुमारहा बाल
29 घाती उद्विग्नमनाः कंपितहृदयः प्राणपरीप्सुः प्राणान् लब्धुमिच्छुः ॥ न तु कीर्तिं यावद्गमं । वक्तुं शक्यं तावत् उर्व्यां प्राद्र

तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः ॥ गांडीवमुक्तैर्विशि रुपाहरे त्वाक्रम्य यत्स्नास्यसि खै।
दग्धपुत्रा ॥ १६ ॥ इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशित उग्रधन्वा कपिध्व
जो गुरुपुत्रं रथेन ॥ १७ ॥ तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरीप्सुरुर्व्यां याव
द्गमं रुद्रभयाद्यथार्कः ॥ १८ ॥

वत् ॥ अपलायत ॥ कः ब्रह्मा स्वयं भूत्वा सुतां अभिमुखं धावतः सन् रुद्रस्य भयात् ॥ यथा पला
यते स्म ॥ अर्क इति पाठे ॥ वामनपुराणे कथा सूचिता ॥ तथा हि ॥ विद्युन्माली कश्चिद्राक्षसः सोमाख्येश्वरः ॥ तस्मै रुद्रेण सौवर्णं विमानं
दत्तं ॥ ततो सौ अर्कस्य द्वेष्टा भ्रमन् ॥ विमानदीप्त्या रात्रिं विलोपितवान् ॥ ततो अर्केण निजते [illegible]
जो भिद्रावयित्वा तद्विमानं पातितं ॥ तच्छ्रुत्वा कुपितो रुद्रभयादर्कः ॥ पर्याद्रवत् ॥ अर्को रुद्रस्य क्रुद्धदृष्ट्या दंदह्यमानः पतन् राम २८
वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः ॥ १८ ॥

ननु भक्तिं कुर्वन्तु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह । हरेरिति । अध्यगात् अधीतवान् । विष्णुजनाः प्रिया यस्येति वा
व्याख्यानादिप्रसंगेन तत्संगतिकाम इति भावः । एतेन तु स पुत्रो महायोगी इत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं
तस्योत्तरमुक्तं ॥११॥ यदन्यत्पृष्टं परीक्षितः प्रायोपवेशनं श्रवणं कथमिति तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह । प
रीक्षित इति विलापनं मुक्तिं च संस्थां महाप्रस्थानं श्रीकृष्णकथानामुदयो यथा भवति तथा ॥१२॥ परीक्षितो जन्म निरू
पयिष्यंस्तद्धेतुभूतमश्वत्थाम्नो ब्रह्मास्त्रमोक्षणं वक्तुं कथाप्रस्तावमाह यदेत्यादिना । यदा द्रौणिरश्वत्थामा कृ
ष्णासुतानां द्रौपदीपुत्राणां शिरांसि उपाहरत् । तदा तन्माता तस्मादरुदत् तां सान्त्वयन् किरीटमाली अर्जुन आहेति तृतीयेनान्वयः । किमि

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः । अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥११॥ परीक्षितोऽथ राजर्षेर्जन्मक
र्मविलापनं । संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥१२॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु
वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥१३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि
उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति ॥१४॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्य
माना । तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली ॥१५॥

ति । बालानां शिरांस्यानीतवान् तत्र त्यये त्वामाह ।
मृधे युद्धे पाण्डवपक्षे कौरवाणां तथा सृञ्जयवंशजो धृष्टद्युम्नः पाण्डवानां सेनापतिरिति सृञ्जयानामित्युक्तं वीरगतिं स्वर्गं नि
धनं अथानन्तरं वृकोदरेणाविद्धायाः क्षिप्ताया गदाया अभिमर्शेन घातेन भग्नावूरुदण्डौ यस्य तथाभूते धृतराष्ट्रपुत्रे दुर्योधने सति
॥१३॥ भर्तुर्दुर्योधनस्यैतत्प्रियमिति वितर्कः । इति प्रियं पश्यन्नित्यादिना पश्यन् तस्य तद्विप्रियमेवेति वाक्यान्तरं विप्रियत्वे हेतुः जुगुप्सितमिति ॥१४॥
घोरं दुःसहं यथा भवति । बाष्पकलाभिर्बिन्दुभिराकुले अक्षिणी यस्याः सा किरीटस्य कन्चे पितृव्यः पिता वा तुल्यत्वात् । किरी

भा॰प्र॰ तथा चानेनावतारेण तव साधु पश्यमानो लक्ष्यत इत्याह तथेति किं भूभारहरणं मदिच्छामात्रेणैव भवति तत्र हस्त्वानां ज्ञानिनां भक्ता
३० नामनुध्यानाय च तथा अनन्यभावानामेकान्तभक्तानां च २५ एवं सकृत्वा प्रस्तुतं विज्ञापयति किमात्मकमिदं कुतो वा का
यातीति स्वित् वितर्के २६ इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगकुशलः इत्यर्थः
मातो मा तु उपसंहारं न वेद तत्त्वेत्त्वं वेत्स्य जानासि २७ प्रत्यव कर्षणं कृपालकं देनि वर्त्तकमित्यर्थः अतस्तदस्त्रतेजः उन्न
द्धं उत्कटं ब्रह्मास्त्रं तेजसो विजहि यातय त्वमद्युक्तं वा अस्त्रं तदुपसंहर्त्तुं स्वयमुपसाम्यति यतस्त्वमस्त्रज्ञोसि २८ परेस्त्र

30

तथा पश्चावतारस्ते भुवो भार जिहीर्षया स्वानां वानन्यभावानामनुध्यानाय चासकृत् २५ किं केदं स्वित् कु
तो वा तत् देवदेव न वेद्मि अहं सर्वतो मुखमायाति तेजः परमदारुणं २६ श्रीभगवानुवाच वेत्थैनं द्रोणपु
त्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वेद संहारं प्राणबाध उपस्थिते २७ न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यव
कर्षणं जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २८ सूत उवाच श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीर
श्री हा स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मायसंदधे २९ संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च
ववृधातेर्कवह्निवत् ३० दृष्ट्वास्त्रतेजस्तु तयोस्त्रीँल्लोकान् प्रदहन्महत् दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ३१ ८१

वस्तानिवी रास्तानिती तत्यापकात्गुनोर्जुनः अप स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्मास्त्रं ब्रह्मास्त्रेण निवर्त्तयितुं ।
२९ ततश्च अयो ब्रह्मास्त्रयोस्तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृधाते आवृत्य किं कृत्वा रोदसी द्यावापृथिव्यौ ख
मंतरिक्षं आवृत्य यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितो र्कश्च संहत्य वर्द्धेते तद्वत् ३० यतयो द्रौणि फाल्गुनयोः तेन दह्यमा

राम ३०

अशरणं रक्षकरहितं ॥ ननु पलायनमेव रक्षकं कस्मिन्न तस्यापि कुंठितत्वादित्याह ॥ श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरोस्त्रं ब्रह्मा-
स्त्रं १९ ॥ द्विजात्मज इत्यदीर्घदर्शितामाह ॥ तद्ब्रह्मास्त्रं समाहितः कृतध्यानः ॥ उपसंहारमजानन्नपि संधाने हेतुः प्राण-
कृच्छ्र इति ॥ २० ॥ ततः अस्त्रात् सर्वतोदिशं प्रादुःकृतं प्रकटीभूतं तेजः अभिप्रेक्ष्य ततः प्राणापदं चाभिप्रेक्ष्य ॥ २१ ॥ प्रस्तुतं
विज्ञापयितुं प्रथमं स्तोति त्रिभिः कृष्णेति चतुर्भिः संसृतेर्हेतोर्दह्यमानानां तस्यापवर्गो वै अपवर्जयिता नाशकस्त्वमेव ॥ २२

जि

यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः ॥ १९ ॥ अथोपस्पृ-
श्य सलिलं संदधे तत्समाहितः ॥ अजानन्नुपसंहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥ ततः प्रादुष्कृतं ते-
जः प्रचंडं सर्वतोदिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥ अर्जुन उवाच ॥ कृष्ण कृष्ण
माहाभाग भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोसि संसृतेः ॥ २२ ॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृ-
तेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥ स एव जीवलोकस्य मायामोहितचेत-
सः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणं ॥ २४ ॥

यतस्त्वमीश्वरः साक्षात्कुतः यतः प्रकृतेः परः पुरुषः तत्कु-
तः यतः आद्यः कारणं कारणत्वेप्यविकारितामाह मायां व्युदस्य अभिभूय कैवल्यरूपे आत्मन्येव स्थितः इति ॥ २३
त्रिवर्गदातापि त्वमेवेत्याह स एवेति ॥ यस्त्वं मायामभिभूय स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से

श्रीभागवत २४

भा०प्र० गोविंदप्रियःसारथिर्यस्य आत्मजान्शोचंत्यै ४१ तथापशुवद्बंधनेनआहृतंतमानीतंकर्मणाजुगुप्सितेनदोषेणअवाङ्मुखं अपकृतंअपका

३१ रिणं कृपयानिरीक्ष्यवामःशोभनःस्वभावोयस्याःसानननाम ४२ उवाचचेति चकाराभ्यांसंभ्रमःसूचितः बंधनेनानयनमसहमाना

४३ सरहस्यःगोप्यमंत्रसहितःविसर्गोऽस्त्रप्रयोगःउपसंयमःउपसंहारः ताभ्यांसहितोऽस्त्रसमूहश्च ४४ किंच तस्यद्रोणस्यात्मनोऽर्द्ध

हस्तसार्द्धं कृपीआस्ते अर्द्धत्वेहेतुःपत्नीअर्द्धांगिनी एषआत्मनोपत्यानिसंतीतिकृत्वानानुगमिष्यामीति ... अयोग्य

अथोपेत्यस्वशिबिरंगोविंदप्रियसारथिः न्यवेदयत्तंप्रियायैशोचंत्यैआत्मजान्हतान् ४१ तथाहृतंपशुवत्पा

शबद्धमवाङ्मुखंकर्मजुगुप्सितेन निरीक्ष्यकृष्णापकृतंगुरोःसुतंवामस्वभावाकृपयाननामच ४२ उवा

चचासहंत्यस्यबंधनानयनंसती मुच्यतांमुच्यतामेषब्राह्मणोनितरांगुरुः ४३ सरहस्योधनुर्वेदःसविस

र्गोपसंयमः अस्त्रग्रामश्चभवताशिक्षितोयदनुग्रहात् ४४ सएषभगवान्द्रोणःप्रजारूपेणवर्त्तते तस्या

त्मनोऽर्द्धंपत्न्यास्तेनान्वगाद्वीरसूःकृपी ४५ तद्धर्मज्ञमहाभागभवद्भिर्गौरवंकुलं वृजिनंनार्हतिप्राप्तुंपू

ज्यंवंद्यमभीक्ष्णशः ४६ मारोदीदस्यजननीगौतमीपतिदेवता यथाहंमृतवत्सार्त्तारोदिम्यश्रुमुखीमुहुः ४७

यैःकोपितंब्रह्मकुलंराजन्यैरजितात्मभिः तत्कुलंप्रदहत्याशुसानुबंधंशुचार्पितं ४८ ॥ ॥ ॥

कर्तृकत्वावगमाच्च ननुभर्त्तरिमृतेकथंसाजीवतीतितत्राह नान्वगाद्भर्त्तारं यतोवीरसूःपुत्रवती ४५ ततस्तस्माद्गौरवंगुरोःकुलं राम

भवद्भिःकर्तृभिर्वृजिनंदुःखंप्राप्तुंनार्हतिकिंतु पूज्यंवंद्यंच ४६ मृतवत्सामृतपुत्रा ४७ विपक्षेदोषमाह यैरितितैराजन्यैः ३१

नो न्यैःकुलंकर्म कथंभूतं सानुबंधंसपरिवारंशुचाशोकेनार्पितंव्याप्तंचब्रह्मकुलंकर्तृप्रदहति ४८ ॥ ॥रामरामराम॥

31

लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः वासुदेवस्य मतं चाप्यस्य ब्रह्मास्त्रद्वयमुपसंहृतवान् ।२। गौतमवंशजो गोतमीत्यस्मीतस्यासुतं श्रम।
णेणकौपेण नाम्न्यग्रण्णीयस्य सः निंकृपत्वे दृष्टांतः पशुमुर्यथेति ।२। तस्य वधनं धर्मस्तत्र दृष्टांतः यथा याज्ञिकः पशुमिति रसनपारव्या
।२३। आकर्णाद्विमुक्तस्याप्यर्जुनस्य धर्मनिष्ठा व्यायनाय श्लोकमवाचं ततदाह षड्भिः शिबिरायराजन्निवेशायेन तु भिद्यं तं प्रकुपित
इवेति ।२४। अनागसो निरपराधान् निवारपि सुप्रस्य बालस्य च वधो न धर्म इत्यन्यायं दर्शयति मत्तमसावादिना प्रमत्तं च नवहितं २५

प्रज्ञापराधं बालस्य लोकव्यतिकरं च तं । मतं च वासुदेवस्य संजहारार्जुनोऽस्त्रं ।२२। ततस्त्वासादयत्सहसा हं संगौ-
तमीसुतं ववंधामर्षताम्राक्षः पशुं रसनया यथा ।२३। शिबिराय निनीषंस्त्वावध्वारिपुंवलात् प्राहार्जुनं प्रकुपि- तं
तो भगवान्केशवस्तदा ।२४। मैनं पार्थ हिंसितुं त्वं बंधुमर्हसि जातु हि । यो सावनपराधान्सुप्तान्वधीन्निशि बाल-
कान् ।२५। मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं । प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ।२६। स्वप्राणान्यः
पर प्राणैः प्रपुष्णात्यघृणः खलः । तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ।२७। प्रतिश्रुतं हि भवता पांचाल्यै
त शृण्वतो मम । आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ।२८। तदसौ वध्यतां पाप आततायी आत्मबंधुहा । भ-
र्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ।२९। एवं परीक्षिता धर्मं पार्थः कृष्णेन नोदितः । नैच्छद्वधं गुरुसुतं यद्य-
प्यात्महनं महान् ।३०।

उन्मत्तं ग्रहवातादिना जडं अस्त्रानुद्यमं प्रपन्नं शरणागतं विरथं भग्नरथं ।२६। तद्वधो दंडरूपस्तस्यैव श्रेयः
कुतः पर्यंतोऽडप्रायश्चित्तरहितादोषात्स्मृतेः यथा पापानि तथा स्मृतिः राजभिर्धृतदंडास्तु कृत्वापापानि मानवाः विधूतक-
ल्मषा यांति स्वर्गं सुकृतिनो यथेति ।२७।२८।२९। यद्यपि नोदितः तथापि हंतुं नैच्छत् आत्महनं पुत्रहंतारं अपि यतो महान् ।४।

भा० प्र० वधार्हणः वधार्हः मयैव शास्त्रकर्त्रा ब्राह्मणो न हंतव्यः तथा आततायिनमायांतमपि वेदांतपारगं जिघांसंतं जिघां
३२ सीयान्न तेन ब्रह्महा भवेदिति वदता तदुभयमप्यनुशासनं परिपालय ५२ तच्च प्रतिज्ञां पूरयेत्याह प्रियां सांत्वय
ता त्वया यत्प्रतिश्रुतं हननं तच्च सत्यं कुरु मह्यं मम तत्र वधे भीमस्य प्रियं भवति अवधे द्रौपद्याः इत्यस्यैकस्य ५४

32

श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः । मयैवोभयमाम्नातं परिपाह्यनुशासनं ५३
कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां । प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च ५४ सूत उवाच ॥
अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना । मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजं ५५ विमुच्य रशनाब
द्धं बालहत्याहतप्रभं । तेजसा मणिना हीनं शिबिरान्निरयापयत् ५६ वपनं द्रविणादानं स्थानान्निर्यापण
वधो णं तथा । एष हि ब्रह्मबंधूनां नान्योस्ति दैहिकः ५७ पुत्रशोकातुराः सर्वे पांडवाः सहकृष्णया । स्वानां मृ
तानां यत्कृत्यं चक्रुर्निर्हरणादिकं ५८ इति श्रीभागवते महापुराणे प्रथमस्कंधे सप्तमोध्यायः ॥७॥ ॥

हार्दं अभिप्रायं आज्ञाय ज्ञात्वा नम्रस्य कायमुभयं विदध्यात् अतो यमभिप्राय इति ज्ञात्वेत्यर्थः असिना खड्गेन मू
र्धन्यं मूर्ध्नि मूर्ध्नि जातं सहमूर्धजं सकेशं ५५ मणिना च हीनं निरयापयत् निःसारितवान् ५६ अनेन श्लोके
नोक्तं सर्वं संपादितमित्याह वपनमिति निर्हरणं दाहार्थं नयनं ५८ इति प्रथमे सप्तमः ॥७॥ रामराम ॥ रा०
२

धर्म्यमित्यादेर्यो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः ॥ तत्र धर्म्यं धर्मादनपेतं मुच्यतां मुच्यतामिति न्याय्यं
न्यायादनपेतं सरहस्यं इत्यादि स्वकरणं तस्यात्मनोऽर्थे मिति निर्व्यलीकं तत्कर्म श्रेति ॥ समं मा रोदीदिति दुःखसा
म्योक्तेः महद्यः कोपितमिति निष्ठुरोक्त्या हिताद्युपदेशात् ॥ एवंभूतं राज्ञ्याः वचः हे द्विजाः प्रत्यनंदत् ॥ अनुमो

सूत उवाच ॥ धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् ॥ राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ४९
नकुलः सहदेवश्च युयुधानो धनंजयः ॥ भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० तत्राहामर्षि
तो भीमस्तस्य श्रेयान्वधः स्मृतः ॥ न भर्तुर्नात्मनश्चार्थे योऽहन्सुप्तान्शिशून्वृथा ॥ ५१ निशम्य भी
मगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ राम राम राम

दितवान् ॥ ४९ ॥ नकुलादयश्च प्रत्यनंदन् ॥ युयुधानः सात्यकिः ॥ ५० ॥ तस्य तथाविधस्य द्रोणार्वधः एव श्रेयः ॥ १
अन्यथा स्यन् रकपात ॥ प्रसंगात् ॥ न वा हन् भर्तुरिति ॥ अहन् जघान ॥ ५१ ॥ चतुर्भुजोऽकिरयं भावभीमेन एनं हंतु
प्रवृत्तो द्रौपद्या च सहसा तन्निवारणे प्रवृत्तायामुभयोः संवारणाय आविःकृत चतुर्भुज इति संदिहन् सख्युरर्जुन ॥ ५२

मां दहतु गर्भो मा निपात्यतां ३ न १

भा॰प्र॰ उत्तरा श्रीकृष्णं प्रार्थयते पाहीपाहीति द्वाभ्यां अन्यस्त्वत्प्रार्थनायोग्यो नास्तीत्याह त्वत् त्वत्तः अन्यं अभयं भयरहितं न पश्यामि यत्र लोके
३३ परस्परं मृत्युर्भवति ९ तत्र प्रस्तुतं भयमावेदयति अभिद्रवतीति अभिमुखमायाति तप्तमायसं लोहमयं शल्यं यस्य सः अतिका
र्पण्यमाह काममिति कामं पतेयं १० परां भवेनातिकुपितस्य द्रौणेः अपाण्डवं पाण्डवशून्यं इदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्य
त ११ अत एव बहुमुखं तदागतमित्याह तर्ह्येवं ब्रह्मास्त्रस्याऽस्त्रान्तरैरनिवर्त्यत्वात् १२ तत्तु दुःपरिहरं व्यसनं वीक्ष्य अनन्य

33 पाहि पाहि महायोगिन्देवदेव जगत्पते नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ९ अभिद्रवति मामीश शरस्तप्तायसो
विभो कामं दहतु मां नाथ मा मे गर्भो निपात्यतां १० सूत उवाच उपधार्य वचस्तस्या भगवान्भक्तवत्सलः अ
पांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ११ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् आत्मनोऽभिमुखान्दीप्तानाल
क्ष्यास्त्राण्युपाददुः १२ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः १३ अं
तस्थः सर्वभूतानामात्मा योगेश्वरो हरिः स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे १४ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं
चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह १५ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते य इदं मायया
देव्या सृजत्यवति हंत्यजः १६

विषयः आत्मा येषां स्वैकनिष्ठानामित्यर्थः १३ वैराट्या उत्तरायाः अंतस्थः सन् गर्भं आवृतवा
न् तत्र हेतुः यतः आत्मा अंतर्यामी योगेश्वर इति बहिस्थस्यापि प्रवेशघटनार्थमुक्तं कुरूणां तंतवे संतानाय पांडवानामपि
कुरुवंशजत्वात् एवमुक्तं १४ अमोघं अप्रतिक्रियं च समशाम्यत् प्रशांतमासीत् १५ एत. छ्रुत्वा स्वरक्षामन्यथा आश्चर्यं मा मंस्थाः

श्रीरामः
३३

ग्रष्टमे कुंपितो द्रोणेरस्त्राद्युत्तापरीक्षितः श्रीकृष्णेन रक्षितः कुंत्या राज्ञः शोकश्च कीर्त्यते १ ते पांडवाः संपरेतानां मृतानां गंगायामु
दकं दातुं सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः पुरस्कृत्य ग्रयुः कृत्वा तस्मिन् कार्ये स्त्रीपुरःसरत्वविधानात् १ निनीयदत्त्वा
त्वा हरिपादाब्जरजोभिः पूतायाः सरितः गंगायास्तस्याः जले पुनर्ग्रहणात् आदावपि स्नाता इति गम्यते २ कुरुपतिं युधि

लगं सूत उवाच॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः १ ते निनीयोदकं
सर्वे विलप्य च भृशं पुनः आप्लुता हरिपादाब्जरजःपूतसरिज्जले २ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहा
नुजं गांधारीं पुत्रशोकार्त्तां पृथां कृष्णां च माधवः ३ सांत्वयामास मुनिभिर्हतबंधून् शुचार्पितान् भूते धू
षु कालस्य गतिं दर्शयन्नप्रतिक्रियां ४ साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं घातयित्वा
सतो राज्ञः कचस्पर्शक्षतायुषः ५ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः
पावनं दिक्षु शतमन्योरिवातनोत् ६ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः द्वैपायनादिभिर्विप्रै
ःपूजितैः प्रतिपूजितः ७ गंतुं कृतमतिर्ब्रह्मन् द्वारकां रथमास्थितः उपलेभेभिधावंतीमुत्तरां भयविह्वलां ८

ष्ठिरं सहानुजं भीमादिभिः सहितं ३ मुनिभिः सहितः ४ कितवैर्धूर्तैः दुर्योधनादिभिः द्रौपद्याः कचग्रहणादिना क्षतं न
ष्टमायुर्येषां तान् ५ याजयित्वेत्यादिभ्याम् विकथासंक्षेपः शतमन्योः शतक्रतोरिव ६ शैनेयः शिनेर्नप्ता सात्यकिस्तेन
चोद्धवेन च संयुतः ७ रथमास्थितः सन् ७ उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीं उपलेभे ददर्श ८ ८ ८

तत्कृतोपकारानन्नुस्मरति यथेति द्वाभ्यां अयमर्थः मातुलोपि मय्यधिकात्वयीति हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया
विमोचिता अहं च तथैव किं मोचितेति का का महान् विशेषस्ततः तं दर्शयति सा त्विति चिरं रुद्धा सती तस्मादेव सकृद्विमो
चिता तथाहं शुचार्पिता सती च तस्याः पुत्रा रक्षिताः अमितचान्येनाथस्तस्याः अहं तु विपद्गणात् तत्रापि मुहुः शीघ्रं च सा
त्मजा च त्वयैव नाथेनेति २३ विपद्गणमेव दर्शयति विषदानं भीमस्य विषमोदकदानात् महाग्ने जतुगृहदाहात् पुरुषादा

हिडंबादयो राक्षसाः तेषां दर्शनात् असत्सभायाः द्यूतस्थानात् अभितो रक्षिताः अस्मा अभवाम २४ यत्प्राप्तु विपत्सु की

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता विमोचिताहं च सहात्मजा विभो त्वयैव नाथेन
मुहुर्विपद्गणात् २३ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः मृधे मृधेनेकमहार
थास्त्रतो द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः २४ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भव
दर्शनं २५ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २६ नमोकिंच
नवित्ताय निवृत्तगुणवृत्तये आत्मारामाय शांताय कैवल्यपतये नमः २७

दृशं दर्शनं नास्ति पुनरपि भवदर्शनं
यस्मात् २५ संपदस्तु श्रेयः परिपंथिन्य इत्याह जन्मेति कुलं जन्मादिभिरेधमानो मदो यस्य सः अभिधातुं आह्वातुं गोविंदेति
वक्तुमपि अकिंचनानां गोचरं विषयभूतं २६ अतस्तं मनोरथपूरणाय प्रणमति अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै
ततः किं निवृत्ता गुणवृत्तयो धर्मार्थकामविषया यस्मात्तस्मै अतएव आत्मारामाय शांताय रागादिरहिताय किंच कैवल्यदातुं सम

कृष्णयासह ७ त्वात्वांनमस्येनमस्करोमि कनिष्ठाहंकथंनमस्करोमीतितत्राह आद्यंपुरुषं कुतः प्रकृतेः परं ततःकुतः
ईश्वरंप्रकृतेरपिनियंतारं अतएवसर्वभूतानामंतर्बहिश्चपूर्णत्वेनावस्थितंतथाप्यलक्ष्यं १८ तत्रहेतुः मायैवजवनि
कातिरस्करिणीतयाआच्छन्नं अतोहमज्ञा भक्तियोगानभिज्ञाकेवलंनमस्यामि अधः अक्षजंज्ञानंयस्मात्तं अव्य
त्ति यंअपरिच्छिन्नंतत्त्वएवंतुमूढदृशादेहाभिमानिनापुंसात्वंनलक्ष्यसे यथानटः १९ किंच परमहंसानामात्माना
त्मविवेकिनां ततोमुनीनांमननशीलानामपिततश्चामलात्मनांनिवृत्तरागादीनामपितथातेननिजमहिम्नानल

ब्रह्मतेजोविनिर्मुक्तैरात्मजैःसहकृष्णया प्रयाणाभिमुखंकृष्णमिदमाहपृथासती ७ कुंत्युवाच नमस्ये
पुरुषंत्वाद्यमीश्वरंप्रकृतेःपरं अलक्ष्यंसर्वभूतानामंतर्बहिरवस्थितं १८ मायाजवनिकाच्छन्नमज्ञा
धोक्षजमव्ययं नलक्ष्यसेमूढदृशानटोनाट्यधरोयथा १९ तथापरमहंसानांमुनीनाममलात्मनां
भक्तियोगविधानार्थंकथंपश्येमहिस्त्रियः २० कृष्णायवासुदेवायदेवकीनंदनायच नंदगोपकु
मारायगोविंदायनमोनमः २१ नमःपंकजनाभायनमःपंकजमालिने नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २२

क्ष्यसे अतोभक्तियोगंविधातुंत्वांवयंस्त्रियः कथंहिपश्येम यदापरमहंसानामपिभक्तियोगविधानार्थंत्वंआत्मारामा
णामपिअचिंत्यनिजगुणेरस्मान्भक्तियोगंकारयितुमवतीर्णमित्य [illegible] र्थः २० अतोभक्तियोगा
शक्यत्वमुक्त्वापुनःकेवलंनमस्करोति कृष्णायेतिद्वाभ्यां २१ पंकजंनाभौयस्यपंकजानांमालास्तियस्यपंकज
नेत्रेयस्य पंकजांकितावंघ्रीयस्यतस्मै २२

भा०पु०
३५

35

अतएवजगन्मोहनतयादुर्ज्ञेयत्वात्तवजन्मादिवहुधावर्णयंतीत्याह केचिदितित्रिचतुर्भिः पुण्यश्लोकस्यप्रियस्ययुधिष्ठिरस्यकीर्त्त
यइतियदोरेवकीर्त्तये इतिवा मलयस्यकीर्त्तयेयथाचंदनं ३२ तथावसुदेवस्यदेवक्यांभार्यायांअजएवत्वमभ्यगात्
पुत्रत्वमितिशेषः प्रथमपुरुषस्त्वार्षः अजस्त्वमितिपाठः सुगमः ताभ्यांपूर्वंसुतपसा पृश्निसुतपाभ्यांयाचितः सन् अस्यजग
तःक्षेमाय ३३ आत्मभुवेतिब्रह्मप्रार्थनस्यप्राधान्यविवक्षयामतांतरं ३४ परमानंदस्वरूपाज्ञानम्अविद्यातत्तोदेहाद्यभिमा
नात्कामःततःकर्माणितैःक्लिश्यमानानांतन्निवृत्तयेश्रवणाद्यर्हाणिकरिष्यन् ३५ अस्यपक्षस्यसिद्धांतत्वमभिप्रेत्यश्रवणा

केचिदाहुरजंजातंपुण्यश्लोकस्यकीर्त्तये यदोःप्रियस्यान्ववायेमलयस्येवचंदनं ३२ अपरेवसुदेवस्यदेवक्यां
याचितोभ्यगात् अजस्त्वमस्यक्षेमायवधायचसुरद्विषां ३३ भारावतारणायान्येभुवोनावइवोदधौ सीदंत्याभू
रिभारेणजातोह्यात्मभुवार्थितः ३४ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः श्रवणस्मरणार्हाणिकरि
ष्यन्नितिकेचन ३५ शृण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः तएवपश्यंत्यचिरेणताव
कंभवप्रवाहोपरमंपदांबुजं ३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः येषांनचा
न्यद्भवतःपदांबुजात्परायणंराजसुयोजितांहसां ३७

दिफलमाह शृण्वंतीति नंदंति अन्यैःकीर्त्यमानमभिनंद
तियेजनाः ईहितंचरितंतावकंत्वदीयंपदांबुजंतएवपश्यंत्यचिरेणैवेतिचशब्दएवशब्दश्चावधारणेकीदृशं भवप्रवाहस्यजन्मम
रणपरंपराया उपरमोयस्मिन्तत् ३६ इदानींतत्रास्मत्त्यागोनुचितइत्याशयेनाह अपीतिचतुर्भिः हेप्रभोसुहृदोनुजीविनःअतो
स्माननुअपिस्वित्किंस्वित् त्वंजिहाससित्यक्तुमिच्छसियेषामस्माकमन्यत्परायणंनैवास्ति कुतः राजसुयोजितमंहोदुःखंयैः तेषांत्वानांकृतसौ

ननुदेवकीपुत्रंमांकथमेवंस्तौषितत्राह मन्येत्वांकालंनतुदेवकीपुत्रंतत्रहेतवः ईशानंनियंतारं अनादिनिधनंआद्यंतशून्यंविभुं
प्रभुंसमंयथाभवतितथासर्वत्रचरंतं ननुपार्थसारथेः कथंममसाम्यं यः तत्त्वत्तोनिमित्तभूतात् भूतानामेवमिथःकलिः क
लहोभवति ननुस्वतस्त्व [illegible] पिवैषम्यं २८ ननुनिग्रहानुग्रहरूपंमपिप्रसिद्धंवैषम्यं अतआह नवेदेति नृणांविडंबन
मनुकरणमीहमानस्यकुर्वतो यस्मिन्स्त्वयिविषमामतिरनुग्रहनिग्रहरूपाभवति २९ अजस्यजन्मअकर्तुः कर्मतिर्यक्षुव

मन्येत्वांकालमीशानमनादिनिधनंविभुं समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः २८ नवेदकश्चिद्भगवंश्चिकी
र्षितंतवेहमानस्यनृणांविडंबनं नयस्यकश्चिद्दयितोस्तिकर्हिचित् द्वेष्यश्चयस्मिन्विषमामतिर्नृणां २९
जन्मकर्मचविश्वात्मन् अजस्याकर्तुरात्मनः तिर्यङ्नृषिषुयादस्सुतदत्यंतविडंबनं ३० गोप्याददेत्वयिकृ
तागसिदामतावद्यातेदशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रंनिनीयभयभावनयास्थितस्यसामांविमोहयतिभीरपियद्बिभेति ३१

राहादिरूपेणनृषुरामादिरूपेणऋषिषुवामनादिरूपेणयादस्सुमत्स्यादिरूपेण ३० अरविडंबनमत्याश्चर्यमित्याह गोपीय
सादात्वयिकृतागसिदधिभांडस्फोटनंकृतवतियावत्दामरज्जुंआददेतत्राह तावत्क्षणमेव तेयादशाश्रुनस्यामां
विमोहयतिकिंभूतस्यअश्रुभिःकलिलंव्याप्तं अंजनंययोस्तेचतेसंभ्रमेव्याकुलेअक्षिणीयस्मिंस्तद्वक्त्रंनिनीयअ
धःकृत्वाताडयिष्यतीति भयस्यभावनयास्थितस्य यतोयतःत्वत्तःभीरपिस्वयंबिभेतितस्यैतद्दशा ३१ रामराम ॥

भा॰ प्र॰ एवमभ्यर्थ्य पुनः प्रणमति श्रीकृष्णेति नमः॥ उपकारानसुस्मरंती बहुधा संबोधयति कृष्णसख कृष्णार्जुनस्य सखे वृष्णीनां ऋषभश्रेष्ठ
३६ अवनेर्भूमेर्ध्रुहो ये राजन्याः तेषां वंशस्य दहन एवमप्यनपवर्गवीर्य अक्षीणप्रभाव गोविंद प्राप्तकामधेन्वैश्वर्य गोद्विजसुराणामा
र्तिहरावतारो यस्येति ४४ कलानि मधुराणि पदानि येषु तैर्वाक्यैः परि णूतोऽखिलउदयो महिमा यस्य सः पुत्रशुनाविस्मयात्परि
णुतोऽखिलत्वेपि दीर्घचंद्रेहमोघेन मंदमभिमतस्य हासमेव मायावदर्पयति हि हांसो जनोन्मादकरी च मायेति ४५ तयपि मेऽनन्यवि
षया मतिरिति यत्प्रार्थितं तद्दास्यामीति अंगीकृत्य रथस्थानात् गजाह्वयमागत्य पृथ्यान्नो अन्याश्च सुभद्राप्रमुखाः स्त्रियऽपामंत्र्य ऽनु

36

[illegible] श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनि
रु ध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ४४
सूत उवाच॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः मंदं जहास वैकुंठो मोहयन्निव मायया ४५ तां बाढमि
त्युपामंत्र्य प्रविश्य गजसाह्वयं स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ४६ व्यासाद्यैरीश्वरेहाज्ञैः कृष्णे
नाद्भुतकर्मणा प्रबोधितोऽपीतिहासैर्नाबुध्यत शुचार्पितः ४७

ज्ञा पप स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णा स्नेहेन वा
कंचित्कालं निवसेति संप्रार्थ्य निवारितः ४६ अथ भीष्मनिर्याणे स्तवं वक्तुं उपोद्घातकथां प्रस्तौति व्यासाद्यैः प्रबोधितोपि
शुचाव्याप्तः सन्नाबुध्यत विवेकं न प्राप्त कुतः ईश्वरेहाया ऽज्ञैः कथं भीष्मनिर्याणे महाभवाय राज्ञा सह कुरुक्षेत्रं गंतव्यं
न्मुखेनैवायं प्रबोधनीय इति ईश्वराभिप्रायस्तमजानद्भिरित्यर्थः श्रीकृष्णेनापि प्रबोधितोनाबुध्यत तत्र हेतुः अद्भुतकर्मणा यथा
कुरुपांडवसंधानार्थं गतोपि यथोचितमेव वदन्नपि विग्रहमेव दृढीकृतवान् एवमत्रापि प्रबोधयन् अबोधमेव दृढीचकारेत्यर्थः ४७

ननु तव बंधवो यादवाः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्यमेवं भाषसे अत आह केवयमिति यर्हि भवतोदर्शनं य
दा त्वमस्मान्न पश्यसि तदा नाम्ना अभिख्यात्या रूपेण समृध्या च यदुभिः सहिता पांडवा नाम के वयं न के अपि अतितुच्छ इत्यर्थः
हृषीकाणामीशितुर्जीवस्यादर्शने यथा नाम किंचिन्नाम स्वरूपं च तद्वत् किंच यथेदानीमियमस्मत्पाल्या भूमिः स्वा
साधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैः त्वत्पदैः अंकिता सती भाति तथा त्वयि निर्गते सति न शोभिष्यते

केवयं नामरूपाभ्यां यदुभिः सह पांडवाः भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ३८ नेयं शोभिष्यते तत्र यथेदानीं मि
गदाधर त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ३९ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः वना
द्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः ४० अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे स्नेहपाशमिमं छिंधि
दृढं पांडुषु वृष्णिषु ४१ त्वयि मेनन्यविषया मतिर्मधुपतेसकृत् रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ४२

अपिच इमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः संतः ४० गमने पांडवानामकुशलमगमने च यादवानामिति उभयतो व्याकु
लचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति विश्वेशेत्यादिसंबोधनानि स्नेहच्छेदसामर्थ्यख्यापनाय दृढं संतं ४१ त
ततः किमतः आह त्वयीति अनन्यविषया सती मम मतिः रतिमुद्वहतात् अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः ओघं पूरं
यथा गंगा प्रतिबंधमगणयित्वा एवं मतिरपि विघ्नान्नगणयत्विति भावः ४२ ॥

किंच युद्धे पुंसां वधो भवतु नाम धर्मः स्त्रीणां तु मया हतानां यद्वा यासां तासां योऽसौ द्रोहो ह्युद्दिष्टः सुप्रसिद्धः तं व्यपोहितुं अपाकर्तुं कल्पः
समर्थो नाहं गृहमेधीयैर्गृहाश्रमविहितैः ५२ ननु च सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य एवं वेदेति श्रू
ते पापमश्वमेधेन नश्यतीत्याशंक्याविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति यथा घनपंकेन पंकांभो न मृज्यते यथा वा
सुरालेशकृतमप्यशस्तं पवित्रं च सुरया न मृज्यते तथैव भूतहत्यामेकामप्रमादतो जातां बुद्धिपूर्वं हिंसाप्राये यज्ञे मा शोधयितुं

स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ५२ यथा पंकेन पंकांभः सु
रया वा सुराकृतं भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ५३ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरा
नुतापो नामाष्टमोऽध्यायः ॥ सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ततो विनशनं प्रागाद्यत्र देव
व्रतोऽपतत् १ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा २ भगवा
नपि विप्रर्षे रथेन सधनंजयः स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ३ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं प्रण
मुः पांडवा भीष्मं सानुगाः सह चक्रिणा ४ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम राजर्षयश्च तत्रासन् द्रष्टुं भरतपुंगवं ५

नार्हतीति ५३ इति प्रथमेऽष्टमः ॥८॥ युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं कृष्णस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते १ य
दर्थं तस्याविवेकः श्रीकृष्णेन संवर्धितस्तं दर्शयति इतीति सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः १

अबोधमेवप्रपंचयति ॥ प्राकृतेन अविवेकग्रस्तेन आत्मना चित्तेन हे विप्राः ४८ ॥ पारक्यस्य श्वसृगालाद्याहारस्य देहस्यार्थे मया
अक्षौहिणी अक्षौहिण्यः ॥ अक्षौहिणीप्रमाणं व्यासेनोक्तं ॥ अक्षौहिणीप्रसंख्याया रथानां द्विजसत्तमाः संख्या गणितत्त्वज्ञैः
सहस्राण्येकविंशतिः ॥ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ॥ गजानां च प्रसंख्यानमेतदेव प्रकीर्तितं ॥ ज्ञेयं शतसहस्रं तु स
हस्राणि नवैव तु ॥ नराणामपि पंचाशच्छतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां शतानि च दशोत्तराणि षट्

आह राजा धर्मसुतश्चिंतयन्सुहृदां वधं ॥ प्राकृतेनात्मना विप्राः अहो मोहवशं गतः ४८ ॥ अहो मे पश्यताऽज्ञानं हृ
दि रूढं दुरात्मनः ॥ पारक्यस्यैव देहस्य बह्व्यो मे ऽक्षौहिणीर्हताः ४९ ॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे ।
स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ५० ॥ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम् ॥ इति मे न तु बोधाय कल्पते
शासनं वचः ५१ ॥

प्राहुः संख्यातत्त्वविदो जनाः ॥ एतामक्षौहिणीं प्राहुर्यथावदिह संख्यया इति ४९ ॥ बाला अभिमन्युलक्ष्मणादयः द्विजा द्रोणाद
यः सुहृदो धृष्टद्युम्नप्रभृतयः मित्राणि विराट्प्रभृतीनि पितरो भीष्मबाह्लीकादयः भ्रातरो दुर्योधनादयः गुरवो द्रुपदादयः
एतान्द्रुह्यतीति द्रुहः ॥ टीकांतरं सुहृदः संबंधिनः मित्राणि सखायः पितरः पितृव्याः ५० ॥ द्विषां वध एनः पापं न भवतीति य
द्धर्मशासनसिद्धांतरूपं वचः तु तेन कल्पते यतस्तच्च प्रजाभर्तुरेव अयं भावः स्वप्रजानामन्येन बाधे प्रसक्ते तद्वधोनुज्ञातः दु
र्योधनेन तु प्रजायां पाल्यमानायां मया केवलं राज्यलोभेन हतत्वात् ॥ पापमेवेदमिति ५१ ॥ ॥ राम ॥

भा॰प्र॰ कालकृतंत्वत्कृतशोकंवारयति सर्वमितिद्वाभ्यां भवतामपि यदप्रियंयस्यवशेवर्त्ती १४ अहोदुर्घटमेतत् इत्याह
३८ यत्रेति कृष्णोऽर्जुनः अस्त्रीधन्वीततः तत्रापिविपत्दुःखं पुण्यचारित्वलप्रस्तेनपुण्यपदत्वसंपत्तावपीत्यर्थः १५
ननुकृष्णःकथंकालोतिकोवेदित्यपदायामाह नह्यस्यश्रीकृष्णस्यसत्यंयत्त्वानिर्दिशति विधित्सितंस्याविजिज्ञा
कवयोमुह्यन्ति १ सया १६ दैवतंत्रमीश्वराधीनंव्यवस्यनिश्चित्यतस्येश्वरस्यानुविहितः अनुवर्तीसन्कर्तारिकः इनाथ्यकुलप

सर्वंकालकृतंमन्येभवतांचयदप्रियं सपालोयद्वशेलोकोवायोरिवघनावलिः १४ यत्रधर्मसुतोराजा
गदापाणिर्वृकोदरः कृष्णोऽस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत् १५ नह्यस्यकर्हिचिद्रा जन्पुमान्वे
38 दविधित्सितं यद्विजिज्ञासयायुक्तामुह्यंतिकवयोपिहि १६ तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ तस्यानु
विहितोऽनाथानाथपाहिप्रजाःप्रभो १७ एषवैभगवान्साक्षादाद्योनारायणःपुमान् मोहयन्माययाः
द्रा
लोकंगूढश्चरतिवृष्णिषु १८

रंपरागतस्वामिन्प्रभोसमर्थः अनाथाःप्रजापाहि १७ अनुविधेयःपर राम
मेश्वरःसएवश्रीकृष्णएवेत्याह एषएवभगवान्सर्वेश्वरःयतः आद्यःपुमान्तत्त्वयतोनारायणःसाक्षात् १८ ३८

रेणुकासुतः परशुरामः ६ । ७ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ८ वसूत्तमो भीष्मः ९ हृदिस्थं संतं पुरतः आसीनं पूज
यामास १० उपासीनान् समीप उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संगतान् उपसन्नान् पाठांतरे ताभ्यामवनतान्
अभ्याचष्ट अभ्यभाषत अनुरागास्रैः स्नेहाश्रुभिः अंधीभूतेन चक्षुषा उपलक्षितः ददर्शेति वा ११ अभिभाषणमाह अ

पर्वतो नारदो धौम्यो भगवान्बादरायणः बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ६ वसिष्ठ इंद्रप्रमदस्त्रितो गृ
त्समदोसितः कक्षीवान्गौतमो त्रिश्च कौशिकोथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोमलाः
शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ८ तान्समेतान्महाभागानुपलभ्य वसूत्तमः पूजयामास ध
र्मज्ञो देशकालविभागवित् ९ कृष्णं च तत्प्रभावज्ञः आसीनं जगदीश्वरं हृदिस्थं पूजयामास मायायो
पात्तविग्रहं १० पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ११
अहो कष्टमहो न्याय्यं यद्यूयं धर्मनंदनाः जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः संस्थितेतिरथे पांडौ १२
पृथा बालप्रजा वधूः युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः १३ ॥ राम राम ॥

हो इति एकादशभिः हे धर्मनंदनाः क्लिष्टं यथा भवति एवं जीवितुं नार्हथ एतद्दहो कष्टं जुगुप्सितं अहो अन्याय्यं चैतत् य
तो यूयं विप्रा धर्मो अच्युतश्च आश्रया येषां ते १२ किं च संस्थिते मृते बालप्रजाः यस्याः सा वधूः अत्र ते दैन्यं दर्शितं तोकान्यपत्या

भा० प्र० ततस्तस्यानुकंपवाक्यमाकर्ण्य २५ पुरुषस्वभावेन विहितान्न रजातिसाधारणान्वर्णयामासेति तृतीयेनान्वयः यथावर्णं वर्णो
३९ धर्मान् य[illegible]थाश्रमं धर्मांश्चैव राग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् २६ पुनस्तानेव
१ विशेषमाह दानेति मोक्षधर्मान्शमदमादीन्भगवद्धर्मान्हरितोषणान् दास्यादिनियमरूपान् समासव्यासौ संक्षेपविस्तरौ

[illegible]युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां २५ पुरु
षस्वभावविहितान् यथावर्णं यथाश्रमं वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् २६ दानधर्मान्राज
धर्मान्मोक्षधर्मान्विभागशः स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः २७ धर्मार्थकाममोक्षांश्च सहोपा
यान्यथा मुने नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् २८ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो
योगिनः छंदमृत्योर्वांछितस्तूत्तरायणः २९ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे कृष्णे ल
सत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ३०

तावेयोगो उपायौ तत्र ताभ्यां २७ धर्मादीश्च उपायाधिका
रं प्रतिनियतोपायसहितान् यथायथावत् नानाख्यानेषु येतिहासास्तेषु यथा संजितथा वर्णयामास २८ छंदेन
इच्छया मृत्युर्यस्य २९ सहस्रणी युद्धसमीपस्थान् सहस्रं रथिनो नयति पालयति सहस्रणीर्भीष्मः सहस्रिणी
रितिपाठे सहस्रार्थवती गिरः लसंतौ पीतौ पटौ यस्य तस्मिन्अमीलितदृगेव मनो व्यधारयत् ३० ३० राम
३९

तदुपपादयति अस्यानुभावं १९ त्वंमज्ञानात् यं मन्यसे मातुलेयं देवक्याः सुतं प्रियं प्रीतिविषयं मि
त्रं प्रीतिकर्तारं सुहृत्तममुपकारानपेक्षोपकारं च सौहृदात विश्वासात् अकरोः कृतवानसि सचिवं मंत्रिणं २०
नन्वीश्वरस्य तत्कथं नीचसारथ्यादौ प्रवृत्तिः तत्राह सर्वेति तत्कृतं नीचोच्चकर्मकृतं ममध्यास्तमयोऽस्तमितिवै
षम्यं क्वचिदपि नास्ति कुतः निरवद्यस्य रागादिशून्यस्य तत्कुतः अनहंकृतेः तत्कुतः अद्वयस्य तदपि कुतः समदृशः

अस्यानुभावं भगवान्वेद गुह्यतमं शिवः देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप १९ यं मन्यसे मातुले
यं प्रियं मित्रं सुहृत्तमं अकरोः सचिवं दूतं सौहृदादथ सारथिं २० सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः
तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् २१ तथाप्येकान्तभक्तेषु पश्य भूपानुकंपितं यन्मेऽसूंस्त्यजतः
साक्षात्कृष्णो दर्शनमागतः २२ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् त्यजन्कलेवरं योगी
मुच्यते कामकर्मभिः २३ स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं प्रसन्नहासारुणलो
चनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः २४

तत्रापि हेतुः सर्वस्यात्मनः यथेष्टं चाह न तु हेतुमद्भावः २१ तथापि सम
त्वेपि हे भूप अनुकंपितं अनुकंपां २२ इदानीं देहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां २३ यावदिति विलं
बं द्योतयति अहं हिनोमि त्यजामीति यावत् इदमित्यनामात्वं तत् प्रसन्नहासेन अरुणलोचनाभ्यां उल्लसत् मुखांबु
जं यस्य ध्यानस्य पंथा विषयः योगिभिश्चिंत्यते केवलं सोऽयं स्थितः सन् मां प्रतीक्षतामित्यर्थः २४ ॥ २४

यतो मे प्राणांस्त्यजतः साक्षात्स्वयमेव वनत्विं मादिरूपे रोत्यर्थः ४३

भा०पु० विजयसखित्वमेवानुवर्णयन्रतिं प्रार्थयते युधीति तुरगाणां खुररजःकरगरजस्तेन विधूम्रा धूसरा इति विष्वच् इतस्ततश्चलंतः
४० कचाः कुंतला तैर्लुलितं विकीर्णं श्रमवारि स्वेदविंदूरूपं तेन भक्तवत्सल्यं द्योतितं केनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे मम आ
त्मा मनो अस्तु रमतामित्यर्थः पुनः किंभूते मदीयैर्निशितैः तीक्ष्णैः शरैर्विभिद्यमाना त्वग्यस्य शरीरे एव विलसत्कवचं यस्य त
स्मिन् ३४ किंच सपदीति सेनयोरुभयोर्मध्ये रथं स्थापयस्वेत्युक्त यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् इति स
खुरर्जुनस्य वचनं निशम्य सपदि तत्क्षणमेव स्वपरबलयोः सेनयोर्मध्ये स्थितया पार्थसखेरति स्तत्र स्थित्वाकृतंमरखंद

युधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ममनिशितशरैर्विभिद्यमानत्वचिविलसत्कव
चेऽस्तु कृष्ण आत्मा ३४ सपदिसखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य स्थितवति परसैनि
कायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ३५ व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबु दे
द्ध्या कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ३६

शेयतिपरस्य दुर्योधनस्य सैनिकानां आयुरक्ष्णा
कालदृष्ट्या हृतवति असौ भीष्मः असौ द्रोणः असौ कर्णः इति तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराहृत्यार्जुनस्य जयं
कृतवति ३५ न केवलमर्जुनस्य सपत्न्यायुर्हरणेनैव जयमावहत् किंत्वविद्याहरणेनापीत्याह व्यवहितादूरे स्थिता
या पृतना तस्या मुखमिव मुखं अग्रे स्थितान् भीष्मादीन्निरीक्ष्य इत्यर्थः स्वजनवधाद्विमुखस्य निवृत्तस्य तदुक्तं गीतासु ए राम
वमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य सशरं चापं शोकसंविग्नमानसः इति कुमतिः अहं हंता इत्यादि कुबुद्धिं ३६ ४०

4.0

अनेन विशुद्धया धारणया हतमशुभं यस्य सः तस्य श्रीकृष्णस्य ईक्षया कृपादृष्ट्यैव गतः आयुधश्रमो यस्य सः अत एव नि
वृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमः विविधं भ्रमणं यस्मात् सः जन्यं देहं ३१ परमफलरूपं श्रीकृष्णरतिं प्रार्थयितुं प्रथमं सुकृतम
र्पयति इति तेन नानाधर्माद्युपायैर्मतिर्मनो धारणालक्षणा उपकल्पिता समर्पिता कस्मै सात्वतानां पुंगवे श्रेष्ठे भगवति वि
तृष्णा निःकामा अविततृष्णेति वा छेदः अवितृष्णेत्यर्थः विगतो भूमा यस्मात् तस्मिन् परमेश्वरादन्यत्र महत्त्वं नास्तीत्यर्थः तदे

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधश्रमः निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं सृजञ् वि
जनार्दनं ३१ भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि स्वसुख
मुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ३२ त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधा
क ने वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ३३

तदैश्वर्यमाह स्वसुखं स्वरूपभूतं परमानन्दं मुपगते प्राप्त एव क्वचित् कदाचित् विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतव
ति न तु स्वरूपतिरोधानेन जीववत् पारतंत्र्यमित्यर्थः विहर्तुमित्युक्तं प्रपंचयति यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भव
ति ३२ इदानीं श्रीमूर्त्तिवर्णनपूर्वकं रतिं प्रार्थयते त्रिभुवनकमनं त्रिलोक्यामेककमनीयं तत् वपुर्दधाने रतिरस्तु तमाल
वन्नीलो वर्णो यस्य तत् प्रातःकालीनरवेः करा इव स्वच्छं एवं गौरं पीतं वरं निर्मलं अंबरं यस्मिन् तत् अलककुलैरुपर्यावृतमान
नाब्जं यस्मिन् तत् विजयसखे पार्थसारथौ अनवद्याहेतुकी फलाभिसंधिरहिता रतिरस्तु ३३ ॥ ३३

भा॰प्र॰ स्वधर्मेणानुध्यमानाः तत्स्वरूपं प्रापुरित्येतन्नचित्रं यतो मदांधा अपि प्रापुरित्याह ललितगतिश्च विलसश्च रासादिः मंजुगम्या

४१ दिभिः आत्मीयैस्तदीयैर्वा कल्पितः उरुर्मानः पूजा यासां ताः अत उक्तं तेन मदेनांधाः अत एव तदेकचित्तत्वेन तस्य कृतं

मे गोवर्द्धनोद्धरणादिकं अनुकृतवत्यो गोपवध्वो यस्य प्रकृतिं स्वरूपं अगन् अगमन् प्राप्ताः मकारलोपस्त्वार्षः कि

४० लप्रसिद्धं तस्मिन्मम मतिरस्त्विति पूर्वेणैवान्वयः जगत्पूज्यतामनुस्मरन्नाह मुनिगणनृपवर्यैश्च संकुलेऽन्तःसदसि

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः कृतमनुकृतवत्य उन्मदांधाः प्रकृति

मगन्किल यस्य गोपवध्वः ४० मुनिगणनृपवर्य्यसंकुलेंऽतःसदसि युधिष्ठिरराजसूय एषां अर्हणमुप

पेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ४१ तमिममहमजं शरीरभाजां हृदिहृदि धिष्ठितमात्मकलि

तानां प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोह ४२ ॥ ॥ रामराम

सभामध्ये युधिष्ठिरस्य राजसूये एषां मुनिगणादीनां ईक्षणीयः अर्हणं पूजामुपपेद प्राप एव माश्चर्य्येण विलोकनीयः स

न् उपपेदे प्राप एष जगतामात्मा मम दृष्टिगोचरः दृष्टिविषयः सन् आविः प्रकटो वर्तते अहो भाग्यमिति भावः ४१

सोऽहं कृतार्थोस्मीत्याह तमिममजं सम्यगधिगतः प्राप्तोस्मि सम्यगहमित्याह विधूतभेदः तदर्थं भेदस्यौपाधिकत्वमाह आ

त्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदिहृदि प्रतिहृदयं धिष्ठितं अधिष्ठितं अकारलोपस्त्वार्षः नैकधाधि राम

ष्ठानभेदादनेकधा भांतमित्यर्थः अत्र दृष्टांतः सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्कं अनेकधा प्रतीतमिवेति ४२ ४२ ४१

41

ममतु महान्तमनुग्रहं कृतवानित्याह द्वाभ्यां स्वनिगमं अशस्त्र एवाहं साह्यमात्रं करिष्यामीत्येवंरूपां स्वप्रतिज्ञां हित्वा भीष्मः शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञामृतं सत्यं यथा भवति तथाधिकमधिकं कर्तुं रथस्थः सन्नवप्लुतः सहसैवावतीर्णः अवप्लुतः सन् योऽभ्ययात् अभिमुखमधावत् इभं हन्तुं हरिः सिंह इव किंभूतः धृतं रथचरणं चक्रं येन सः तथा च संरम्भेण मनुष्यनाट्यविस्मृतरूपस्य सर्वभूतस्य भुवनभारेण प्रतिपदं चलन्ती गौः पृथ्वी यस्मात्तेनैव संरम्भेण पथि गतं पतितमुत्तरीयं वस्त्रं यस्य स मुकुन्दो मे गतिर्भवतूत्तरेणान्वयः ३७ एवं पदाभ्यां धावतोऽस्मयमानस्याततायिनो मे शितैस्तीक्ष्णैर्विशिखैर्हतस्यातो विसी

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरी

यः ३७ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे प्रसभमभिससार मद्वधार्थं स भवतु मे २

भगवान् गतिर्मुकुन्दः ३८ विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये भगवति रतिरस्तु मे मु

मूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ३९

र्णो दंशो विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतः व्याप्तः सन् प्रसभं बलात्त्वरयेत मर्जुनमतिक्रम्य मद्वधार्थमभिससार अभिजगाम एवं यो लोकप्रतीत्यार्जुनपक्षपाती लक्षितः वस्तुतस्तु मय्येव अनुग्रहं कृतवान् यत्तम मम भक्तेन उक्तं वचः मा व्यर्थमस्त्विति स भगवान्मे गतिर्भवत्वित्यर्थः ३८ तदेवमन्यायेऽपि भक्तारक्षा [illegible] गेऽस्मिन् रतिमाशास्ते विजयोऽर्जुनः तस्य रथ एव कुटुम्बं अवश्यं परिरक्षणीयं यस्य तस्मिन् आत्ततोत्रे प्रतोदो येन तस्मिन् धृता [illegible] हयानां रश्मयः प्रग्रहा येन तस्मिन् [illegible] शोभादिभिः [illegible] तच्छ्रिया तया सारथ्यश्रिया ईक्षणीये शोभमाने मुमूर्षोर्मम निमित्तेन नन्वन्यायवर्तिनि किमिति रतिः प्रार्थ्यते [illegible] भगवति अचिन्त्यैश्वर्ये नेदानीं दृष्टपु

भा०प्र० राज्यश्रीकुलस्यप्रीतिंपर्यालोच्यप्रवृत्तइत्यासर्येनोत्तरमाह वंशंकुरोः संरोहयित्वापरीक्षिद्रक्षणेनसंरोहस्यांकुरितंकृत्वा क
४२ थंभूतं वंशदवाग्निनिर्हृतंवंशएवयोर्दहनंतस्माद्भूतः कोपरूपोग्निस्तेननिर्हृतंदग्धंनिजराज्येनिवेश्यच २ पदंतोदेतुमु
क्तोकिमकार्षीदित्यस्योत्तरमाह निशम्येति प्रवृत्तंयत्विज्ञानंपरमेश्वराधीनंजगन्नस्वतंत्रमित्येवंभूततेनविधूतोविभ्रमो
ऽहंकर्तेत्येवंरूपोमोहोयस्यसः अनुजैरनुवर्तितःसेवितःसन्अजितः श्रीकृष्णएवआश्रयोयस्यसःपरिधिः समुद्रः तत्पर्यं

सूतउवाच वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः निवेशयित्वानिजराज्यईश्वरोयुधि
ष्ठिरंप्रीतमनाबभूवह २ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः शशासगामिंद्रइवा
जिताश्रयःपरिध्युपांतामनुजानुवर्तितः ३ कामंववर्षपर्जन्यःसर्वकामदुघामही सिषिचुःस्मव्रजान्गा
वःपयसोधस्वतीर्मुदा ४ नद्यःसमुद्रागिरयःसवनस्पतिवीरुधः फलंत्योषधयःसर्वाःकाममन्वृतुतस्यवै
५ नाधयोव्याधयःक्लेशादैवभूतात्महेतवः अजातशत्रावभवन्जंतूनांराज्ञिकर्हिचित् ६ उषित्वाहास्तिन
पुरेमासान्कतिपयान्हरिः सुहृदांचविशोकायस्वसुश्चप्रियकाम्यया ७

तंगांपृथ्वींपालयामास ३ तस्यरामनुवर्ण ऊ
यतिकाममितित्रिभिः महीसर्वकामदेत्यध्रुवीबभूवव्रजान् गोष्ठान् ऊधस्वती ऊधस्वत्यः ऊधःक्षीराशयः स्थूलोयासांत्य राम
र्थः सिषिचुःअभ्यषिंचन् ४ अन्वृतुऋतावृतौ ५ आधयोमनोव्यथाव्याधयोरोगाःक्लेशाःशीतोष्णादिकृतादैवंचभूतानि ४२
च आत्माचदेहस्तुयेषांतआधिदैविकादीनांतेजंतूनांनाभवन् ६ इदानींद्वारकागमनंनिरूपयितुमाह उषित्वेतिस्वसुःसुभद्रायाः ७

42

मनोवाक्दृष्टीनांवृत्तिभिः परमात्मनिजीवंकृत्वांतरेवलीनःश्वासोयस्यसः ४३ निःकलेनिरुपाधौसंपद्यमानेमिलितेसत्या ज्ञात्वाआलक्ष्य ४४ देवेमानेवेश्ववादित्ताः राज्ञांमध्येसाधवः अनसूयवः ४४ निर्हरणानिसंस्कारादीनिसम्यक्परेतस्यमृतस्यापीत्यर्थः ४६ ४७ पितरंधृतराष्ट्रं तपस्विनींसंतापवतीं ४८ राजायुधिष्ठिरः ४८ इतिप्रथमेनवमः

श्रीसूतउवाच॥ कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्यसोंतःश्वासउपारमत् ४३ संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिःकले सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये ४४ तत्रदुंदुभयोनेदुर्देवमानववादित्ताः शशंसुःसाधवोराज्ञांखात्पेतुःपुष्पवृष्टयः ४५ तस्यनिर्हरणादीनिसंपरेतस्यभार्गव युधिष्ठिरःकारयित्वामुहूर्तंदुःखितोभवत् ४६ तुष्टुवुर्मुनयोहृष्टाःकृष्णंतद्गुह्यनामभिः ततस्तेकृष्णहृदयाःस्वाश्रमान्प्रययुःपुनः ४७ ततोयुधिष्ठिरोगत्वासहकृष्णोगजाह्वयं पितरंसांत्वयामासगांधारींचतपस्विनीं ४८ पित्राचानुमतोराजावासुदेवानुमोदितः चकारराज्यंधर्मेणपितृपैतामहंविभुः ४९ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेनवमोध्यायः॥९॥ शौनकउवाच॥ हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः सहानुजैःप्रत्यवरुद्धभोजनःकथंप्रवृत्तःकिमकारषीत्ततः १

दशमेकृतकार्यस्यहरेस्तेनापुरात्तोहरेः स्त्रिभिःसंस्तूयमानस्यद्वारकागमः १ राज्यंचकारेत्युक्तेतन्नघटतेत्याशयेनाहस्वरिक्थस्पृधःस्वीयधनेस्पर्धतेस्मयेतेतथा यद्वा स्वरिक्थायस्पृधःस्पर्धसंग्रामोयेषांअतएवधनादिहरणादाततायिनः तान्हत्वाप्रत्यवरुद्ध

क

भा.प्र.
५५

प्रेमव्रीडास्मितपूर्वैर्मीक्षणैः सांता॥ १६ गुडाका निद्रा तस्या ईशो जितनिद्रोऽर्जुनः॥ १७ व्यजनेन चामरेण जगद्गुरुः मधुपतिः श्रीकृष्णः १८ सत्यं श्रीकृष्णे ताः सामर्थ्याभिचारात् किं तु स्वरूपस्यानुरूपस्य निर्गुणस्य परमानंदस्य सुखाभवे सादये नानुरूपा गुणात्मनो मायाबंधनावतारे स्वरूपाश्रयो १९ सर्वासां श्रुतीनां मनोहरः उपनिषदां प्रसूतिमत्याः तैः संजल्पमपनर्दन्निति पर्याः २० तत्रैतज्जसौंदर्यातिशयेन विस्मिताभ्यः सखीभ्योऽन्याः स्त्रियः कथयंती नात्र विस्मयः कार्यः साद्या

प्रसादशिखरारूढाः कुरुनार्यो दिदृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः॥ १६ सितातपत्रं जग्राह मुक्तादामविभूषितं रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह १७ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि १८ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः १९ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः
२० स्त्रिय ऊचुः॥ स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु २१

ईश्वरत्वादस्येति स्त्रियाः प्रतिचतुर्भिः वै स्मरणे किलेति प्रसिद्ध्या प्रमाणद्योतकं य एक एवाद्वितीयः पुरुष आसीत् सर्वस्यायं श्रीकृष्णः कुत्रासीत् अविशेषे आत्मनि निष्प्रपंचे निजस्वरूपे कदा अग्रे गुणेभ्यः गुणक्षोभात्पूर्वं तथा निशि प्रलये च तस्य लक्षणं जगदात्मनि जीवे निमीलितात्मनि तिलु सुप्तशक्त्यंतर्य दं जातावेकवचनं ईश्वरे लीनत्वेऽपि जीवे सुप्तस्थित्यर्थः ननु जीवानां ब्रह्मत्वात्कथं लयस्तत्राह सुप्तासु शक्तिषु स

43

२४

राम
ध

तंयुधिष्ठिरं ८ पृथुसुः धृतराष्ट्रो द्वैपायंजातः गौतमः कृपः यमौ नकुलसहदेवौ ९ अन्याश्चस्त्रियः मत्स्यसुता उत्तरा त
स्याः पुनः ग्रहांगमरस्तकः कर्मविरहमोहाधिक्यात् यद्वा मत्स्यसुता सत्यवती १० तेषां कर्मविरहासहनं केसुत्यकन्या
येनाह सत्संगादिति द्वाभ्यां सज्जानां संगाद्धितेभ्यः पुत्रादिविषयाद्दुःसंगाद्येन सः सद्भिः कीर्त्यमानं रुचिकरं यस्य यशः सहृ
दयाकर्णां सत्संगात् कुनर शक्नोति ११ दर्शनादीम तस्मिन् स्त्रीकल्मन्यतश्च अयस्ताधार्यिबांते १२ अत एव अनिमिषैर्ने
त्रामंत्र्य चाप्यनुज्ञातः परिष्वज्याभिवाद्य ते आरुरोह रथं केचित् परिरथं केचिदभिवादितः ८ सुभद्रा द्रौपदी
कुंती विराटतनयान्यया गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्य
सुतादयः नसेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमा
नं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथं दर्शनस्पर्शना लाप श
यनासनभोजनैः १२ सर्वे तेनिमिषैरक्षैस्तमनुद्रुतचेतसः वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह १३
न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः १४ मृदंगशंख
भेर्यश्च वीणापणवगोमुखाः धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा १५
यनाद्यर्थं चलं तिस्र यत्र स्नेहेन समनवद्धा एवं तं अनुगताः विचेलुः सियत्त्रांते १५ वैक्लब्यमेवाह उद्गलद्बाष्पमाणस्त्रवत्तत्राहेणान
औत्कंठ्यात् वेताः उज्जलनश्चवाष्पं अश्रूणि संरुंधन्ने नेत्रेषु वर्तमानं निरुंधन् तत्र हेतुः अभद्रं नस्यात् अमंगलमाभूदित्यतदर्थं १५ २५

भा० प्र० पुण्यश्लोकतमाहुः हे सखियो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैः अनुगीतसत्कथः अन्वनुगीतासत्कथा य
५४ स्य स एवायं गानप्रकारमाहुः य एक ईश इत्यादि २४ एवंभूतस्य नानावतारे कारणमाहुः यदा हीति तमोव्याप्ता धीर्येषां ते
नृपा अधर्मेण जीवंति केवलं प्राणान् पुष्णंति तत्र तदा एष एव स्वभावस्थितेः सत्त्वतः विशुद्धसत्त्वेन रूपाणि दधत् भ
गादीनि धत्ते प्रकटयति युगे युगे तत्तदवसरे भगं ऐश्वर्यं सत्यं सत्यप्रतिज्ञत्वं ऋतं यथार्थोपदेशित्वं दयां भक्तकृपां यशः

स्वान्त्वयं स्मयनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्य
स त्ति न तत्र सज्जते २४ यदा स धर्मेण तमोधियो नृपा जीवंति तत्रैष हि सत्त्वतः किल धत्ते भगं सत्यमृतं
44 दयां यशो भवाय रूपाणि दधद्युगे युगे २५ अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं म
धोर्वनं यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चंक्रमणेन चांचति २६ राम राम राम

अद्भुतकर्मत्वं २५ विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयंति अहो इति द्वयं च भिः यद्यस्मात् एष पुरुषोत्तमः
श्रियः पतिः स्वजन्मना यदोः कुलं अंचयति पूजयति सत्करोति अतः श्लाघ्यतमं तत् चंक्रमणेन च मधोर्वनं म राम
थुरां सत्करोति अतस्तत् पुण्यतममिति तमर्थं स्थाप्यत्वं तत्प्रतिषेध्येत्यलमिति तत्रापार्थं येत्र अहो अलमुक्तम् २६ ५४

तं देवं सृष्टेरादौ प्रलयानंतरं चनिः प्रपंचावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये सप्रपंचावस्थानमाहुः स एव अप्रच्युत
स्वरूपस्थितिरेव प्रकृतिं अनुससार अधिष्ठितवान् भूयः पुनः सृष्टिप्रवाहस्यानादित्वात् कीदृशीं निजवीर्यचोदि
तां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायां मोहिनीं । अत एव सिसृक्षंतीं स्रष्टुमिच्छंतीं । किमर्थमनुससार
अनामरूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् उपाधिसंबंधीभूतानां भोगायेत्यर्थः कर्माणि च विधातुं वेदानू
कृतवान् इत्याहुः शास्त्रकृदिति २२ अस्य दर्शनमतिदुर्लभं मम स्वामिनस्त्वमित्याहुः स वै अयं यस्य पदं स्वरूपं अत्र ध्रुवा निजि

स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीं । अनामरूपात्मनि रूपनामनी विधित्समा
नोनुससार शास्त्रकृत् २२ स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः पश्यंति भक्त्यु
न त्कलितामलात्मना नन्वेष सत्वं परिमार्ष्टुमर्हति ॥ २३ ॥

र्जितो मातरिश्वा प्राणो यैः ईदृशाः सूरय एव पश्यंति ते
केन भक्त्या उत्कलितः उत्कंठितो मलापायः आत्मा बुद्धिस्तेन दृश्यते त्वग्र्यया बुद्ध्येति श्रुतेः बुद्धिवैमल्यस्यापि
यं भक्तिहेतुरित्याहुः नन्विति एष एव सत्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति नन्वयोगाद्य इत्यर्थः य
द्वा नु अहो एष सत्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमेन नार्पयितुं भक्तिं नार्हति किंत्वनेन सह वर्तत इत्यर्थः २३

भा॰प्र॰ ४५ एवंविधाः विचित्रा गिरः सस्मितेन निरीक्षणेनाभिनंदन् सह ययौ ॥ ३१ ॥ मधुद्विषो गोपीथाय रक्षणाय स्नेहात् परेभ्यः श
त्रुभ्यः शंकितः सन् प्रायुंक्त हस्त्यश्वरथपादातसेनांगस्यादि चतुर्विधमित्येवं चतुरंगिणीं पृतनां सेनां पांडवः कुरुवंशजत्वात् पांडवा अ
पि कौरवा एव तान् प्रियैः उद्धवादिभिः सह ॥ ३३ ॥ कुरुक्षेत्रं कुरुदेशांतर्गतमेव क्रमोन्नतविवक्षितः ॥ ३४ ॥ मरुः निर्जलदेशः धन्वो स्वल्पो
दकः आनर्तान् द्वारकादेशान् विभुः उपागात् प्राप्तः ईषन्मनाक् ईषत् श्रांतवाहा यस्य सः ॥ ३५ ॥ तत्र तत्र देशे तत्रत्यैर्जनैः प्र

एवंविधा गदंतीनां स गिरः पुरयोषितां निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ३१ ॥ अजातशत्रुः पृतनां गो
पीथाय मधुद्विषः परेभ्यः शंकितः स्नेहात् प्रायुंक्त चतुरंगिणीं ॥ ३२ ॥ अथ दूरागतान् शौरिः कौरवान् विरहातुरान्
संनिवर्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥ ३३ ॥ कुरुजांगलपंचालान् शूरसेनान् सयामुनान् ब्रह्मावर्तं कुरुक्षे
त्रं मत्स्यान् सारस्वतानथ ॥ ३४ ॥ मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् आनर्तान् भार्गवोपागाच्छ्रांतवाहो मनाग्वि
भुः ॥ ३५ ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः सायं भेजे दिशं पश्चाद् गविष्ठो गां गतस्तदा ॥ ३६ ॥ ॥ ॥
इति श्रीभागवते महापुराणे प्रथमस्कंधे श्रीकृष्णद्वारकाप्रवेशनं नाम दशमोऽध्यायः ॥ १० ॥ रामरामराम

त्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्मै सः सायं समये अपरस्मिन् पश्चात् दिशं पश्चिमां देशं भेजे प्राप्तः तदा गविष्टः स्वर्गस्थः सूर्यः
गां उदकं गतः अस्तं गत इत्यर्थः अथवा एवं प्रातः उदेत्यापः सायं प्रविशतीति श्रुतेः यद्वा तदा सायंकाले जाते रथादवतीर्य गवि
ष्ठः भूमौ स्थितः ततः गां जलाशयं गतः सन् पश्चात् दिशं संध्यां भेजे उपासितवानित्यर्थः ॥ ३६ ॥ ॥ इति प्रथमे दशमः ॥ १० ॥ ॥ राम ४५

45

अहोवतइत्याम्यंर्पंकिंतत् कुशस्थलीद्वारकास्वर्गउत्कृष्टइतियशस्तत्तिरस्करीपरिभव कर्तृभुवश्चपुण्ययशःकर्त्रीभवति
यतयतःपत्रत्याःसर्वाःप्रजाःस्वानुग्रहेणइषितंप्रेषितंस्मितपूर्वावलोकं यद्वा अनुग्रहार्थमिषितंइष्टंस्वस्यात्मनःपतिंश्री
कृष्णंनतुपित्रादिवद्देहमात्रपतिं नित्यंपश्यंतिस्म अभितमितिपाठे स्वानुग्रहार्थमुषितंकृतनिवासंतेनतत्स्वर्गोस्तीत्यर्थः २७
हेसखि अस्यगृहीतपाणिभिःपत्नीभिःईश्वरोयमेवनूनंजन्मांतरेषुसमर्चितः यस्मिन्अधरामृतेआसयश्चित्तंयासांताःसं
मोहंप्रापुःइतिमनोहरत्वमुक्तं २८ एतत्त्रयंचर्यातियाशतिकाभ्यां वीर्यप्रभावएवशुल्कं मूल्यंतेनशुष्मिणःबलिष्ठान्प्रद्युम्न

अहोवतस्वर्गयशस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंस्वपतिंस्म
यत्प्रजाः २७ नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः पिबंतियाःसख्यधरामृतंमुहुर्व्र
जस्त्रियःसंमुमुहुर्यदाशयाः २८ यावीर्यशुल्केनहृतास्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः प्रद्युम्न
शांबांबसुतादयोपरायाश्चाहृताभौमवधेसहस्रशः २९ एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंवतसा
धुकुर्वते यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्याहृतिभिर्हृदिस्पृशन् ३०

अशांवश्चअंबश्चसुतायासां
रुक्मिणीजांबवती [illegible] नाग्न जी तीनांताआदिर्यासांस
त्यभामादीनांताश्चयाआयपराःअस्यश्लोकस्योत्तरश्लोकेनान्वयः २९ एताःस्त्रीत्वमेवपरंकेवलंसाधुशोभनंकुर्वते अपा
स्तपेशलंभद्रत्वंतंचयस्मान्निरस्तशौचंशुचित्वंयस्मात्तद्यास्मृतमपिजातुकदाचित्ऽपनोपैतिननिर्गच्छति आहृतिभिर्वि
हारैःयद्वा परंजानादिप्रियत्वाहरणैः हृदिस्पृशन्आनंदयन् ३० ॥ ॥ रामराम राम॥

इति योऽन्वयः यदा हे अम्बुजाक्ष अस्मान्त्यक्त्वा अपससार अपहाय गतवान्कुरून्हस्तिनापुरं ३ +

भा०प्र० कृतार्थतामेवाहुः अहो भवता वयं सनाथाः स्म यद्यस्मात्तव रूपं पश्येम त्रैविष्टपानामपि दूरे दर्शनं यस्य देवानामपि दुर्लभमित्यर्थः प्रेम्णा यत्स्मि-
४६ तं तद्युक्तं स्निग्धं निरीक्षणं यस्मिन् तदाननं यस्मिंस्तद्रूपं सर्वेषु चांगेषु सौभगं यस्मिंस्तत् अंकाद्वसकरुणभाङ् यर्हि यदा भो अम्बुजाक्ष भवा- ८
न्पुरं मधून्मथुरां वा तत्र तदा रविं विनाक्ष्णोर्यथा एवं तव नः त्वदीयानामस्माकमित्यर्थः ८ न केवलमदर्शनेऽस्माकमान्ध्यं कि-
न्तु जीवनमपि दुर्लभमित्याहुः कथमिति प्रपन्नानां नः अस्माकं योऽखिलस्तापस्तस्य शोषणं निःशेषं त्वां प्रपन्नानां तस्मात्सम्भवत् १० इति च

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ८ यर्ह्यं-
बुजाक्षापससार भो भवान्कुरून्मधून्वाथ सुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत
९ कथं वयं नाथ चिरोषिते त्वयि प्रपन्नतस्माखिलतापशोषणं जीवेम ते सुंदरहासशोभितं अपश्यमाना वदनं मनोहरं १०
इति चोदीरिता वाचः प्रजानां भक्तवत्सलः शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ११ मधुभोजदशार्हार्हकुकुरांधक-
वृष्णिभिः आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव १२ सर्वर्तुसर्वविभवैः पुण्यवृक्षलताश्रमैः उद्यानोपवनारामैर्वृत-
पद्माकरश्रियं १३ उदीरिताः अन्योन्यमुच्चारिता वाचः शृण्वन् दृष्ट्या सस्मितेनावलोकनेनानुग्रहं कुर्वन् द्वारकां प्राविशत्

१२ ११ तां स्तौति पंचभिः तुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षितां सर्वेषु ऋतुषु सर्वे विभवाः पुष्पादिसंपदो येषां तैः पुण्यवृक्षाः लताश्रमाः लता-
मंडपाश्रयेषु तैः उद्यानादिभिर्वृताः ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां तां उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं आरा- राम
मः क्रीडार्थं वनं १३ ४६

46

आनर्त्तेष्वायमानस्य पुरीं निर्विशय वंधुभिः एकादशे रीतिः सम्यग्यादवेंद्रस्य वर्ण्यते १ उत्सवैस्स्खलत्पौरमुदंचद्ध्वज तोरणं
उत्सवद्दलद्दीपालिस्वपुरं प्रभुराविशत् २ स्वृद्धान्समृद्धान् दरवरं पांचजन्यशंखं दध्मौ वादितवान् १ दरः शंखः दध्मायमा
नः अतिशयेन भगवता आपूर्यमाणः उच्चकाशे शुशुभे इत्यन्वयः कथंभूतः धवलमुदरं यस्य सः धवलोदरः उरुक्रमः कृ
ष्णस्तस्याधरशोणेन रागेण शोणा अरुणा यस्य अधरशोणशोणिमा स्वार्थे इमनिच् करकंजे करकमलयोः संपुटे मध्ये वर्त्तमानः कथं
स्वं शुशुभे अब्जखंडे कमलसमूहे कलहंसो राजहंसः उच्चकाशे यथा तद्वत् २ जगतां यद्भयं तस्य भयावहं प्रत्युद्ययुः प्रत्युजग्मुर्भर्तुर्दर्श

सूत उवाच॥ आनर्त्तान्स उपव्रज्य स्वृद्धाञ्जनपदान्स्वकान् दध्मौ दरवरं तेषां विषादं शमयन्निव १ स उच्चका
शे धवलोदरो दरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः २
तमुपश्रुत्य निनदं जगद्भयभयावहं प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ३ तत्रोपनीतबलयो रवेर्दीपमिवा
दृताः आत्मारामं पूर्णकामं निजलाभेन नित्यदा ४ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा पितरं सर्वसु
हृदमवितारमिवार्भकाः ५ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरेंद्रवंदितं परायणं क्षेममिहेच्छ
तां परं न यत्र कालः प्रभवेत्परः प्रभुः ६ भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता त्वं सद्गु
रुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ७

नलालसा औत्सुक्ययुक्ताः ३ तत्र तस्मिन् श्रीकृष्णे उपनीताः
समर्पिता बलय उपायनानि यैः ... मिस्तान्निजपदे ते पितरमिव्यादरेण समर्प्योद्धृताः रवेर्दीपमिवेति ४ पितरं अर्भकाः बालाः सर्वसु
हृदमवितारं प्रोचुः इत्युत्तरेणान्वयः सुहृत्त्वेनैवावितारं न तु कामेन अत्र हेतुः परमानंदनिजस्वरूपलाभेन पूर्णकामं ५ विरिं
चिर्ब्रह्मा वैरिंच्या सनकादयः इह संसारे परं क्षेममिच्छतां परायणं परमं शरणं कुतः परमं ब्रह्मादीनामप्यधिकालो यत्र प्रभुर्न भवेत्त्र

नो भवाय उद्भवाय नोस्माकं त्वं भव हे विश्वभावन कृतिनः कृता
र्था बभूविम जाता वयं ७

भा॰प्र॰ ४७ 47

मधानवरसाभिनयचतुराः तालेअनुसारेणनृत्यंतोनर्तकाः गंधर्वागायकाः सूताःपौराणिकाः श्लोकमागधावंशप्रशंसका
वंदिनस्त्वमलप्रज्ञाःप्रज्ञाःप्रस्तावसदृशोक्तयः तेसर्वेगायंतिचेतिचकारस्यान्वयः २१ यथाविधियैःसहयथोचितंतैस्तथा
समागमंकृत्वासर्वेषांमानंकृतवानित्यर्थः २२ तदाह प्रह्वेति प्रह्वत्वंशिरसानतिःअभिवादनंवाचानति आश्वास्यच

नटनर्त्तकगंधर्वाःसूतमागधवंदिनः गायंतिचोत्तमश्लोकचरितान्यद्भुतानिच २१ भगवांस्तत्रवंधूनांपौरा
णामनुवर्त्तिनां यथाविध्युपसंगम्यसर्वेषांमानमादधे २२ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः आश्वा
स्यचाश्वपाकेभ्योवरैश्चाभिमतैर्विभुः २३ स्वयंचगुरुभिर्विप्रैःसदारैःस्थविरैरपि आशीर्भिर्युज्यमानोन्यै
र्वंदिभिश्चाविशत्पुरं २४ राजमार्गंगतेकृष्णेद्वारकायाःकुलस्त्रियः हर्म्याण्यारुरुहुर्विप्रतदीक्षणमहो
त्सवाः २५ नित्यंनिरीक्ष्यमाणानांयदपिद्वारकौकसां नवितृप्यंतिहिदृशःश्रियोधामांगमच्युतं २६
श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशां वाहवोलोकपालानांसारंगाणांपदांबुजं २७ ॥ २७

भयंदत्वाश्वपाकानामप्यभिमतैर्वरैः अभीष्टदानेनसन्मानंकृतवान् २३ अन्यैश्चवंदिभिश्च २४ हेविप्रशौनकतस्ये
क्षणेमहानुत्सवोयासांता २५ यद्यस्मात्नित्यंसदाअच्युतंनिरीक्ष्यमाणानामपिदृशोनैवतृप्यंति अतआरुरुहुः कथं
भूतं श्रियःशोभायाधामस्थानंअंगंयस्यतं २६ एतदेवाभिनयेनाह श्रियालक्ष्म्याःयस्योरःवक्षः निवासोयस्यमुखं
सर्वप्राणिनांदृशांसौंदर्यामृतपानायपात्रं यस्यवाहवोलोकपालनांनिवासः सारंश्लोकंगायंतीतिसारंगाभक्तास्तेषांयस्य राम
पदंबुजंनिवासस्तं निरीक्ष्यमाणानांदृशइतिपूर्वेणान्वयः २७ ॥ ॥ राम राम राम राम ॥ ४७

गोपुरं पुरद्वारं द्वारं गृहद्वारं तेषु कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां गरुडादिचिह्नांकिताः ध्वजाः जपप्रभृतयः शंकिताः प
ताकाः चित्राणां ध्वजपताकानां समूहैः अंतः प्रतिहत आतपो यस्यां २४ संमार्जितानि निःसारितरजस्कानि महामार्गादीनि
यस्यां महामार्गा राजमार्गाः रथ्या इतरमार्गाः आपणकाः पण्यवीथ्यः चत्वराणि अंगणानि फलादिभिः रूढैः अवकीर्णां २५ प्रे
ष्ठमायांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः २६ प्रहर्षवेगेन उच्छ्वसितानि उत्थितानि शयनादी॥

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां। चित्रध्वजपताकाग्रैरंतः प्रतिहतातपां २४ संमार्जितमहामार्गरथ्यापणकच
त्वरां सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः २५ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः अलंकृतां पूर्णकुंभैर्बलि
भिर्धूपदीपकैः २६ निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः २७ प्रद्युम्न॥
श्चारुदेष्णश्च सांबो जांबवतीसुतः प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः २८ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमं
गलैः शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः २९ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः वारमुख्याश्च शतशो
यानैस्तद्दर्शनोत्सुकाः लसत्कुंडलनिर्भातकपोलवदनश्रियः ३०

नियेःशासन्तु तगेतो २८ वारणेंद्रं मंगलार्थं पुरतः
कृत्वा ससुमंगलैः सुमंगलसहितैः पुष्पादियुक्तैर्ब्राह्मणैः ब्रह्मघोषो मंत्रपाठः २९ प्रणयेन स्नेहेन आगतं साध्वसं संभ्र
मो येषां ते वारमुख्या नर्तक्यो नटस्त्रियः प्रत्युज्जग्मुः अद्भुतानि चेत्यपि चकारस्य वंदनश्रेत्यन्वयः लसत्कुंडलैर्निर्भातानि या
नि कपोलानि तैर्वदनेषु श्रीर्यासां ताः वारमुख्या नर्तक्यो वेश्याः ३० ॥ ॥ श्रीराम राम॥

भा॰प्र॰ आयंतं तं पतिं दर्शनात्पूर्वं आत्मना बुध्या परिरेभिरे ततो दृष्टिभिः ततः समीपं समागतमात्मजैर्गृहीत्वा कंठमालिंगयंत्य इव
४८ स्वयमालिंगितवत्य इत्यर्थः अत्र हेतुः दुरंतभावाः गंभीराभिप्रायाः तदा च तासां नेत्रयोः निरुद्धमप्यंबु वाष्पं वैक्लव्यात् वै
वश्यात् आस्रवत् स्यंदत सुस्राव अतएव धैर्य्यहान्या विलज्जतीनां हे भृगुवर्य्य चित्रं पश्यैवेति ३१ पार्श्वगतः समीपस्थः त

६ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य्य वैक्ल दा
वात् ३१ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्री
र्न जहाति कर्हिचित् ३२ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां विधाय वैरं श्वसनो यथानलं मिथो
48 वधेनोपरतो निरायुधः ३३ स एष नरलोकेस्मिन्नवतीर्णः स्वमायया रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ३४

त्रापि रहोगतः एकांतवर्तितस्य पदे पदे प्रतिक्षणं नवं नवमेव अतः कैमुत्यन्यायः का विरमेतेति चला चंचलस्व
भावापि ३२ उक्तं श्रीकृष्णचरित्रं संक्षिप्याह एवमिति द्वाभ्यां क्षितेर्भाराय जन्म येषां अक्षौहिणीभिः कृत्वा
परिवृत्तं सर्वतः प्रसृतं तेजः प्रभावो येषां श्वसनो वायुर्वेणूनां अन्योन्यसंघर्षेणानलं विधाय मिथो दाहेन
यथोपशाम्यति तद्वत् ३३ स्त्रीरत्नकूटस्थ उत्तमस्त्रीकदंबस्य ३४ ॥ ॥ राम
४८

सितैरातपत्रैर्व्यजनैरुपस्कृतो मंडितः अर्कश्च उडुपो नक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजः तैः अर्कस्तत्स्थो-
पमानं नक्षत्राणि पुष्पवृष्टिः चंद्रः परिभ्रमच्छत्रमंडलाकारयोश्चामरव्यजनयोः चापं वनमालायाः विद्युत्तेजः पिशंगवाससोः
अभूतोपमेयं यद्दिनस्यापि रसस्पर्शचंद्रमयनक्षत्रवृंदो सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजो यदि भवेत् तर्हि
सन्ध्यायां तथा भाति तथा हरिर्बभावित्यर्थः २६ देवकीप्रमुखाः सप्त ववंदेति मातृः सोदर्यौ द्वारविशेषस्तापनार्थमुक्तं अष्टादशा-
पि वसुदेवस्य भार्या मातृतुल्यत्वान्नमस्कृता एव २७ सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयं २९ प्रो-

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचा-
पवैद्युतैः २६ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ववंदे शिरसा सप्त देवकीप्रमुखा मुदा २७ ताः पुत्रमंक-
मारोप्य स्नेहस्नुतपयोधराः हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः २८ अथाविशत्स्वभवनं सर्वकाममनु-
त्तमं प्रासादा यत्र पत्नीनां सहस्राणि च षोडश २९ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्स-
वाः उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः ३०

ष्य देशांतरे उषित्वा आराद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः आसनादाशयाच्च आसनादेहेनोत्तस्थुः आ-
शयान्तःकरणं तस्मादप्यासनेनोत्तस्थुः श्रीकृष्णेनात्मनः संश्लेषेणांतःकरणव्यवधानमपि नासहन्तेत्यर्थः व्रीडितानि लोच-
नानि आननानि च यासां अपांगैरेव वीक्षणात् व्रीडितलोचनाः अवनतमुखत्वाद्व्रीडिताननाः साकं व्रतैरिति हास्यक्री-
डावर्जनादिनियमा अर्पितात्मभिः उत्तस्थुरित्यर्थः यत उत्तस्थुरेवात्रस्थुरिव व्रतानि च यानि तत्स्त्रियोक्तानि क्रीडां शरीरसंस्कारं समा-

जोत्सवदर्शनं हास्यं परगेहे यानं त्यजेत्प्रोषितभर्तृका केचि ४०

भा॰प्र॰ पुरोक्तंयत्प्रसंगाय द्रौणिदंडादिविस्तरं वादरेतुतदेवाथपरीक्षिज्जन्मवर्ण्यते १ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थांचयां
४९ डुपुत्राणांवक्ष्येकृष्णकथोदयमितिप्रतिज्ञायपांडवानांराज्यस्थितिउपोद्घातत्वेनप्रसंगात्समाध्यायेसमाप्यानेनतुपिता इदानींमीशोह
निक्रमुक्तानुवादपूर्वकंपृच्छति अश्वत्थाम्नेति उपसृष्टेनविसृष्टेनतस्यजन्मेत्यादिब्रूहि इत्युत्तरेणान्वयः १ सपरीक्षित्प्रेत्यदेहं
त्यक्त्वा २ प्रार्थयेनत्वाज्ञापयामीत्याह गदितुंयदिमन्यसेअनुग्रहेणब्रूहिइति यस्यज्ञानमदाच्छुकइतिश्रवणेच्छायांकारणं ३ निस्पृ

शौनकउवाच॥ अश्वत्थाम्नोपसृष्टेनब्रह्मशीर्ष्णोरुतेजसा उत्तरायाहतोगर्भईशेनाजीवितःपुनः १ तस्यजन्ममहाबु
द्धेःकर्माणिचमहात्मनः निधनंचयथैवासीत्सप्रेत्यगतवान्यथा २ तदिदंश्रोतुमिच्छामोगदितुंयदिमन्यसे ब्रूहिनः
श्रद्दधानानांयस्यज्ञानमदाच्छुकः ३ सूतउवाच॥ अपीपलद्धर्मराजःपितृवद्रंजयन्प्रजाः निस्पृहःसर्वकामेभ्यःकृष्ण
पादानुसेवया ४ संपदःक्रतवोलोकामहिषीभ्रातरोमही जंबूद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं ५ किंतेकामाःसुरस्पा
र्हामुकुन्दमनसोद्विजाः अधिजह्रुर्मुदंराज्ञःक्षुधितस्ययथेतरे ६

हस्यापिराज्ञःश्रीकृष्णानुग्रहात् तादृक्पौत्रः समजनीतिवक्तुंतस्यश्रीकृष्णैकभक्तिकमाह अपीपलदितित्रिभिःपितृवदपीपलत्
पालयामास ४ क्रतवःतदुपार्जितालोकाश्च ५ सुरस्पार्हाःसुराणांस्पृहणीयास्तेसंपदादयः कामाविषयाःराज्ञःकिंमुदंप्रीति
ऊ मधिजह्रुर्नैवकृतवंतइत्यर्थः अत्रहेतुःमुकुंदएवमनोयस्येतिक्षुधितस्यान्नैकमनसः यथाइतरेस्रक्चंदनादयोप्रियंनकुर्वंतितद्वत् ६ राम ४९

नन्वेवं स्त्रीसंगादिभिः संसारित्वप्रतीतेः कथं भगवानवतीर्ण इत्युच्यते तत्राह उद्दामेति उद्दामः गंभीरो यो भावोऽभिप्रायः तस्यापि
शुनः सूचकोऽमलो वल्गुः सुंदरो हासः सव्रीडावलोकश्च तन्नाम्नानिहितः अमदनः श्रीमहादेवोऽपि संमुह्य लज्जया चापं पिनाकं अजहात् एवंप्रभा
वाथा स्त्रियइत्येताबोधवल्गितं यद्भगवतो मोहनीरूपेण महेशोऽपि विमोहित एव एतास्तु तद्विलासा एवेति तेषां कं तां कुहकैः कपटै-
र्विधर्मप्रसंगैर्यस्य मनः विमथितुं क्षोभयितुं न शेकुः न शोभयितुं शक्ताः ३७ तं श्रीकृष्णं अयं प्राकृतो लोकः आत्मौपम्येन स्वसादृश्येन संगिनं मनु-
जं मन्यते अत्र हेतुः व्यापृण्वानं व्याप्रियमाणं मनुष्यवद्व्यापारं कुर्वंतं यतोऽयमबुधः अनात्मज्ञः ३८ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह ए

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोऽपि यासां संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथि-
तुं कुहकैर्न शेकुः ३७ तमयं मन्यते लोको ह्यसंगमपि संगिनं आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ३८ एतदीशन-
मीशस्य प्रकृतिस्थोऽपि तद्गुणैः न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ३९ तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः अ-
प्रमाणविदो भर्तुरीश्वरं मतयो यथा ४० इति श्रीभागवते महापुराणे प्रथमस्कंधे एकादशोऽध्यायः ॥११॥ ११

तदिति ईशस्येश्वरस्यैतदेवैश्वर्यं यत् प्रकृतिस्थोऽपि तस्या गुणैः सुखदुःखादिभिः सदा न युज्यते इति यत् यथा आत्मस्थैः आनंदादिभिः ।
आत्माश्रयापि बुद्धिर्न युज्यते तद्वत् वैधर्म्ये दृष्टांतो वा आत्मस्थस्य सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यते एवं वा अस्य सदात्मस्थैः तत्रस्थैर्गुणै-
स्तदाश्रयापि बुद्धिस्तद्गुणैर्न युज्यते एवं प्रकृतिस्थोऽपि तद्गुणैर्न युज्यते इति यत् एतदीशनमीशस्येति ३९ तत्पत्न्योऽपि तस्य तत्त्वं न जा-
नंतीत्याह तमिति स्त्रैणं स्त्रीवश्यं रहः एकांते अनुव्रतं अनुसर्तारं च मेनिरे भर्तुरप्रमाणविदः प्रमाणमियत्तां महिमानमजानंत्यः इत्या-
हः ईश्वरं स्वेन तं मतयः अहंकारवृत्तयो यथा स्वाधीनं स्वधर्मयोगिनं मन्यंते तद्वत् यद्वा यथार्थसंस्मृतयः कल्पनात्यानमीश्वरं स्त्रैणं

भा०प्र० ५०

जातकंजातकर्ममंगलंपुण्याहं १३ ग्रामान्श्रेष्ठान्स्वन्नंशोभनमन्नंच तीर्थवित्दानकालज्ञः प्राक्नाभिछेदनात्तेनाशौचाप्राप्तिः सूत
कं छिन्नेनालेततःपश्चात्सूतकंतुविधीयतेतिवचनात्ततःपूर्वंप्रादात् अमान्नंवाप्रजातीर्थेपुत्रोत्पत्तिपुण्यकाले पुत्रेजातेव्य
तीपातेदत्तंभवत्यक्षयमितिस्मृतेः देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनां आयांतितद्दिनंपर्वश्रेष्ठंपुण्यमाहमितिचाब्रुवन्
१४ हेपौरवर्षभपुरूणांकुरुवंशपानां १५ शुक्लेशुक्ले अस्मिन्प्रजातंतौदैवेन कथंभूतेनअप्रतिघातेनदुर्वारेण संस्थांना

तस्यप्रीतमनाराजा विप्रैर्धौम्यकृपादिभिः जातकंकारयामासवाचयित्वाचमंगलं १३ हिरण्यंगांमहींग्रामान्हस्त्य
श्वान्नृपतिर्वरान् प्रादात्स्वन्नंचविप्रेभ्यः प्रजातीर्थेसतीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टाराजानंप्रश्रयान्वितं एषह्यः
स्मिन्प्रजातंतौकुरूणांपौरवर्षभ १५ दैवेनाप्रतिघातेनशुक्लेसंस्थामुपेयुषि रातोवोनुग्रहार्थायविष्णुनाप्रभ
विष्णुना १६ तस्मान्नाम्नाविष्णुरातइतिलोकेबृहच्छ्रवाः भविष्यतिनसंदेहोमहाभागवतोमहान् १७ युधिष्ठि
रउवाच अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः अनुवर्तितास्विद्यशसासाधुवादेनसत्तमाः १८

शंउपेयुषिगतेसतिवोनुग्रहार्थायप्रभवनशीलेनश्रीमहाविष्णुनारातोदत्तः १६ तस्मात्लोकेविष्णुरातइतिनाम्नाभवि
ष्यति महाभागवतश्चगुणैर्महान्भविष्यतिनात्रसंदेहः इतितंराजानंब्राह्मणाऊचुरितित्रयाणामन्वयः महाभागवतो
भविष्यतीत्युक्तेहृष्टःपृच्छति अपिस्वित्साधुवादेनयशसासत्कीर्त्याअनुवर्तिताभविष्यतिपूर्वेष्वेवातःपरमप्यनुषंगः

राम ५०

50

प्रस्तुतमाह मातुरिति ७ पुरटं सुवर्णं स्फुरत्पुरटं मौलिर्यस्यास्ति तं व्रीह्यादिभ्यश्चेतीनप्रत्ययः अपीच्यं अतिसुंदरं दर्शतं
तिदर्शनं रूपं यस्य तडिद्वाससी यस्य तिश्यामंमिति द्वपदाभ्यां विद्युद्भूषितमेघोपमा सूचिता अच्युतं अविकारं ८ तप्तं द्राहो
त्तीर्णं यत्कांचनं तन्मये कुंडले यस्य क्षतजोलंअहोमइक्ष स्यापि गर्भे अदिपीडितं सरंभादित्यारक्तनेत्रमिति भाव ९
अस्त्रतेजो विधमंतं विनाशयंतं नीहारं हिमं गोपतिः सूर्य इव संनिकर्षे समीपे ददर्श दृष्ट्वा च असौ कः इति पर्यैक्षत वितर्कितवा

मातुर्गर्भगतो वीरः स तदा भृगुनंदन ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ७ अंगुष्ठमात्रममलं स्फुरत्पुरटमौ
लिनं अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ८ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं क्षतजाक्षं गदापा
णिमात्मनः सर्वतो दिशं ९ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः अस्त्रतेजः स्वगदया नीहारमिव गोपतिः १०
विधमंतं संनिकर्षे पर्यैक्षत क इत्यसौ १० विधूय तदमेयात्मा भगवान्धर्मगुब् विभुः मिषतो दशमासस्य तत्रैवांत
र्दधे हरिः ११ ततः सर्वगुणोदर्के सानुकूलग्रहोदये जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा १२ ॥

अ० १० अमेयात्मा कथं तद्विधूतवानित्यत्र विनर्कस्यः धर्मं गोपायतीति धर्मगुप् दशमासपरिच्छेदस्य तस्य मिषतः पश्यतः ।
यत्रस्थः तत्रैवांतर्हितः न त्वन्यत्र गतः यतो विभुः सर्वगतः ११ उदर्कः उत्तरं फलं सर्वगुणानामुत्तरोत्तराधिक्यसूचके काल
नेतत्र हेतुः अनुकूलैः ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् १२ ॥ ॥ रामराम

लब्धाउपचितिःपूजायैः २९ परीक्षिदितिनामनिर्वक्तिसएवइतियद्यस्मात्प्रभुःसमर्थःसन् गर्भेदृष्टंपुरुषंअनुध्यायन्
इहदृश्यमानेषुनरेषुमध्येसएवमयंकिंपरीक्षेत अयमसौभवेदितिनोवाइतिविचारयेदतः परीक्षिदितिख्यातः पूर्वदृष्ट
मितिवापाठे ३० शुक्लःशुक्लपक्षेसंप्रसिद्धउडुपश्चंद्रः यथाकाष्ठाभिःपंचदशकलाभिःआपूर्यमाणोवर्द्धतएवंपितृ
भिःयुधिष्ठिरादिभिःकामैश्चन्वहंषष्टिकालाभिश्चापूर्यमाणोवर्द्धते ३१ पूर्वमपकृष्यज्ञातीन्अश्वमेधान्स्वावसरेस

इतिराज्ञउपादिश्यविप्राजातककोविदाः लब्धापचितयःसर्वेप्रतिजग्मुःस्वकान्गृहान् २९ सएषलोकेविख्या
तःपरीक्षिदितियत्प्रभुः गर्भेदृष्टमनुध्यायन्परीक्षेतनरेष्विह ३० सराजपुत्रोववृधेआशुशुक्लइवोडुपः आपू
र्यमाणःपितृभिःकाष्ठाभिरिवसोन्वहं ३१ यक्ष्यमाणोश्वमे...नज्ञातिद्रोहजिहासया राजालब्धधनोदध्यौनान्य
त्रकरदंडयोः ३२ तदभिप्रेतमालक्ष्यभ्रातरोच्युतचोदिताः धनं...हीणमाजह्रुरुदीच्यांदिशिभूरिशः ३३ तेनसं
भृतसंभारोलब्धकामोयुधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिं ३४ आहूतोभगवान्राज्ञायाज
यित्वाद्विजैर्नृपं उवासकतिचिन्मासान्सुहृदांप्रियकाम्यया ३५ ततोराज्ञाभ्यनुज्ञातःकृष्णयासहबंधुभिः
ययौद्वारवतींब्रह्मन्सार्जुनोयदुभिर्वृतः ३६ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्वादशोध्यायः॥१२॥

प्रकारंकथयतिज्ञातिद्रोहस्यहानेच्छयायक्ष्यमाणः करदंडयोरन्यत्रताभ्यांविनानुलब्धधनोदध्यौचिंतयामास कर
दंडजधनस्यपरिजनभरणमात्रोपक्षीणत्वात् ३२ प्रहीणंमरुत्तस्ययज्ञेत्यक्तंसुवर्णपात्रादिकमानीतवंतः
३३ संभृतसंभारःसंपादितयज्ञोपकरणःभीतोज्ञातिद्रोहात् ३४ ३५ ३६ ॥

प्रजानामविता रक्षकः मनुर्वैवस्वतो मनोः पुत्रः ब्राह्मणेषु हितः सत्यप्रतिज्ञश्च श्रीरामो यथा १९ उशीनरदेशाधिपतिः शिविः येन
श्येनाय स्वमांसं दत्वा शरणागतः कपोतो रक्षितः स्वानां ज्ञातीनां यज्वनां च यशो विस्तारको दौःषन्तिर्भरत इव २० अर्जुनयोः
पार्थकार्तवीर्ययोः २१ हिमवानिव सर्वतो निषेव्यः अनन्यपातिकलेन वसुधेव तितिक्षुः क्षमिता प्रीत्या मातापितराविव

ब्रह्मण्यः कस्तु पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा १९ एष दा
नशरण्यश्च यथा ह्यौशीनरः शिबिः यशो वितनिता स्वानां दौःषन्तिरिव यज्वनां २० धन्विनामग्रणीरेष तुल्यश्चा
र्जुनयोर्द्वयोः हुताश इव दुर्धर्षः समुद्र इव दुस्तरः २१ मृगेंद्र इव विक्रान्तो निषेव्यो हिमवानिव तितिक्षुर्वसुधेवा
सौ सहिष्णुः पितराविव २२ पितामहसमः साम्ये प्रसादे गिरिशोपमः आश्रयः सर्वभूतानां यथा देवो रमाश्रयः २३
सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः रन्तिदेव इवोदारो ययातिरिव धार्मिकः धृत्या बलिसमः कृष्णे प्रह्लाद इव सद् २४
ग्रहः आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः २५ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां निगृहीता कले
रेषः भुवो धर्मस्य कारणात् २६ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् प्र॰ पत्स्यत उपश्रुत्य मुक्तसंगः पदं
हरेः २७ जिज्ञासितात्मयाथार्थ्यो मुनेर्व्याससुतादसौ हित्वेदं नृप गङ्गायां यास्यत्यद्धाकुतोभयं २८ २९

सहिष्णुः २२ पितामहो ब्रह्मा तेन समः साम्ये समत्वे माश्रयो हरिः २३ सर्वसद्गुणमाहात्म्यं तस्मिन् श्रीकृष्णतुल्यः २४ सत्
सद्ग्रहः आग्रहः अभिनिवेशो यस्य सः आहर्ता कर्ता २५ राजर्षीणां जनमेजयादीनां २६ द्विजपुत्रेण प्रेरितात्तक्षकात् आत्मनो मृत्युं
१ प्रपत्स्यते हरेः पदं प्रपत्स्यते प्राप्स्यति २७ ततश्च जिज्ञासितं सम्यगात्मनो याथार्थ्यं येन सः इदं शरीरं गङ्गायां हित्वा अकुतोभयं पदं यास्यति २९

भा०प्र० पक्षिणो ह्यपत्यानि यथा स्निग्धेन पक्षच्छायया वर्धयंति तद्वत् युष्मत्पक्षपातछायया संमेधितान्नः अस्मान् अपि किं स्म
५२ रथ संमेधितत्वमेवाह विपद्गणात् यस्मान्मोचिता स्म ८ वः युष्माभिः कया वृत्त्या वर्तितं देहवृत्तिः कृता कानि च तीर्थादीनि
सेवितानि ९ भवतां च तीर्थाटनेन स्नानार्थं किंतु तीर्थानुग्रहार्थमित्याह मलिनजनसंपर्केण तीर्थानि मलि-

युधिष्ठिर उवाच ॥ अपि स्मरथ नो युष्मत्प पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः
८ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ९ भवद्विधा भागव
ताः तीर्थभूताः स्वयं विभो तीर्थीकुर्वंति तीर्थानि स्वांतःस्थेन गदाभृता १० अपि नः सुहृदस्तात बांधवाः कृ
ष्णदेवताः दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ११ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् यथानु
भूतं क्रमशो विना यदुकुलक्षयं १२ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं नावेदयत्सकरुणो दुःखितान्
द्रष्टुमक्षमः १३ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् १४

52

नानि संति संतः पुनः स्वयं तीर्थीकुर्वंति स्वांतं मनः तत्र स्थितेन स्वस्या...स्थितेनेति वा १० अपि किं सुखमासते । राम
भवद्भिः कापि दृष्टाः श्रुता वा ११ १२ यदुकुलक्षयावर्णने कारणमाह नन्विति १३ श्रेयस्कृत् तत्त्वमुपदिशन् १४ ५२

निर्गमो धृतराष्ट्रस्य विदुरान्मात्रयोदशे उक्तः येन्त्रमिषेकेण वकुंराष्ट्रे महापथं १ इदानीं परीक्षितःकलिनिग्रहादिकर्माणि कथयिष्यन् विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोर्जुनागमनं ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः गतिं हरिं तयात्मगत्या अवाप्तं विविसितं ज्ञातुमिष्टं सर्वं येन १ तदेवाह यावतः कर्मयोगव्रतादिविषयान्प्रश्नान् प्रथमं कृतवान् कौषारव तेभ्यः मैत्रेयस्य पुरतः पश्चात्त्रिचतुःप्रश्नार्थज्ञानमात्रेण गोविंदे जाते कभक्तिः कृतार्थः सन्तेभ्यः प्रश्नेभ्य उपरराम २

सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः १ यावतः कृतवान्प्रश्नान् क्षत्ता कौषारवाग्रतः जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह २ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ३ गंधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ४ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ५ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः राजा तमर्हयांचक्रे कृतासनपरिग्रहं ६ तं भुक्तवंतं विश्रांतमासीनं सुखमासने प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां ७ ॥ ॥ ॥

तत्र परं न विद्रासितवान् २ सूतः संजयः शारद्वतः कृपः ३ कृपी द्रोणभार्या जामयो ज्ञातिभार्याश्च अन्याः स्त्रियः ४ प्राणं तन्व इति तत्र क्षिप्तं मूर्छी विदोषतः प्राणे विनिसालिते तत्करांघ्रादयो निश्चेष्टा भवंति पुनस्तस्मिन्नागते यथोत्तिष्ठंति तद्वत् ५ विरहेण यदौत्कंठ्यं तेन कातरा विवशा ६ ७

भा०प्र० कथंधनादिवियोगः सोऽहं स्वकयत अत आह येनचेति अभिपन्नः अभिग्रस्तः २० अत्रावस्थानमतिदैन्यमितिदर्शयन्वैराग्यमुत्पा
५३ दयति पितृभ्रातृभिः सपर्णैः आत्मा च देहः २१ येन च पुत्रा हतास्तेन भीमेन दत्तं पिंडं गृहपालः श्वेव गृहपालः श्वा २२ निसृष्टः प्रदि
प्तः गरो विषं दूषिताश्च भर्त्सिताः नद्दैतेरन्नादिभिर्लब्धैः असुभिः कियत्प्रयोजनं न किंचिदित्यर्थः २३ तस्यापि एवं दैन्यमनुभ
वतोपि परैति व्हीयते २४ गतस्वार्थं पंशोधमीदृक्षत्वं मुक्तबंधनः त्यक्ताभिमानः कृतादृश्यविज्ञातागतिर्यस्य सः धीरः प्राज्ञ

येनचैवाभिपन्नोयंप्राणैःप्रियतमैरपि जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्रा हता आः
स्तेविगतंवयः आत्मा च जरया ग्रस्तः परगेहमुपाससे २१ अहो महीयसी जंतोर्जीविताशा यया भवान् भीमापवर्जितं
पिंडमादत्ते गृहपालवत् २२ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिता हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् २३ तस्यापि
तव देहोयं कृपणस्य जिजीविषोः परैत्यनिच्छतो जीर्णो जरया वाससी इव २४ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः
अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २५ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स
नरोत्तमः २६ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् इतोर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः २७

दुःखस्य स्वयं सहनेन मुक्तिप्राप्तेः २५ नरोत्तमः स्मृतः ततः प्रागेव कृतप्रतीकारः स्वकात्स्वत एव परतः परोपदेशतो वा २६
त्वं तु नरोत्तमो माभूः अतः ज्ञातो नो धीरो भवेत्याह अथेति अर्वाक् अर्वाचीनः प्रायशो नित्यर्थः गुणान् धैर्यदयादीन्विकर्षति एम
आच्छिनत्तीति तथा २७ ५३

ननुशूद्रदेहोसौकथमुपदिशेत् नह्यसौशूद्रः यमस्तद्रूपेणासीत् किंतत्रकारणंयमेचाप्यागतेऽमुनेकोदंडधरइत्यपेक्षायामाह अबिभ्रदितित्यक्तवानित्यर्थः मांडव्यशापात् तथाहि कश्चिच्चौरानुधावंतोराजभटामांडव्यस्याश्रमेतपःचरतःसमीपेतान्संप्राप्यतेनसहतानिबध्यानीयराज्ञेनिवेदयंस्तदाज्ञयासर्वान् शूलमारोपयामासुः ततोराज्ञातन्महिमानंज्ञात्वाशूलादवतार्यप्रसादयामास ततोमुनिर्यमंगत्वाकुपितउवाच कस्मादहंशूलमारोपितइतितेनोक्तं त्वंबाल्येशलभंकुशाग्रेण

अबिभ्रदर्यमादंडंयथावदघकारिषु यावद्दधारशूद्रत्वंशापाद्वर्षशतंयमः १५ युधिष्ठिरोलब्धराज्योदृष्ट्वापौत्रंकुलंधरं भ्रातृभिर्लोकपालाभैर्मुमुदेपरयाश्रिया १६ एवंगृहेषुसक्तानांप्रमत्तानांतदीहया अत्यक्रामदविज्ञातः कालःपरमदुस्तरः ७ विदुरस्तदभिप्रेत्यधृतराष्ट्रमभाषत राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतं १८ प्रतिक्रियानयस्येहकुतश्चित्कर्हिचित्प्रभो सएषभगवान्कालःसर्वेषांनःसमागतः १९ ॥ ॥ राम॥

विध्यक्रीडितवानिति तच्छ्रुत्वामांडव्यस्तंशशापबाल्येऽज्ञानतोमिमहांतंदंडंयतस्त्वंकारितवान् अतःशूद्रोभवेति १५ इदानींराज्यायकर्तव्यंनिरूपयितुंउक्तंमूलंनिगमयति युधिष्ठिरइति कुलंधरंवंशधरं १६ तदीहयागृहव्यापारेणप्रमत्तानांअत्यक्रामत् आयुःकालोअतिक्रांतः यद्वा तानभ्यभवदित्यर्थः ७ अभिप्रेत्यज्ञात्वा १८ नकुतश्चित्प्रतीकारः क्रियतांकिंनिर्गमेनतत्राह प्रतिक्रियेतिसर्वेषामिति येःप्रतिकर्तव्यास्तेषामपीत्यर्थः १९ ॥ ॥

भा०प्र० आत्मानं बुद्ध्या आत्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा प्रभोर्धृतराष्ट्रस्य ३५ गांधार्याश्च व्यवसितं निश्चयं मतो मुषितः वंचितोस्मि
५४ ३६ एवं किंचित्कालं शोचति तस्मिन् अथ तत्र सहआजगाम अत्रास्ति केचित्पुस्तकेषु ग्रंथांतरं तद्दुर्व्याख्यप्यसंप्रदायव्याख्यायते ।
शोकवेगादभ्यर्चयन्नाह राजा मत्त्वामभ्यर्चतीत्युक्तः शोकाक्रांतः कृपाविष्टः अश्रुपरिहितः पुमान् गुरुस्त्वं द्विजातीनां पूजनं न सम
भाचरेदिति स्मृतेः ३७ नाहं वेद स्ववेद्मि ३८ अपारे शोकार्णवे भगवान्त्वमेव पारदर्शकः अतो ब्रूहीति भावः ३९ आदौ च

विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ३५ संजय उवाच नाहं वेद व्य
वसितं पित्रोर्वः कुलवर्द्धनः गंधार्या वा महाबाहो मुषितोस्मि महात्मभिः ३६ अथाजगाम भगवान्नारदः सहतुंब
रुः प्रत्युत्थायाभिवाद्याह सानुजोभ्यर्चयन्मुनिं ३७ युधिष्ठिर उवाच नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः ।
अंबा वा हतपुत्रार्ता क्व गता च तपस्विनी ३८ कर्णधार इवापारे भगवान्पारदर्शकः अथाबभाषे भगवान्नारदो मुनि
सत्तमः ३९ नारद उवाच मा कंचन शुचो राजन् यदीश्वरवशं जगत् लोकाः सपाला यस्येमे वहंति बलिमीशितुः ४०
स संयुनक्ति भूतानि स एव वियुनक्ति च यथा गावो नसि प्रोतास्तंत्यां बद्धाश्च दामभिः ४१ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ४२

यथार्थकथनेन शोकेन मूर्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति कंचन मा शुचः मा शोचः न केवलं तानेव यद्यस्मादीश्वरा
धीनं जगत् तदेवाह लोका इति गाव इव बलिं वहंति सा दीर्घा तंत्यां बद्धास्तद्दामभिर्नसि नासिकायां प्रोताः स्वामिनो बलिं वहंति एवं वा राम
क्तंत्यां कर्तव्याकर्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणो ब्रह्मचारीत्यादि वर्णाश्रमलक्षणैर्बद्धाः परमेश्वरस्य बलिं तेन प्रे ५४
रिता वहंतीत्यर्थः ४१

४०॥ प्रकृतौ पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह॥ संयुनक्ति संयोजयति॥ वियुनक्ति वियोजयति च २

आजमीढः अजमीढवंशजः प्रज्ञाचक्षुः अंधः एवं बोधितः सन् द्रढिम्नः चित्तदार्ढ्यात् भ्रात्रा संदर्शितः अध्वा मार्गो यस्य
यस्य सः २८ सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिमनुजगाम ननु कथं सा सुकुमारी हिमाद्रिं दुःख
बहुलं हिमवंतं गता अत आह न्यस्तदंडानां प्रहर्षो यस्मिन् तं दुःखदमपि केषांचित् सुखहर्षहेतुर्भवतीत्यत्र दृष्टांतः मनस्वि
नां शूराणां युद्धे सन् तीव्रः प्रहार इव यथा पाठांतरे सत्संप्रहारं युद्धमिवेति २९ कृतं मैत्रं मित्रदैवत्यं संध्यावंदनं येन नत्वा सं

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः छित्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम भ्रात्रसंदर्शिताध्वा
२८ पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारं
२९ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौब
१ लीं च ३० तत्र संजयमासीनं प्रप्रच्छोद्विग्नमानसः गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ३१ अंबा च हतपु
त्रार्ता पितृव्यः क्व गतः सुहृत् अपि मय्यकृतप्रज्ञे हतबंधुः स भार्यया आशंसमानः शमलं गंगायां दुःखितो
पतत् ३२ पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३३ सूत उवा २
चा कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ३४ ॥ ॥ १४

पूज्य पितरौ विदुरधृतराष्ट्रौ ३० हे गावल्गणे गवल्गणस्य पुत्र संजय ३१ अकृतप्रज्ञे मंदभाग्ये मयि शमलं अपराधं आशं
समानः आशंकमानः भार्यया सह किं गंगायां पपात ३२ किं पांडौ उपरते मृते सति नः शिशून् यो अरक्षतां तौ तातौ क्व गतौ ३३
कृपया स्नेहवैक्लव्यात् चातिपीडितः आत्मेश्वरं अचक्षाणः अपश्यन् विरहकर्शितः सूतः संजयः न प्रत्युत्तरमाह ३४

भा०पु० कालावस्थोदेशमाहमायमीद्वारकायामित्याह सोयमिति: अस्यां भूमौ अभवाय नाशाय ४८ तर्हि श्रीकृष्णेनत्वास्तीत्यैवेनास्त्वं माकृ-
५५ थाइत्याह नत्रुदेवानां कार्यं तेन निष्पादितं केवलमवशेषं प्रतीक्षते यदुकुलस्य ह्रासमिति इह दिविस्थितं तानि जं धाम यास्य-
ति तावत्यूयमपि प्रतीक्षध्वमित्यर्थः तत्कृतमपि विदुर वेदनावर्णयन् ४९ तेस्वशोकमस्य चानिवार्यं जिज्ञासितस्मे यथा स्वं तं क- तमेव
थयति धृतराष्ट्र इति पञ्चभिः हिमवतो दक्षिणभागे ५० योवप्रसिद्धा स्वर्धुनी गंगा सा आत्मानं यत्र सप्तधा व्यधात् किमर्थं नाना पृथ-

सोयमद्य महाराज भगवान्भूतभावनः कालरूपोवतीर्णोस्यामभवाय सुरद्विषां ४८ निष्पादितं देवकृत्यमवशे-
षं प्रतीक्षते तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ४९ धृतराष्ट्रः सहभ्रात्रा गांधार्या च स्वभार्यया दक्षिणे-
न हिमवतः ऋषीणामाश्रमं गतः ५० स्रोतोभिः सप्तभिर्यत्र स्वर्धुनी सप्तधा व्यधात् सप्तानां प्रीतये नाम्ना सप्त-
55 स्रोतः प्रचक्षते ५१ स्नात्वानुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधिः अब्भक्ष उपशांतात्मा स आस्ते विगते-
षणः ५२ जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः हरिभावनया ध्वस्त रजः सत्वतमोमलः ५२ ॥ ५२

के सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये अत एव तीर्थं सप्तस्रोतो वदंति ५२ अष्टांगयोगमाह स्नात्वेति चतु-
र्भिः तत्र स्नानं होमोऽब्भक्षणं च नियमा उक्ता अब्भक्षस्य नेत्र्ययां स्वीकारोऽब्भक्षः उपशांत आत्मा यस्य विगता पुत्रा-
द्येषणा यस्मादिति यमा उक्ता ५२ जितासन इत्यादिना आसन प्राणायाम प्रत्याहारा उक्ता हरिभावनयेति धारणो- राम
क्ता ध्वस्ता रजः सत्वतमोरूपा मला यस्येति फलितो ध्यानमुक्तम् ५३ ॥ ५५

प्रवर्तीयापत्तेः अस्तु नाम संयोगवियोगयोरपाहयथेति क्रीडोपस्कराणां क्रीडासाधनानां ४२ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तं लो
कतत्वविचार्यमाणे निर्विषयोयं शोक इत्याह यन्मन्यसे इति लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण तत्त्वेति न ध्रुवं नाप्यध्रुवं शुद्धब्र
ह्मरूपेण अनिर्वचनीयत्वेन वा उभयं वा चिज्जडांशाभ्यां सर्वथापि चतुर्ष्वपि पक्षेष्वेते पित्रादयो न शोच्याः स्नेहादन्यत्र स्नेह एवैकेवलं
शोकहेतुः स चाज्ञानमूलक इत्यर्थः ४३ तस्मान्मां विना कथं ते वर्तेरन्निति मनसो वैक्लव्यं चित्तव्याकुलतां त्यज ४४ ननु तद्देहे स्थि
तोयं जीवेरित्यतन्नाकं नास्तीत्याह कालो गुणाभिव्यंजकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनोयं पांचभौतिकः जडः तद्विभागेन नाशं प्राप्य

यथा क्रीडोपस्कराणां संयोगविगमाविह इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ४२ यन्मन्यसे ध्रुवं लोक
मध्रुवं वा न चोभयं सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ४३ तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्म
नः कथं त्वनाथाः कृपणा वर्तेरंस्ते च मां विना ४४ कालकर्मगुणाधीनो देहोयं पांचभौतिकः कथमन्यांस्तु गो
पायेत्सर्पग्रस्तो यथा परं ४५ अहस्तानि सहस्तानामपदानि चतुष्पदां फल्गूनि तत्र महतां जीवो जीवस्य जी
वनं ४६ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक् अंतरोनंतरो भाति पश्य तं माययोरुधा ४७ ४७

ज सर्पग्रस्तः कालेन गिलितः यथा अन्यान्न रक्षति तद्वत् ४५ ईश्वरेण विहिता जीविका सर्वतः सुलभैवेत्याह अहस्तानि पश्वादीनि
अपदानि तृणादीनि तत्र तेषु अहस्तादिष्वपि फल्गूनि अल्पानि एवं जीवः सर्वोपि स्वस्य जीवनं जीविका एतेनैव सर्वनाम्नां तु
४६ ग्रासत्वं चोक्तमित्याह निरूपयति तत्स्यात् स्वात्मत्वं आहतदिदं अहस्तं सहस्तादि रूपं जगत् स एव भगवानित्यनन्ततः एव स एवैक एव
वनं तु नाना ननु सजातीयविजातीयभेदशून्यत्वे कुतस्त्यमित्यत आह आत्मानं भोक्तॄणां आत्मा स्वरूपं अन्तरः सजातीयभेदः अन्तरोन
न्तरः पश्यन्ति हि अथ भोक्तृभोग्यरूपश्च भाति अतो न विजातीयभेदोपि ननु एकः कथं तथा प्रतीयते अत आह माययाबहुधा तं पश्यति ४७

भा०पु०
५६

चतुर्दशेत्वरिष्टानि दृष्ट्वा राजा विशंकितः । अक्षौणोदर्शनान्कस्मात्तिरोधानमितीर्यते १ श्रीकृष्णस्यैवांतश्चकारेणमिप्रायंस्मानुं २ क
तिचित्समतदाकालातिक्रमेऽपितनः द्वारकातः नआयात् नागतः निमित्तानि अपश्यतान् कुरुवंशजयुधिष्ठिरः २ गदां घोरां नदेवान् विप
र्यस्तांस्तु धर्मायस्मिन् तस्यवार्त्तां जीविकां क्रोधलोभान्वेतयुक्त आत्मायेवा ३ जिह्मप्रायं कपटवहुलंव्यवहर्तं व्यवहारं साठ्यं

सूतउवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं १ व्यतीताः कति
चिन्मासास्तदा नायात्ततोऽर्जुनः ददर्श घोररूपाणि निमित्तानि कुरूद्वहः २ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः पापीय
सीं नृणां वार्त्तां क्रोधलोभानृतात्मनां ३ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं
४ कन्याविक्रयिणं तातं सुतं पित्रोरपोषकं ब्राह्मणान्वेदविमुखान् शूद्रांश्चेवब्रह्मवादिनः ४ निमित्तान्यत्यरिष्टा
नि कालं त्वनुगतं नृणां लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ५ युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधु
दिदृक्षया ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ६ गताः सप्ताधुना मासा भीमसेन तवानुजः नायाति कस्य वा हे
तोर्नाहं वेदेदमंजसा ७ अपि देवर्षिणादिष्टः स कालोऽयमुपस्थितः यदात्मनोंगमाक्रीडं भगवानुत्सिसृक्षति ८

गु

वंचनं तन्निःश्रंसौहृदं स्मरयं पितादीनां स्वश्रन्नियोगिभिः कल्कनं कलहादि ४ अत्यरिष्टानि अंगं नमसु भानिदृष्ट्वा नृणां लोभाद्य
धर्मप्रकृतिं दृष्ट्वानुजं भीमं ५ ६ वेति वितद्धेर्कि कस्माद्धेतोर्नायातीत्यहं नवेद्मि ७ अपि किं पदाश्रमम् नः आक्रीडं क्रीडा
साधनं अंगं मनुष्यनाट्यं उत्स्रष्टुमिच्छति स कालः किं प्राप्तः ८

राम
५६

समाधिमाह विज्ञानेतिद्वाभ्यां आत्मानमहंकारास्पदं स्थूलं देहादिवियोज्य विज्ञानात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं द्रष्टर्य
प्राद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं क्षेत्रज्ञं शुद्धं स्थूलाद्वियोज्य आधारे आश्रयभूते ब्रह्मणि प्रविलाप्य यथा घटांबरं घटोपाधेर्वि
योज्य यथा महाकाशे प्रविलाप्यते तद्वत् ५४ अनुत्थानमाह ध्वस्तेति ध्वस्तगुणत्वादेवाभावो बहिरिंद्रियकृत्ययात्रमनुत्थानं भवेन्न तु भयं
तस्य नास्तीत्यतः ध्वस्ता मायागुणानामुदर्काः उत्तरफलं वासनायस्य निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य अतएव
निवर्तिता अखिला आहारा भोग्या इंद्रियविषयाहरणं येन सः स्थाणुरिवनिश्चलआस्ते ५५ तथाभूतमप्यानेतुं उद्यतं प्रत्याह तस्ये

विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ५४ ध्वस्तमायागुणोदर्को नि
रुद्धकरणाशयः निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ५५ तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः सवाअ
द्यतनाद्राजन्परतः पंचमेहनि ५६ कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति दह्यमानेग्निभिर्देहे पत्युः पत्नी सहोट
जे बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ५८ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन हर्षशोकयुतस्त
स्माद्गंता तीर्थनिषेवकः ५९ इत्युक्त्वाथारुहत्स्वर्गं नारदः सहतुंबरुः युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ६०
इति श्रीभागवते महापुराणे प्रथमस्कंधे धृतराष्ट्रनिर्याणं नाम त्रयोदशोऽध्यायः ॥१३॥ ॥ ॥श्री॥

ति अंतरायो विघ्नः मैवाभूः इत्यडागमः छांदसः दर्शनमपि तावत्कुर्यामित्युद्यतं युधिष्ठिरं प्रत्याह स वा अद्यतनादह्नः ५६ स्वं स्वाधीनं त
र्हि तद्दाहार्थं गमिष्यामीत्यत आह तच्चेति तर्हि गांधार्यानयनाय गमिष्यामि नेत्याह पत्युर्देहे सहोटजे पर्णशालया सहिते योगाग्निना स
ह गार्हपत्यादिभि ५७ दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं प्रवेक्ष्यति प्रवेक्ष्यति ५८ तर्हि विदुरानयनार्थं गंतव्यमस्ति नेत्या
ह विदुरस्तु तन्निशाम्य हर्षशोकाभ्यां युतः सुगत्या हर्षः तेन मरणेन शोकश्च भ्रातृभ्यां युतः ततस्तस्मात्स्थानात्तीर्थानि सेवितुं गंता गमिष्यति ५९

असृक्सतें ग्रहाणांमिथःयुद्धं ७ भूतारुद्रानुचराःतेषांगणैःसंकुलैः व्यामिश्रैः प्राणिभिःसहितैःरोदसीद्यावापृथीव्यौज्वलितेदी
इवचपश्यति पुनर्भौमानाह नद्यइतिसार्द्धश्लोकेन प्राणिनांमनांसिच १८ नदुह्यंतीतिकर्मकर्तृप्रयोगः नप्रस्नुवंतीत्यर्थः १९
दैवतानिप्रतिमा २० अघंदुःखं २१ एतैःकृत्वानविद्यतेअन्येषुपुरुषेषुश्रीर्वेभ्यस्ताभिःशोभायेषांतैर्भगवतःपदैःहीनाभूः

असृग्वर्षंतिजलदाबीभत्समिवसर्वतः सूर्यंहतप्रभंपश्यग्रहमर्द्दंमिथोदिवि ७ ससंकुलैर्भूतगणैर्ज्वलितेइव
रोदसी नद्योनदाश्चक्षुभिताःसरांसिचमनांसिच १८ नज्वलत्यग्निराज्येनकालोयंकिंविधास्यति नपिबंतिस्तनं
वत्सानदुह्यन्तिचमातरः १९ रुदंत्यश्रुमुखागावोनहृष्यन्त्यृषभाव्रजे दैवतानिरुदंतीवस्विद्यंतिह्युच्चलंतिच २० इमे
जनपदाग्रामाःपुरोद्यानाकराश्रमाः भ्रष्टश्रियोनिरानंदाःकिमघंदर्शयंतिनः २१ मन्यएतैर्महोत्पातैर्नूनंभगवतःपदैः
अनन्यपुरुषश्रीभिर्हीनाभूर्हतसौभगा २२ इतिचिंतयतस्तस्यदृष्टारिष्टेनचेतसा राज्ञःप्रत्यागमद्ब्रह्मन्य न
दुपुर्याःकपिध्वजः २३ तंपादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिंदून्सृजंतंनयनाब्जयोः २४
विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः पृच्छतिस्मसुहृन्मध्येसंस्मरन्नारदेरितं २५ युधिष्ठिरउवाच॥
कच्चिदानर्तपुर्यांनःस्वजनाःसुखमासते मधुभोजदशार्हार्हसात्वतांधकवृष्णयः २६ ॥ ॥ राम

रित्यहंमन्ये २२ तस्यराज्ञः इत्येवंदृष्टानिअरिष्टानियेनतेनचेतसाचिंतयतः २३ अयथापूर्वंनिपतितंतत्रेवाह आ
तुरमित्यादि अपांबिंदून्अश्रूणिनेत्राभ्यांविसृजंतमित्यर्थः २४ उद्विग्नंकंपितंहृदयंयस्यसःविगतकांतिं २५ स्वजनावान्धवाः २६

अस्माकं सर्वपुरुषार्थत्वे हेतुः श्रीकृष्णस्तत्क्रियायोगं विना ऽनिष्टं न स्यादित्याशयेनाह यस्मादिति श्रीकृष्णाद्धेतोः एतच्चोपरिष्टादर्जुनः स्पष्टीकरिष्यति लोकाश्च यस्य करणमुपायस्यानुग्रहात् ९ अदूरात्संनिहितं नोऽस्माकमासंसतः १० उत्पातान्देहिकान्नाहमा-
र्व्यक्षिबाहुभिः ऊर्वादयो वामाः स्फुरन्ति वेपथुः कंपश्च हृदये वर्त्तते एते मह्यमारात्संनिहितं विप्रियं दास्यन्ति ११ भौमानाह शिवेति द्वा-
भ्यां शिवा क्रोष्ट्री आदित्यमभिरौति उद्यन्तं सूर्यमभिमुखं क्रोशति अनलानना अग्निमुखं वमन्ती हि अंग भीम मामभिलक्ष्य सारमे-

यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ९ पश्योत्पातान्न-
रव्याघ्र दिव्यान्भौमान्सदेहिकान् दारुणान्शंसतो दूराद्भयं नो बुद्धिमोहनं १० ऊर्वक्षिबाहवो मह्यं स्फुरंत्यंग
पुनः पुनः वेपथुश्चापि हृदये आराद्दास्यन्ति विप्रियं ११ शिवैषोद्यन्तमादित्यमभिरौत्यनलानना मामंग सा-
रमेयोयमभिरेभति अभीरुवत् १२ शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे वाहांश्च पुरुषव्याघ्र लक्षये रुदतो म-
म १३ मृत्युदूतः कपोतोयमुलूकः कंपयन्मनः प्रत्युलूकश्च कुह्वानैरनिद्रं शून्यमिच्छतः १४ धूम्रा दिशः प-
रिधयः कंपते भूः सहाद्रिभिः निर्घातश्च महांस्तात साकं च स्तनयित्नुभिः १५ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः १६

यः श्वाभिरेभति भुंक्ते अभीरुवन्निःशंकं १२ शस्ता गवादयो मां सव्यं वामं कुर्वन्ति अपरे गर्दभादयः प्रदक्षिणं कुर्वन्ति वाहा-
नश्वान् १३ अयं कपोतो मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकस्तत्प्रतिपक्षोऽल्पोलूकः काको वा कुह्वानैः कुत्सित-
शब्दैर्विश्वं शून्यमिच्छतः १४ धूम्रा धूसरा दिशः परिधयः परिवेषा अग्निलोकमात्रं एवं निर्दिव्यानाह सार्धेन द्वाभ्यां निर्घातो निरभ्रवज्रपा

भा॰प्र॰ भगवतोचावस्थानेहिलोकानांमंगलंनत्वपेक्षाशयेनाहचतुर्भिः मंगलायक्षेमायेक्षेमायपालनायभवायउद्भवाय अनंत
५८ सखःबलभद्रसहायः ३६ अर्चिताःसर्वैःपूजिताःपरमानंदंयथाभवति तथाक्रीडंति महापौरुषिकाःदेकुर्वनायानुचराः ३७
यस्यपादशुश्रूषणमेवमुख्यंतत्पधानंहिमः अष्टयत्कर्मतेनसत्याभामादयः संख्येयुद्धेश्रीकृष्णबलेननिर्जित्यतदाशिषः देवा
भोग्यान्पारिजातादीन्वज्रायुधस्यवल्लभाशचीतस्याउचिताः ३८ यद्बाहुदंडप्रभावोपजीविनः सुधर्मांनामसभामधिक्रा

मंगलायचलोकानांक्षेमायचभवायच आस्तेयदुकुलांभोधौआद्योनंतसखःपुमान् ३६ यद्बाहुदंडैर्गुप्तायांस्व
पुर्यांयदवोर्चिताः क्रीडंतिपरमानंदंमहापौरुषिकाइव ३७ यत्पादशुश्रूषणमुख्यकर्मणासत्यादयोद्व्यष्टसह
स्रयोषितः निर्जित्यसंख्येत्रिदशांस्तदाशिषोहरंतिवज्रायुधवल्लभोचिताः ३८ यद्बाहुदंडाभ्युदयानुजीविनोयदु
प्रवीराह्यकुतोभयामुहुः अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसुधर्म्मांसुरसत्तमोचितां ३९ कच्चित्तेनामयंतात
भ्रष्टतेजाविभासिमे अलब्धमानोवज्ञातःकिंवातातचिरोषितः ४० ॥

मंतिसर्गोविंदसुरवमास्तइतिगतयेच्चमभ्रेलाकेनान्वयः ३९ इदानींतस्यैवकुशलंपृच्छति कच्चिदितिषड्भिः अना
मयंआरोग्यं अलब्धमानोयेनबंधुभिःसकाशात् किंवातैःप्रसुप्तश्चैवज्ञातः तिरस्कृतः यतःचिरोषितःबहुकालेन राम
त्वस्थितः ४० ५८

58

किं वक्ष्यतीति शोकयान्यवहितकर्मेण पृच्छति शूर इत्यादिना मारिषः मान्यो मामा आनकदुंदुभिः वसुदेवः २७ स्वसारः पर
स्परं वसुदेवं देवकीप्रमुखाः तासामपि देवकीप्रमुखा एव पृथगपि पृच्छति स्वयमिति २८ आहुकः उग्रसेनः असत्पुत्रोपि यस्य अत एव
जीवन्मात्रे स्पृह अनुजश्च देवकः हृदीकसुतः कृतवर्मा जयंतादयः रुक्मिणीनंदनः ३० सर्ववृष्णीनां मध्ये महारथः गं

भूतोपासनामहः कच्चिदास्ते सुखमास्ते नाथमारिषः मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः २७ सप्तस्वसारस्तत्पत्नी
मातुलान्यः सहात्मजाः आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं २८ कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः
हृदीकः ससुतोक्रूरो जयंतगदसारणाः २९ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः कच्चिदास्ते सुखं रामो भगवा
न्सात्वतां पतिः ३० प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः गंभीररयो निरुद्धो वर्द्धते भगवानुत ३१ सुषे
णश्चारुदेष्णश्च सांबो जांबवतीसुतः अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ३२ तथैवानुचराः शौरेः श्रुत
देवोद्धवादयः सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ३३ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः अपि स्मरं
ति कुशलमस्माकं बद्धसौहृदाः ३४ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः कच्चित्पुरे सुधर्मायां सुखमा
स्ते सुहृद्वृतः ३५

गंभीररयः युद्धे महावेगः वर्द्धते मोदत इत्यर्थः ३१ श्रीकृष्णस्य पत्न्यां रुक्मिण्यां तेषु प्रव
राः ३२ सुनंदनंदनौ शीर्षण्यौ मुख्यौ येषां ते ३३ ३४ भगवानिति सुखमास्त इति प्रश्नस्यानौचित्यमाशंक्याह पुर इ
त्यादि ३५

भा.पु. कलिप्रवेशमालक्ष्याथ रं नृपस्य परीक्षिति आरुरोह नृपः स्वर्गमिति पंचदशेऽब्रवीत् १ कृष्णोऽर्जुनः आविकल्पितः इति छेदः
५६ नानाशंकास्पदं रूपमालक्ष्य कल्पितः कल्पितार्थः प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः ननु हे तव कृष्णविश्लेषेण कर्शितः कृशः
कृतः १ शोकेन हेतुना शुष्यद्वदनं च हृत्सरोजं च यस्य हतप्रभा तेजो यस्य २ शुचः शोकाश्रूणि पाणिना
उच्छलितानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिना प्रमृज्य परोक्षेण दर्शनाभावेन शोकेन हेतुना समुन्नद्धः प्रवृद्ध

सूत उवाच॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः १ शोकेन
शुष्यद्वदनहृत्सरोजो हतप्रभः विभुं तमेवानुध्यायन्नाशक्नोत् प्रतिभाषितुं २ कृच्छ्रेण संस्तभ्य शुचः पाणिनामृज्य
नेत्रयोः परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः ३ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् नृपमग्रजमित्या
ह बाष्पगद्गदया गिरा ४ अर्जुन उवाच॥ वंचितोऽहं महाराज हरिणा बंधुरूपिणा येन मेऽपहृतं तेजो देवविस्माप
नं महत् ५ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ६ ६ ६

कंपश्चैवौत्कंठ्यं तेन कातरः व्याकुलः नृपमित्याहेत्युत्तरेणान्वयः ३ सख्यं हितैषणं मैत्री उपकारिता सौहृदं दत्वं संबं
धितां बाष्पेण कंठावरोधात् गद्गदया ४ येन मां च यत् देवान् विस्मापयति यत्तत्तेजः ५ यस्य क्षणवियोगेनेत्यादि
यद्यप्यनंतेनाह मद्यप्युषित इति सप्तमश्लोकस्थेन तत्र्यस्य संबंधः प्रिय स्यापि अप्रियत्वे दृष्टांतः उक्थेन प्राणेन रहितः राम
प्राणः पित्रादि ६ ६ ॥ ५९

59

ऽभावैरितिच्छेदः प्रेमशून्यैरमंगलैः परुषैः शब्दादिभिः नाभिहितः नताडितोसि किं यद्वा अर्थिभ्यः किमपि दास्यामीत्युक्तं
किं यद्वा आशया सह यथा आशा भवति तथा दास्यामीति प्रतिश्रुतं सन् न दत्तवान् किं ४१ अन्यद्वा शरणागतं सत्त्वं प्राणिमा
त्रं न त्यक्तवानसि किं यतस्त्वं पूर्वं शरणप्रदः ४२ अगम्यामिति छेदः ननिंदितां स्त्रियं अगमः किं न गतवानसि असत्कृतां
मलिनवस्त्रादिना अगमः किं नोत्तमैः अनुत्तमैः समैरित्यर्थः असमैरधमैर्वा किं न पराजितोसीत्यर्थः ४३ संभोजनार्हान्

कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः नदत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं ४१ कच्चित्त्वं ब्राह्मणं बालं गां
वृद्धं रोगिणं स्त्रियं शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ४२ कच्चित्त्वं नागमोऽगम्यां गम्यां वा [illegible]
स्त्रियं [illegible] ऽसत्कृतां स्त्रियं पराजितो वाथ भवान्नोत्तमैर्नासमैः पथि ४३ अपि स्वित्पर्यभुंक्थास्त्वं संभोज्यान् वृद्धा
न्वृद्धबालकान् जुगुप्सितं कर्म किंचित्कृतवान्नयदक्षमं ४४ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना
शून्योस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ४५ इति श्रीभागवते महापुराणे प्रथमस्कंधे चतुर्दशोऽध्यायः ॥१४

वृद्धान्बालकांश्च किंस्वित्पर्यभुक्थाः त्यक्त्वा भुक्तवानसि अक्षमं अकर्म अयोग्यं यत्तत्कृतवानसि किं ४४ नित्यं सदा
प्रेष्ठतमेन हृदयेनांतरंगेण स्वबंधुना कृष्णेन रहितः शून्योस्मीति आत्मानं मन्यसे अन्यथा ते रुक् मनःपीडा
न घटते ४५ ॥ इति प्रथमे चतुर्दशोऽध्यायः ॥१४॥ ॥

भा०प्र० शिष्याणामयुतस्याग्रेतंतत्पंक्तौभुंक्तेयः तस्माद्दुर्वाससोहेतोः अरिणादुर्योधनेनरचितंयत्दुरंतकृच्छ्रंशापलक्षणंतस्मात्सका
६ शान्नोऽस्मान्वनेएत्यअनुगोप किंकृत्वाशाकमन्नंतस्मिन्पात्रेऽवशिष्टंउपभुज्यजग्ध्वायतःउपयोगात्सलिलेविनिम
ग्नोमुनीनांसंघःत्रिलोकींतृप्तामसंस्त एवंहिभारतेकथा कदाचित्दुर्वाससोदुर्योधनेनातिथ्यंकृतं तेनचपरितुष्टेनवरं
वृणीष्वेत्युक्ते दुर्वाससःशापात्पांडवानश्येयुरितिमनसिनिधायदुर्योधनेनोक्तं युधिष्ठिरोऽस्मत्कुलमुख्यःअतस्तस्या
व पिभवतैवमेवशिष्यायुतसहितेनातिथिनाभवितव्यं किंतु द्रौपदीयथाबुध्यानसीदेततथातस्यांभुक्तवत्यांतद्गृहंगंतव्य
मितिततश्चतथैवदुर्वाससिप्राप्तेपरमादरेणयुधिष्ठिरेण मध्याह्निकंकृत्वाआगम्यतामितिविज्ञापितोमुनिसंघोऽघ

60

योनोऽनुगोपवनमेत्यदुरंतकृच्छ्रात्दुर्वाससोऽरिविहितादयुताग्रभुक्यः शाकान्नशिष्ट
मुपभुज्ययतस्त्रिलोकींतृप्तामअमंस्तसलिलेविनिमग्नसंघः ११ रामरामराम

मर्षणायजलेनिममज्ज तत्रचिंतातुरयाद्रौपद्यास्मृतमात्रःकृष्णः अकस्मात्किलराजिद्वहित्वातत्क्षणमेवआगतवा
नस्तयाचागतः तयाचाविदितोदंतात्भगवतोक्तंद्रौपदिबहुबुभुक्षितोऽस्मिप्रथमंमांभोजय तयाचेतिलज्जयोक्तंस्वामि
न्भोजनपर्यंतमद्ययमन्नंसूर्यदत्तास्थाल्यांमयाचसर्वान्संभोज्यभुक्तं अतोऽन्नास्त्यन्नमितितथाप्यतिनिर्बंधेन
स्थालीमानाय्यतत्कंठलग्नंकिंचित्शाकान्नंप्राशयोक्तं अनेनविश्वात्माभगवान्प्रीयतां अथभोक्तुंमुनिसंघमाह्वये राम
ति सचतावतातितृप्तः हृथायाकभयेनपलायितइति ११ ६०

श्रीकृष्णोपकारानन्नुस्मरति यत्संश्रयादिति दशभिः यत्संश्रयात् बलात् स्मरेण कामेन दुर्मदानामतिमत्तानां तेजः प्रभावः हृतं
धनुर्ग्रहणेनैव पश्चात् धनुः सज्जीकृतं चैतेन मत्स्योपयंत्रोपरि भ्रमन्विद्धः ततस्तान्विजित्य द्रौपदी प्राप्ता च इति ७ उदितवि
स्मयः खाण्डववनं दहनस्य वह्नेः अदां देवान्निरस्य खाण्डवं दाहे रक्षितेन मयेन कृता च सभा लब्धा अद्भुतशिल्पं तया मायया यस्यां सा तेन
ध्वरे यागे राजसूये ८ अनंतरं श्लोकोऽविगीतः तथापि व्याख्यायते नृपशिरः स्रंघ्रिपस्य तं जरासंधं तवानुजो भीमः म
खाय मखत्राणाय हतवान् तेन निर्जयं विना राजसूयमखस्यानुपपत्तेः गजायुतस्येव सत्वमुत्साहशक्तिः वीर्यं बलं च यस्य सः तं हत्वा

यत्संश्रयात् द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां । तेजो हृतं खलु मयापि हि लक्ष्यमत्स्यः सज्जीकृतेन
धनुषाधिगता च कृष्णा ७ यत्संनिधावहमु खाण्डवमग्नये दामिंद्रं च सामरगणं तरसा विजित्य । लब्धा सभा मयकृता
ऽद्भुतशिल्पमय्यायादि भोहरन्नृपतयो बलिमध्वरे ते ८ यत्तेजसा नृपशिरोङ्घ्रिमहन्मखार्थमार्यानुजस्तव गजा
युतसत्ववीर्यः तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचिताः स्तव च ते बलिमध्वरे ते ९ यत्पाण्डवाधिमखवल्क
प्रमहाभिषेकश्लाघिष्ठचारुकवरं कितवैः सभायां । स्पृष्टं विकीर्य पदयोः पतितं गुरूणां यस्यास्त्वन्मोहकृतहतेशानि
मुक्तकेशाः १०

प्रमथनाथो महाभैरवः तस्य मखाय ये राजानः तेनाहृताः तेभ्यस्मान्मोचिताः तत्र स्मांके ध्वरे बलिमानीतवंतः ९ ये:
कितवैः दुःशासनादिभिः तव पत्न्याः कवरं विकीर्य उन्मुच्य स्पृष्ट्वा कृष्टं तथा स्त्रियो हतेशा अकृतं च कारकयं भूतं कवरं
गोमखे राजसूयमखे अभिषेकपवित्रीकृतं चितियो महाभिषेकः तेन श्लाघ्यतमं चारु रम्यं तत् स्मरणात् तदानीमेव प्राप्तस्पर्शीकृ
तमस्य नमने पदयोः पतितान्यश्रूणि गुरवाणां यस्याः पत्न्याः त्वयि नाथे सति चेन्मे दुःखं तर्हि कोऽपराधस्त्वमेव भाग्य मित्यभिप्रायः

अतएव वैधव्यान्मुक्तकेशाः ३१

भा०प्र० अदभ्रा अनल्पा ये राजन्यवर्याः तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण मम अग्रेचरः सन् हे विभो तेषां
६१ रथयूथपानां आयुरादीनि या दृष्ट्यैव अर्च्छत् हृतवान् मनांसि उत्साहादिशालि सहो बलं ओजः सत्त्वादिकौशलं १५
यस्य दोःषु भुजेषु मा मां प्रणिहितं स्थापितं तेनैव गुर्वादिभिर्निरूपितानि प्रयुक्तानि अस्त्राणि मां न स्पृशंति स्म. गुरुर्द्रोणः
त्रिगर्तः त्रिगर्तदेशाधिपतिः सुशर्मा शलः शल्यः सैंधवः सिंधुदेशाधिपतिः जयद्रथः बाह्लीकः शंतनोर्भ्राता अमोघो

64 यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडितासु अग्रेचरो मम विभो रथयूथपानां आयुर्मनां
सि च दृशा सह ओज आर्च्छत् १५ यद्दोःषु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैंधवबाह्लिकाद्यैः अ
स्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि १६ सौत्ये वृतः कुमतिनात्मद ईश्वरो मे य-
त्पादपद्ममभवाय भजंति भव्याः मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन् यदनुभावनिरस्तचित्ताः १७ १७

मा मा हिंसेयं तथा भूतान्यपि पांडवांतरेऽपि सहावार्थः प्रतीकाराकरणे अस्पर्शे दृष्टांतः नृहरिदासं प्रह्लादमिवेति १६ स्वा
पराधमनुस्मरन् संतप्यमान आह सौत्ये सारथ्ये कुमतिना मया वृतः कुमतित्वमेवाह आत्मद इत्यादिना अभवाय
मोक्षाय भव्याः श्रेष्ठाः श्रांतवाहा अश्वा यस्य तं मां जयद्रथवधे हि जलपानं विना अश्वाः श्रांताः ततो रथादवतीर्य बाणेन भुवं
भित्त्वा जलं संपादितं मया तदा यस्यानुभावेन निरस्तचित्ता अरयो मां न प्रहृतवंतः स सौत्ये वृतः इति कुमतित्वं १७ राम ६१

श्री

गिरिजासहितो विस्मापितः स्मर्त्तनिजंपाशुपतमस्त्रं अन्येपिलोकपालानिजान्यस्त्राण्यददुः अन्यदप्याश्चर्यमाह अमुने
वेति महत्इंद्रस्यासनार्द्धं १२ तत्रैवस्वर्गे क्रीडतः गांडीवलक्षणचिह्नं पस्पतत् अरातयो निवातकवचादैत्याः तेषांव
धार्थंआश्रितवंतः येनानुभावितप्रभावमुक्तं कर्त्तुं हे अजमीढयुधिष्ठिरतेनमुषितः वंचितोस्मि कथंभूतेनभूम्नानिजम
हिमावस्थानेन १३ यद्गांधवइत्यादिलोकत्रयस्यापितेनमुषितोहमिति पूर्वेणैवसंबंधः श्रीकृष्णबांधवएकरथाह

यत्तेजसाथभगवान्युधिशूलपाणिर्विस्मापितःसगिरिजोस्त्रमदान्निजंमे अन्येपिचाहममुनैवकलेवरेण
हे प्राप्तोमहेंद्रभवनेमेदासनार्द्धं १२ तत्रैवमेविहरतोभुजदंडयुग्मंगांडीवलक्षणमरातिवधायदेवाः सेंद्राः
श्रितायदनुभावितमाजमीढतेनाहमद्यमुषितःपुरुषेणभूम्ना १३ यद्गांधवःकुरुबलाब्धिमनंतपारं ए
कोरथेनततमेहमतीर्यसत्वं प्रत्याहृतंबहुधनंचमयापरेषांतेजास्पदंमणिमयंचहृतंशिरोभ्यः १४ ॥ १४

कौरवसैन्याब्धिंनास्त्यंतोगांभीर्येणपारश्चदेशतोयस्यतत्तरेतीर्णवान् उत्तरगोग्रहेअतीर्याणिदुस्तराणिसत्वानिति
मंगलादीनिभीष्मादिरूपाणियस्मिन् परैर्नीतंगोधनं प्रत्याहृतंपरेषांचशिरोभ्यःसकाशात् तेजस्पदंप्रभावस्या
स्पदंउष्णीषरूपंमणिमयंमुकुटरत्नरूपंचबहुधनं तान्मोहनास्त्रेणमोहयित्वाहृतंयद्बांधवेनमया १४ १४ १४

श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह यत इति येभ्यः नृपतयो नमंति इत्थं नरितं भूतं असत्कार्यात्मनं सन्मंत्रविधानैरपि भस्मनि हुतमिव अतिप्रीतादपि कुहकात्मायाविनः शंकासात् रुंलभ्यं यथा सम्यक्कर्षणादिनापि कृषिस्थ मोऊप्तं बीजमिव २१ सुहृत्पुरे त्वयापृष्टानां नः सुहृदां मध्ये चत्वारः पंचवावशेषिताः तत्र हेतुः विप्रशापेत्यादि २२ वारुणीमज्ञानतामिवान्योन्यमेकामुष्टिभिर्निघ्नतां २३ अवशेषितात् अल्पेनेनोक्तं हेतुकर्त्तारमाह त्रिभिः प्रायेणेति भावयंति पालयंति २४ जलो

तद्वैधनुस्तइषवः सरथोहयास्ते सोहंरथीनृपतयोयतआनमंति सर्वंक्षणेनतदभूदसदीशरिक्तं भस्मन्हुतं
क कुहकराद्धमिवोप्तमूष्यां २१ राजंस्त्वयानुपृष्टानां सुहृदांनः सुहृत्पुरे विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः
२२ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां अजानतामिवान्योन्यं चतुःपंचावशेषिताः २३ प्रायेणैतद्भगवत ई
श्वरस्य विचेष्टितं मिथो निघ्नंति भूतानि भावयंति च यन्मिथः २४ जलौकसां जले यद्वन्महांतोऽदंत्यणीयसः दु
र्बलान्बलिनो राजन्महांतो बलिनो मिथः २५ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः यदून्यदुभिरन्योन्यं
भूभारान्संजहार ह २६ देशकालार्थयुक्तानि हृत्तापोपशमानि च स्मरतश्चित्तं गोविंदाभिहितानि मे २७ हरं

कसां मत्स्यादीनां मध्ये महांतः स्थूला अणीयसः सूक्ष्मान् यथा भक्षयंति २५ भुवो भारभूतान् संहृतवान् २६ अतःपरं वक्तुं न शक्नोमीति सूचयन्नाह देशकालोचितार्थयुक्तानि मनः पीडोपशमनकराणि च गोविंदस्य वचनानि स्मरतो मम चित्तं हरंतीत्याहेति २७

हेनरदेव उदारं रम्यं भीरं रुचिरं च यत् स्मितं तेन शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रस्तावे च हे पार्थेत्यादीनि सं
धुरादराणि संजल्पितानि च हृदिस्पृशानि मनोज्ञानि माधवस्य पान्येतानि इदानीं स्मर्तुर्मम हृदयं लुठंति लोटयंति क्षोभयं
ति निजभावत्रयार्थः ॥ १८ ॥ विकत्थनं स्वगुणश्लाघ नादिषु ऐक्यात् ॥ अव्यतिरेकात् हे मित्र कदाचित् व्यभिचारं
दृष्ट्वा हे वयस्य त्वमृतवान् सत्यपुरुषस्त्वं ॥ इति वक्रोक्त्या विप्रलब्धः तिरस्कृतोपि क्षमानितिपाठे ॥ त्वमेवोद्वाः सेवकाः से

नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सखे कुरुनंदनेति ॥ संजल्पितानि नरदेव हृदिस्पृशानि स्म
र्तुर्लुठंति हृदयं मम माधवस्य ॥ १८ ॥ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रल
ब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥ १९ ॥ सोहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या
प्रियेण सुहृदा हृदयेन शून्यः ॥ अध्वन्युरुक्रमपरिग्रहमंग रक्षन् गोपैरसद्भिरबलेव विनिर्जितोस्मि ॥ २० ॥ २० ॥

तियस्य ऋतो महान्मया वयस्य इति मत्वा विप्रलब्धः तिरस्कृतः इत्यर्थः ॥ मे अघं अपराधं असहत ॥ महितया महत्वेन
एकपदे अतिमहत्वेनेत्यर्थः ॥ सख्युः सखेव तनयस्याघं पितेव ॥ १९ ॥ त्वया शंकितं पराजयं च प्राप्तोहमित्याह तेन नृपेंद्र स
ख्या रहितः ॥ अतो हृदयेन शून्यः ॥ अंग हे राजन् उरुक्रमस्य परिग्रहं षोडशसहस्रस्त्रीलक्षणं अध्वनि नीचैः अबलायो

भा०प्र० तां तु विज्ञाय वक्ष्यति एकादशे हि सौदामिन्या यथाकाशे यान्त्या हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैरि
६३ ति संसृतरूपरामजीवन्मुक्तावभूवदेहे जहाविति च ३१ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमनुध्यात्वा तत्साम्यं वदतो
२ मंदमतीन् प्रति वैलक्षण्यं स्पष्टयति द्वाभ्यां ययायादेहेन यादवान् भुवो भारं कंटकेन कंटकमिवाहरत् मायादेवतनुः भू
भारतनुश्चेति द्वयमपि ईश्वरस्य संहार्यत्वेन सममेव ३४ श्रीकृष्णस्य तु विशेषमाह यथेति तान्यपि यथा धत्ते न तु जहाति
च तदाह यथा नटः निजरूपेण स्थितो यथा रूपांतराणि धत्ते त्यजति च तथा तदपि कलेवरं जहौ अंतरधादित्यर्थः

पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम सं
सृतेः ३२ ययाहरद्भुवो भारं तां तनुं विजहावजः कंटकं कंटकेनेव द्वयं चापीशितुः समं ३३ यथा मत्स्यादिरूपाणि ध
त्ते जह्याद्यथा नटः भूभारः क्षपितो येन जहौ तच्च कलेवरं ३५ यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा
श्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ३६ युधिष्ठिरस्तत्परिसर्पणं बुधः
पुरे च राष्ट्रे च गृहे तथात्मनि विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ३७ ३७

३५ युधिष्ठिरस्य स्वर्गारोहणप्रसंगाय कलिप्रवेशमाह यदेति स्वतन्वा जहौ स्वतनोरेव वैकुंठारोहात् श्रवणार्हा सती कथा यस्य
यदा यदहस्तस्मिन्नेवाहः हरिनिर्लुप्तसमस्तमंगलपदं अप्रतिबुद्धचेतसामिति विवेकिनां तु न प्रभुरिति उक्तं अन्ववर्त्त
तेति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ३६ बुधो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कृ राम
थंभूतं लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटल्यं पर्यधात् तदुचितं परिधानमकरोत् ३७ ॥ ॥ ३ ६३

63

एवमिति सार्द्धेन । अतिगाढेन स्नेहेन चिंतयतो मतिः शांता शोकरहिता विमला विरक्ता चासीत् ॥ २९ ॥ भक्तिवैमल्ये फलमाह वासुदेवांघ्र्य
नुध्यानेन परिबृंहितं रंहो वेगो यस्याः तया निर्मथिता उन्मूलिता अशेषाः कषाया कामादयो यस्याः सा धिषणा बुद्धिर्यस्य सः
ज्ञानं पुनरध्यगमदिति उत्तरेणान्वयः ॥ ३० ॥ कालेन कर्मभिः तमसा भोगाभिनिवेशेन च रुद्धं आवृतं सत् पुनः प्राप्तज्ञानफ २०
लमाह विशोक इति एतद्द्वैतशोकहेत्वभावेनोपपादयति शोकस्य हि हेतुर्द्वैतं देहधर्मः तस्य देहः तस्य लिंगं तस्य गुणाः तेषा
मविद्यात्मत्वं ब्रह्मसंपत्त्या ब्रह्मानुभवेन अहं ब्रह्मेति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् तेन नैर्गुण्यं भवति ननु सूक्ष्म

एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं सौहार्देनातिगाढेन शांतासीद्विमला मतिः २९ वासुदेवांघ्र्यनुध्यानप
रिबृंहितरंहसा भक्त्या निर्म्मथिताशेषकषायधिषणोर्ज्जुनः गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि काल २० ए
कर्म्मतमोरुद्धं पुनरध्यगमद्विभुः ३० विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः लीनप्रकृतिनैर्गुण्यादलि
गत्वादसंभवः ३१ निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ३२

क्ष्मलिंगशरीरस्य विद्यमानत्वात् ... तस्मान्नैर्गुण्यात् गुणकार्यलिंगनिवृत्तिः अलिंगत्वात् असंभवः सम्यग्भोगाय भवतीति पुनः पुनः
रिति संभवः स्थूलशरीरं नास्ति ... अभावात् संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य सः अर्जुनः विशोकोऽजा
यत ॥ ३१ ॥ एवं तेषां मार्गं कालरूपं यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मरन् स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः ३२

भा०प्र० ६५

तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासा इति द्वाभ्यां बद्धवाक् ४३ अनवेक्षमाणोऽननुरक्तः दिदृक्षतीत्यमकुर्वन् आशां दिशं गतपूर्वां पूर्वैः प्रविष्टां ४४ एतो याद्दिशं ४५ अथ मे भिन्नपश्यतेन साधुकृताः सर्वेऽर्थाः धर्मादयो यैः अत एव वैकुंठस्य चरणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा ४६ ४७ कथंभूतं पदं विधूतकल्मषाणां स्थानं निवासस्थानं यत तस्मिन् विरजेनात्मनैव प्राप्तुः ननु षोडशकलेन लिंगेन गतेर्वा विप्राप्यं विरजेनात्मनैवावस्थानरूपां गतिं ते विधूतकल्मषाः

चीरवासा निराहारो बद्धवाक् मुक्तमूर्धजः दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ४३ अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ४४ हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ४५ कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः मनसा धारयामासुर्वैकुंठचरणांबुजं ४६ तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे तस्मिन्नारायणपदे एकांतमतयो गतिम् ४७ अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः विधूतकल्मषा स्थानं विरजेनात्मनैव हि ४८ विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ४९ द्रौपदी च तदाज्ञाय पतीनामनपेक्षतां वासुदेवे भगवति ह्येकांतमतिराप तं ५० ५०

प्रापुरिति ४८ तीर्थान्यटन् प्रभासे श्रीकृष्णावेशेन कृष्णे चित्तमावेश्य देहं परित्यज्य तच्चित्त एव सन् तदानीं नेतुमागतैः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ४९ आत्मानं प्रति अनपेक्षतां तदा ज्ञात्वा अपि तं प्राप ५० ॥ ॥ राम ६५

65

आत्मनःस्वस्य गुणैः सुसमं अतिसदृशं ॥ तोयं सर्वतः स्थितं समुद्रोदकं अवनीवीपरिधानविशेषो यस्याः तस्याः भूमेः पतित्वेनाभि
षिक्तवान् ३८ वज्रं अनिरुद्धस्य पुत्रं नतस्य पद्मकृत्वेत्यर्थः अपि च ॥ आत्मनि आरोपयामास ईश्वरः समर्थः ३९ संछिन्ना।
न्यशेषाणि बंधनानि ऊर्ध्वयोः येन ४० तेद्रक्षणाय तिष्ठाम्यावाचं मनसुपलक्षणं सर्वेन्द्रियाणि मनसि प्रविलापितवानि
त्यर्थः तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् तं प्राणं इतरे अपाने तेनापि कर्मणा ॥ अपानव्यापार उत्सर्गः तत्सहितं

स्वराष्ट्रे पौत्रं विनयिनम् आत्मनः सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेः ॥ अभ्यषिंचद्यदूत्तमः ३८ ॥ मधुरायां तथा
वज्रं सूरसेनपतिं ततः ॥ प्राजापत्यां निरूप्येष्टिम् अग्नीन् अपिबदीश्वरः ३९ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलया
दिकं ॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः ४० ॥ वाचं जुहाव मनसि तत्प्राण इतरे च तं ॥ मृत्यावपानं सो
त्सर्गं तं पंचत्वे ह्यजोहवीत् ४१ ॥ त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ४२

अपानं मृत्यौ तदधिष्ठातृदेवतायां अन्येनैव वा आदिष्ठापितत्कर्मसाहित्यं लेयं तं ॥ मृत्युं पंचत्वे पंचमहाभूतानां ऐक्ये देहो इह स्य
च मृत्युर्नान्मनश्रतिभावित्वानित्यर्थः ॥ अजोहवीदिति यङ्लुगन्तात् लुङ्रूपं [illegible] ४१ त्रित्वे गुणत्रये
पंचत्वं देहं ॥ तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुमविद्यां आत्मनि जुहाव अजोहवीत् इति वक्तव्ये अजुहवीदि
त्यार्षं ॥ एवं शोधितं आत्मानं ब्रह्मणि अव्यये कूटस्थे न तस्यान्यत्र लय इत्यर्थः ४२ ॥

दि

अस्माकमयं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह सार्द्धाभ्यां क्षुद्रमल्पमायुर्येषां [illegible] अतो मर्त्यानां मरणधर्मवं
तां तथापि त्वं सत्यमोक्षमिच्छतां यो मृत्युः स इह सत्रे सामित्रकर्मणि शामित्रकर्मपशुहिंसनं तदर्थमुपहूतः ७ ततः किमत आह न
कश्चिदिति ८ ततोऽपि किमत आह अहो नृलोके हरिकथामृतवचः पीयते यत्तदर्थं हरिलीलैवामृतं यस्मिन् ८ तदभाव
एवं व्यर्थजीवनमित्याह मंदस्य अलसस्य नक्तं रात्रौ यद्वयः आयुस्तन्निद्रया निष्फलं गच्छति दिवा अपि च यद्वयः तद्व्यर्थकर्मभिर

क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ७ न कश्चिन्म्रियते तावद्यावदा
स्त इहांतकः एतदर्थं हि भगवानाहूतः परमर्षिभिः ८ अहो नृलोके पीयेत हरिलीलामृतं वचः यस्मिन्नपी
ते कृतं सर्वमिष्टापूर्त्तादिकं भवेत् ९ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै निद्रया ह्रियते नक्तं दिवा च व्य
१० र्थकर्मभिः ४ सूत उवाच यदा परीक्षित्कुरुजांगलेऽवसन्कलिं प्रविष्टं निजचक्रवर्तिते निशम्य वार्तामन
तिप्रियां ततः शरासनं संयुगशौंडिराददे ११ स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमास्थितः पु
रात् वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः १२

पक्षि मते १० तत्र तावत्कलेर्निग्रहप्रसं
गमाह यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं प्रविष्टं शुश्राव तदा तां अनतिप्रियां वार्तां किंचित्प्रियां च
युद्धकौतुकसंपत्ते निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे संयुगशौंडिर्युद्धे प्रगल्भः पाठांतरे युद्धे शौरिः श्रीकृष्ण राम
तुल्यः ११ ततश्च दिग्विजयाय निर्गतः १२ ६५

इतिएवंपतत्संपयाणं अलंन्प्रतिशयेनस्वरूपयलंभंगलास्पदं अतंपवित्रंच ५। इतिश्रीमत्पंचदशः॥ ततः षोडशेअस्मिन्धर्म
यो: कलिनिग्रहयो: संवादवर्णनेनशासिःपालकस्यपरीक्षितः १ द्विजवर्याणांशिक्षया सूत्यांजन्मनिअभिजातकोविदाः
जातककर्मविदः हेविप्रमहतोगुणायस्मिन्सः जनमेजयादीनित्पत्तराधिकंषोडशं २ आजहारकृतवानित्यर्थः सार
द्वतंकृपंयत्रयधसमेघयुद्ध्वाहष्टिगोचराअभुवत् ३ निजग्राहनिगृहीतवान्कलिमेवनिर्दिशतिनृपेति ४ कस्यहेतोरि
[illegible]
पः अथवायेनतद्भगवत्प्रियाणांपांडुसुतानामितिसंप्रयाणं अथोत्पलंस्वस्त्ययनंयविक्रलध्वाहेरोअभक्तिमुपैतिसिद्धिः ५।
इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेपंचदशोध्यायः॥१५॥ सूत उवाच॥ ततः परीक्षिद्विजवर्यशिक्षया
महींमहाभागवतःशशासह यथाहिसूत्यामभिजातकोविदाःसमादिशन्विप्रमहद्गुणस्तथा १ सउत्तरस्यतनयामुप
येमइरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयन्सुतान् २ आजहाराश्वमेधांस्त्रीन्गंगायांभूरिदक्षिणान् ।
शारद्वतंगुरुंकृत्वादेवायत्राक्षिगोचराः ३ निजग्राहौजसावीरःकलिंदिग्विजयेक्वचित् नृपलिंगधरंशूद्रंघ्नं
तंगोमिथुनंपदा ४ शौनक उवाच॥ कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः नृदेवचिह्नधृक्शूद्रकोसौ
गांयःपदाहनत् ५ तत्कथ्यतांमहाभागयदिकृष्णकथाश्रयं अथवास्यपदांभोजमकरंदलिहांसतां किमन्यैरस
दालापैरायुषोयदसद्व्ययः ६

ति अयमर्थः कलिंकस्माद्धेतोः केवलंनिजग्राहनतुहतवान् यतश्चासौशूद्रकः अतिकु
त्सितः योगांपदाअहनत् अहन्निति ५ अस्यविष्णोः पदांभोजयोर्यामकरंदः तंलिहंति आस्वादयंतियेतेषांसतामेतावाकथा
श्रयं मितिसमासान्निरूपस्यानुषंगः नोचेत्किंप्रयोजनं किमन्यैरसद्भिरालापैः यतेरायुषोव्ययोद्व्ययः ६ ६

रा० पु० तेऽस्मात्मनोदेहस्यच पिबाहिरामयोनलब्धेनेतयाणंत मध्येऽपि पीडाः यस्याः तां त्वामालक्षयेकेनयत्नेनविछायासिभ्रमतईयतत्रायतांवे
६६ वर्णं भजतामुरूपनलिंगेनतत्रकारणं निकल्पयतत्पृच्छति दूरेवंध्रुमित्यादिपंचभिः दूरेस्थितंबंध्रु १८ त्रिभिपादैन्यूनंत्रयताणेकपादं
मात्रांस्थलेः अधर्मिष्ठैः कृतं इंभोक्षमाणं तुरुत्वमात्मपदविशेषमाणत्वात् हृतायत्त्वमागाम्भीयत्राधिकरणात् २० हेउर्विदिष्ट्विमत्रैभिरर
क्षमाणाः स्त्रियः पितृभिररक्षमाणान्बालान्प्रत्युतेतरेकपुरुषादौरवनिर्दयैः आर्तान्क्लिष्टान्दात्वंदेवीसरस्वतीकिंकुकर्माणिदुराचारे

66

धर्मेउवाच ॥ कच्चित्तु भेद्रनामयमात्मनस्तेविछायासिम्लायतेषन्मुखेन आलक्षये भवतीमंतराधिंदूरे वंधुंशोचसि
कंचनांव १९ पादैन्यूनंशोचसिमेकपादमात्मानं वावृषलैर्भोक्ष्यमाणं आहोसुरादीन्हृतयज्ञभागान्प्रजाउतस्वित्म
घवत्स्ववर्षति २० अरक्ष्यमाणाःस्त्रियउर्वि बालान्शोचस्यथो पुरुषादैरिवार्त्तान् वाचंदेवींब्रह्मकुलेकुकर्मण्यब्रह्मण्ये
राजकुलेकुलाग्र्यान् २१ किंक्षत्रबंधून्कलिनोपसृष्टान्राष्ट्राणिबातैरवरोपितानि इतस्ततोवाशनपानवास स्नान
व्यवायोन्मुखजीवलोकं २२ यद्वांबतेभूरिभरावतारकृतावतारस्यहरेर्धरित्रि अंतर्हितस्यस्मरतीविसृष्टाकर्माणि
निर्वाणविलंबितानि २३ इदंममाचक्ष्वतवाधिमूलंवसुंधरे येन विकर्षितासि कालेनवातेबलिनांबलीयसासुरा
र्चितंकिंहृतमंबसौभगम् २४

स्थितंकुलाग्र्यान्ब्राह्मणेनमानेसेवकान् २१ उपसृष्टान्व्याप्तान् तैरेवअवरोपितानिउद्धास्ति
इत्यस्ततः तानि व्यवायो मैथुनं निषेधानादरेणसर्वतोपानादि भून्मुखं वर्तमानं जीवलोकंवा २२ हे अंबमम हेधरित्रि तैर्वयोभूरिभारस्तस्यावता
रणार्थं कृतावतारस्यकर्माणिस्मरंतीतेनविसृष्टासतीशोचसिनिर्वाणंविलंबितंआश्रितं येषुतानि पाठांतरे निर्वाणंविडंबितंउ राम
पहसितं यैः मोक्षादप्यधिकसुखैनिइत्यर्थः २३ हेअंबतेसौभाग्यंकालेनवाहृतम २४ ॥ ॥ २४ ६६

त

१

भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरसमुद्रलग्नानि वर्षाणि मेरोः सर्वतः इलावृतं तत उत्तरतो रम्यकं हैरण्वयं च दक्षिणतो
हरिवर्षं किंपुरुषं च तानि विजित्य ११ प्रगीयमानयशाः यशोदानिष्ठावन्तं तमोदृढावितिर्नितयिणां च यः १३ १४ १५ १६
किंच स्निग्धधूपांडुवर्षं दिक्षायीनिसारथ्यादीनि कर्माणि तानि निश्चयवन् तथा विष्णो ऊर्गत्कर्तु कांप्रणतिं च श्रावन्
भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं १२ तत्र तत्रोप शृण्वा
नः स्वपूर्वेषां महात्मनां प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं १४ आत्मानं च परित्रातम् अश्वत्थाम्नो ऽस्त्रतेजसः
स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे १५ तेभ्यः परमसंतुष्टः प्रीत्युज्जृम्भितलोचनः महाधनानि वासांसि ददौ
हारान्महामनाः १६ [illegible]
सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भ
क्तिं करोति नृपतिश्चरणारविंदे १७ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिम न्वहं नातिदूरे किलाश्चर्यं यदासीत्तन्निबो
२ धमे १८ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गां पृच्छति स्माश्रुवदनां विवत्सामिव मातरं २१ ॥ ॥

नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिं करोति सम्यक्पारषदमितिरेकवकारयोर्विश्लेषश्छांदसः तत्र पार्षदं समाप
तित्वं सेवनं चित्तानुवृत्तिः वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणं ७ वृत्तिमनुवर्तमानस्य नातिदूरे श्रीधर्मेव
१८ धर्मो वृषरूपः विच्छायां हतप्रभां गां गोरूपां पृथ्वीं विवत्सां नष्टापत्यां १७ ।

भा०प्र० ६७ तस्य विरहो दुःसह इत्याह चतुर्भिः ब्रह्मादयो यस्याः श्रियः अपांगमोक्षः स्वस्मिन्दृष्टिपातः तत्कामाः सन्तः बहुतिथं बहुकालं तपः
समचरन् सम्यक्चेरुरिति स्म भगवद्भिरुत्तमैः प्रपन्ना आश्रिता अपि सा श्रीर्यस्य पादलावण्यं अलमत्यंतमनुरक्ता सती सेवते ३२ त
स्य भगवतः श्रीमद्भिः पदैः केतुर्ध्वजः अब्जादयो केताः चिह्नानि येषां तैः यद्वा अब्जादीनां आश्रयैः सम्यगलंकृतमंगं यस्याः सा
हं ततो भगवतः विभूतिं संपदं उपलभ्य प्राप्य त्रीन् लोकान् अतिक्रम्य अरोचे शोभितवत्यस्मि पश्चात्तु तस्याविभूतेरंते ओगाको

67

ब्रह्मादयोबहुतिथंयदपांगमोक्षकामास्तपःसमचरन्भगवत्प्रपन्नाः साश्रीस्ववासमरविंदवनंविहाययत्पा
दसौभगमलंभजतेनुरक्ता ३२ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतःसमलंकृतांगीत्रीं
नत्यरोचउपलभ्यततोविभूतिंलोकान्समांव्यसृजदुत्स्मयतींतदंते ३३ योवैममातिभरमासुरवंशराज्ञामक्षौ
हिणीशतमपानुददात्मतंत्रः त्वांदुःस्थमूनपदमात्मनिपौरुषेणसंपादयन्यदुषुरम्यमबिभ्रदंगं ३४ ॥ ॥

लेपाक्षे सति उत्स्मयंतीं गर्वं कुर्वाणां मां सव्यसृजत् त्यक्तवान् ३३ किंच यो वै आसुरो वंशो राज्ञां अक्षौहिणीशतरूपं येषांतेषां
ममातिभरं भारं अपनीतवान् त्वां च अपदत्वात् दुःस्थं संतं पौरुषेण पुरुषकारेण आत्मनि स्वस्मिन्संपूर्णपदं स्वस्थं सं
पादयन् लक्षणहेतोः क्रियाया इति हेतौ शतृप्रत्ययः संपादयितुमित्यर्थः यदुषु अंगं अबिभ्रत् धृतवानित्यर्थः ३४ ॥ ३४ राम ६७

भवान्जानात्येवतथापिवदामीत्याह हेधर्म्म येनेहतुभूतेनत्वंचतुर्भिःपादैर्वर्त्तसेयस्मिंश्चसत्यादयोमहागुणानवियंतितनदी
यते तेनश्रीनिवासेनरहितंलोकंशोचामीतिषण्णामन्वयः २५ सत्यंयथार्थभाषणं शौचंशुद्धत्वं दयापरदुःखासहनं क्षांतिःक्रोधप्रा
प्तौचित्तसंयमनं त्यागःअर्थिषुमुक्तहस्तता संतोषः अलंबुद्धिः आर्जवमवक्रता शमोमनोनैश्चल्यंदमोबाह्येंद्रियनैश्चल्यं तपः
स्वधर्मः साम्यंशत्रुमित्राद्यभावः तितिक्षापरापराधसहनं उपरतिर्लाभप्राप्तावौदासीन्यं श्रुतंशास्त्रविचारः २६ ज्ञानमात्मविषयं वि
रक्तिर्वैतृष्ण्यमैश्वर्यंनियंतृत्वं शौर्यंसंग्रामोत्साहः तेजःप्रभावः बलंदक्षत्वं स्मृतिःकर्त्तव्यार्थानुसंधानं स्वातंत्र्यमपराधीनता कौ

धरण्युवाच भवान्हिवेदतत्सर्वंयन्मांधर्मानुपृच्छसि चतुर्भिर्वर्त्तसेयेनपादैर्लोकसुखावहैः २५ सत्यंशौचंद
याक्षांतिस्त्यागःसंतोषआर्जवं शमोदमस्तपःसाम्यंतितिक्षोपरतिःश्रुतं २६ ज्ञानंविरक्तिरैश्वर्यंशौर्यंतेजोबलंस्मृ
तिः स्वातंत्र्यंकौशलंकांतिर्धैर्यंमार्दवमेवच २७ प्रागल्भ्यंप्रश्रयःशीलंसहओजोबलंभगः गांभीर्यंस्थैर्यमास्तिक्यं
कीर्त्तिर्मानोनहंकृतिः २८ एतेचान्येचभगवन्नित्यायत्रमहागुणाः प्रार्थ्यामहत्त्वमिच्छद्भिर्नवियंतिस्मकर्हिचि
त् २९ तेनाहंगुणपात्रेणश्रीनिवासेनसांप्रतं शोचामिरहितंलोकंपाप्मनाकलिनेक्षितं ३० आत्मानंचानु
शोचामिभवंतंचामरोत्तमं देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३१ ॥ ॥

शलंक्रियानिपुणता कांतिःसौंदर्यं धैर्यमव्याकुलता मार्दवंचित्तार्द्रताअकाठिन्यं २७ प्रागल्भ्यंप्रतिभातिशयः प्रश्रयोविनयःशीलंसुस्वभावः।
सहओजोबलानिमनसःज्ञानेंद्रियाणांकर्मेंद्रियाणांचपाटवानि भगःभोगास्पदत्वं गांभीर्यमक्षोभ्यत्वं स्थैर्यमचंचलता आस्ति
क्यंश्रद्धा कीर्त्तिर्यशःमानःपूज्यत्वं अनहंकृतिर्गर्वाभावः एतएकोनचत्वारिंशत् २८ अन्येचब्रह्मण्यत्वशरण्यत्वादयोमहांतोगु
णायस्मिन् श्रीनिवासेनित्याःसहजाः नवियंतिनव्यंतितस्मिन् २९ तेनगुणपात्रेणगुणालयेन पाप्मनापापहेतुना ३० ३१ ॥

कै

भा॰ पु॰ हंसि घातयसि राजाहं इति चेत्तत्राह नटइव वेषमात्रेण नरदेवोसि कर्म्मणा तु अद्विजः शूद्रः ५ अशोच्यान्निरपराधान् रहसि त्वं
६०. यं प्रहरसि अतएव शोच्यः सापराधोसि अतो वधमर्हसि ६ वृषं प्रत्याह त्वं वाकः स्वयमेव संभावयति किं कश्चिद्देवो वृषरूपे
णास्मान्परिखेदयन्वर्त्तसे ७ दोर्दण्डैः परिरंभितं विधिवद्रक्षितं तत्र शुचः अश्रूणि विना अन्येषां अश्रूणि नानुपतन्ती तिरेव
देहः तु त्वं दर्शितं ८ एवमुक्त्वा पुनरपि शोचंतं प्रत्याह मा सौरभेय पुनर्मा शुच शोकं मा कुरु व्येतु अपयातु गां प्रत्याह अंब

कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली नरदेवोसि वेषेण नटवत्कर्मणाद्विजः ५ यस्त्वं कृष्णे गते दूरं सहगां
डीवधन्विना शोच्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ६ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् वृषरूपेण
ख किं कश्चिद्देवो नः परिखेदयन् ७ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते भूतलेनुपतंत्यस्मिन्विना ते प्राणिनां
शुचः ८ मा सौरभेयात्र शुचो व्येतु ते वृषलाद्भयं मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ९ यस्य राष्ट्रे प्रजाः सर्वास्त्र
स्यंते साध्व्यसाधुभिः तस्य मत्तस्य नश्यंति कीर्त्तिरायुर्भगो गतिः १० एष राज्ञां परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः अत
एनं वधिष्यामि भूतद्रुहमसत्तमं ११ कोवृश्चत्तव पादांस्त्रीन्सौरभेय चतुःपदः माभूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णा
नुवर्त्तिनां १२ आख्याहि वृष भद्रं वः साधूनामकृतागसां आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्तिदूषणं १३

मातः शास्तरि मयि जीवति सति ते भद्रमेव अंबेति मा रोदीः ९ मम हितार्थमेवैनं हनिष्यामि न तु वो पकारायेत्याह यस्येति द्वाभ्यां हे सा
ध्वि सर्वाः काश्चिदपि त्रस्यंति असाधुभिः त्रस्यंते पीड्यंते इत्यर्थः भगो भाग्यं गतिः परलोकः १० पुनरपि शोचंतं वृषं प्रत्याह
कः अवृश्चत् अच्छिनत् त्वादृशाः त्वद्विधाः दुःखिताः १२ वो भद्रमस्तु आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवंतं कीर्त्तिदूषयंतं
राम
६०

त्रि

तस्याविरहं कावासहेत प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैर्मधुमानिनीनां सत्यभामादीनां समानं गर्वेसहितं स्थैर्यं धैर्यं च यः
अहरत् यस्यांघ्रिरजस्सुल्यितेन विटंकितायाः अलंकृतायाः सस्यादिमिषेण रोमोत्सवो भवति ३५ कथयतोः सतोः प्राचीं पूर्ववाहि
नीं कुरुक्षेत्रे ३६ इति प्रथमे षोडशः ॥ व्याख्यानतत्त्वमात्रदशेरात्ता कलेर्निग्रह उच्यते तत्रैषवंबीपमाजीपिवेराग्यं बहुमङ्कृते २
हन्यमानं ताड्यमानं १ मृणालं पद्मतंतुः ३ तद्वद्धवलं भयान्मेहंतं मूत्रयंतं इवेनेन पदावशेषो धर्मो भयान्मूत्रयन्निव

वं

कावासहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः स्थैर्यं समानमहरन्मधुमानिनीनां रोमो मा
त्सवो मम यदंघ्रिविटंकितायाः ३५ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा परीक्षिन्नाम राजर्षिः प्राप्तः
प्राचीं सरस्वतीं ३६ इति श्रीभागवते महापुराणे प्रथमस्कंधे षोडशोध्यायः १६ सूत उवाच तत्र गोमिथुनं रा
जा हन्यमानमनाथवत् दंडहस्तं च वृषलं ददृशे नृपलांछनं १ वृषं मृणालधवलं मेहंतमिव बिभ्यतं
वेपमानं पदैकेन सीदंतं शूद्रताडितं २ गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां विवत्सामश्रुवदनां क्षा
मां यवसमिच्छंतीं ३ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदं मेघगंभीरया वाचा समारोपितकार्मुकः ४

प्रतिक्षणं क्षीयमाणांशाः तस्याप्युनिर्वाहात् कंपमान इवेति दर्शितं २ धर्मदुघां हविर्दोग्ध्रीं क्षामां कृशां यवसं तृणं अत्र
अपि तस्याः दिप्रसवदनयात् विवत्सत्वयज्ञाभावात् कृशात्वं तत एव यज्ञभागमिच्छंतीं पृथ्वीति सूचितं ३ कार्तस्वरं सुवर्णं
परिच्छदः परिकरो यस्य सुवर्णनिबद्धमित्यर्थः सज्जीकृतकार्मुकः ४ ॥ ४

भा॰पु॰ केष्वपि सेश्वरेष्वपीति दुर्लभत्वं दर्शितं निश्चय इति सिद्धांतत्वं अप्रतर्क्यात् मनोगोचरत्वात् अनिर्देश्यात् वचनागोचरात् परमेश्वरात्
६८ वै भवतीति विमृश विचारय स्वबुद्ध्या २० विखेदः गतमोहः पर्यचष्ट प्रत्यभाषत ज्ञातवानिति वा २१ अनिर्दिष्टमिव ब्रुवन् घातकं
जानन्नपि न वदति न सूचयति इत्यत आह धर्मं ब्रवीषि अतो धर्मोऽसि सूचने को दोष इत्यत आह यदिति स्थानं नरकादि २२ एवमत्र
मादप्यकथनं भवतीत्याह अथवेति देवस्य मायाया गतिर्बोध्यघातकलक्षणा वृत्तिः भूतानां चेतसो वचसश्चागोचरा सुज्ञेया न भवती

अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः अत्रानुरूपं राजर्षे विमृश स्वमनीषया २० सूत उवाच ॥ एवं धर्मे
69 प्रवदति स सम्राड् द्विजसत्तम समाहितेन मनसा विखेदः पर्यचष्ट तं २१ राजोवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मो
ऽसि वृषरूपधृक् यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् २२ अथवा देवमायाया नूनं गतिरगोचरा चेतसो व
चसश्चापि भूतानामिति निश्चयः २३ तपः शौचं दया सत्यमिति पादाः कृते कृताः अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदै
स्तव २४ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः २५ ॥ श्री

23 निश्चयः धर्मोऽसाविति ज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह तप इति द्वाभ्यां अधर्मपादैस्तव त्रयः पादास्त्रिभिरंशैर्भग्नाः स्म
यो विस्मयः २४ इदानीं कलौ हे धर्म ते पादः चतुर्थांशः तत्रापि सत्यमेवास्ति यतः सत्याद्भवानात्मानं निर्वर्त्तयेत् कथंचिद्धारयेत् य
द्वा पुरुषस्त्वां साधयेत् तमपि पादं अनृतेन संवर्द्धितः कलिर्नूपायमधर्मो ग्रहीतुमिच्छति तत्रेयं स्थितिः कृतयुगे प्रथमं संपूर्णश्च राम
तुष्पाद्धर्मः त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यं इत्येवं चतुर्थांशो हीयते द्वापरे त्वर्द्धं ६८
कलौ चतुर्थांशो ऽवशिष्यते सोऽप्यंते नश्यतीति २५

ननु तवाभयप्रदाने कृते कथं भद्रं स्यादित्यत आह यस्मादनागस्सु जनेषु यः आगः स्वयं जनः कुर्वन् भवति अस्य एवंभूतस्य मत्तः सकाशात्स्वर्गे
अपि भयं भवति ततः साधूनां भद्रं भवेदिति १४ एतस्य दंडे अहमसमर्थः इति माशंकीः इत्याह आगस्कृत् अपराधकर्त्ता तस्यामर्त्यस्य
देवस्यापि भुजं आहर्त्तास्मि आहरिष्यामि सांगदमित्यनेन नमलत्तअपाद्याहरिष्यामि इति निदर्शितं १५ नन्वेकस्य निग्रहेणान्यस्यानुग्रहेत
नव किं प्रयोजनं तत्राह राज्ञो हीति अन्यान् अधर्मिष्ठान् शासतो दंडयतः १६ आर्त्तानां अभयं यस्मात्तद्वचः वो युक्तं उचितमेव १७
वयं तु यतः पुरुषात् क्लेशानां हेतवो भवेयुः तं पुरुषं न जानीमः यतः वादिनां वाक्यभेदैः विमोहिताः वाक्यभेदानेवाह विकल्पभेदं १८

जनेनागस्यघं पुंजन् सर्वतोऽस्य च मद्भयं साधूनां भद्रमेव स्यादसाधुदमने कृते १४ अनागस्स्विह भूतेषु य आगस्कृ
न्निरंकुशः आहर्त्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदं १५ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं शासतोन्या
न्यथाशास्त्रमनापद्युत्पथानिह १६ धर्म उवाच एतद्वः पांडवेयानां युक्तमार्त्ताभयं वचः येषां गुणगणैः कृष्णो
दौत्यादौ भगवान्कृतः १७ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः २८
१८ केचिद्विकल्पवसना आहुरात्मानमात्मनः दैवमन्ये परे कर्म स्वभावमपरे प्रभुं १९ ॥ ॥ ९

वसनेन आच्छादयन्ति ये योगिनः ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदं आहुः तदुक्तं आत्मैव ह्यात्मनो बंधुः आत्मैव
रिपुरात्मनः इति यथा विकल्पैः कुतर्कैः आच्छन्ना नास्तिकाः एवं हि ते वदंति ग्रहादिदेवतादीनां प्रभुत्वं कर्माधीनत्वात् न च
कर्मणः स्वाधीनत्वात् अतः स्वय एव प्रभुः न चान्यः कश्चिदिति अन्ये दैवज्ञाः दैवं ग्रहादिरूपं दैवतं परे तु मीमांसकाः कर्म अपरे लो

इज्यायागस्तद्रूपामूर्त्तिर्यस्यशंक्षेमंकामांश्चअनन्विंदुद्वादयोदेवाइज्यंतेनतुहरिरित्यत्राह एषसर्वस्यात्मादानामात्मेति तथापिजीवत्वन्नप
रिच्छिन्नइत्याह अंतर्वहिरितियथावायुः प्राणरूपेणांतःस्थोपिवहिरप्यस्तितद्वत् सर्वांतर्यामीश्वरोपीति ३४ उद्यतासिंउद्यतखड्गं
दंडपाणिंयमं उद्यतंउद्युक्तं ३५ अत्रनवत्स्यामीतियातवाज्ञातयायत्रक्वापिवत्स्यामिकिंतुतत्रतत्रापित्वामात्तःगृहीतःइषुःशरासन
स्त्वामेवलक्षये ३६ तत्तस्मान्नियतोनिश्चलोवत्स्यामि ३७ पानंमद्यादेःस्यानंस्त्रूनाप्राणिवधः द्यूतेअनृतं पानेमदः स्त्रैणेमदोदया

70

यस्मिन्हरिर्भगवानिज्यमानइज्या मूर्तिर्यजतांशंतनोति कामानमोघान्स्थिरजंगमानामंतर्वहिर्वायुरिवै
षआत्मा ३४ सूतउवाच॥परीक्षितैवमादिष्टःसकलिर्जातवेपथुः तमुद्यतासिमाहेदंदंडपाणिमिवो
द्यतं ३५ कलिरुवाच॥यत्रक्वचनवत्स्यामिसार्वभौमतवाज्ञया लक्षयेतत्रतत्रापित्वामात्तेषुशरासनं
३६ तन्मेधर्मभृतांश्रेष्ठस्थानंनिर्देष्टुमर्हसि यत्रैवनियतोवत्स्यआतिष्ठंस्तेनुशासनं ३७ सूतउवा
रे च अभ्यर्थितस्तदातस्मैस्थानानिकलयेददौ द्यूतंपानंस्त्रियःस्नूनायत्राधर्मश्चतुर्विधः ३८ ३८

नाशकत्वेनोक्तः अत्रतुगर्वं द्यूतात्तपोनाशकत्वेन स्त्रीषुसंगः हिंसायांक्रौर्यंदयानाशकमितिज्ञेयंयद्यपिसर्वंसर्वत्रसंभव
ष्टांसं ति तथापिप्राधान्येनानृतादीनांद्यूतादिषुयथायोग्यं द्वादशस्कंधेतुसत्यंदयात्तपोदानमिति पादाश्चैवनपेत्यत्रदानशब्देनशौच
मेवोक्तं मनःशुद्धिरूपत्वाद्दृत्तामयप्रदानस्येतित्रेतायांधर्मपादानांतुर्यांशोह्यतेशनैरधर्मपादैरनृतहिंसाऽसंतोषविग्रहैरित्य
त्रचअसंतोषशब्देनतस्यहेतुः गर्वोलक्ष्यते विग्रहशब्देनचतत्तद्धेतुस्त्रीसंगश्चविशेषः ३८ ॥ ॥ ॥

न्यासितः अन्योन्यपादारोपणेनावतारितः उरुर्भारो यस्याः कृतं कौतुकं मंगलं यस्याः २६ अश्रूणां कलाः कणा मुंचतीत्यश्रुकला तेनास्य
का सती शूद्रा भोक्ष्यंति मामिति शोचति २७ निशातं निशितं अधर्मस्य हेतुः यः कलिस्तं हंतुमित्यर्थः २८ अभिप्रेत्य ज्ञात्वा २९
शरण्य आश्रयार्हः श्लोक्यः सत्कीर्त्यर्हः ३० गुडाकेशोऽर्जुनः तस्य यशोधराणां पांडवानां बद्धांजलिर्येन तस्य ते किंतु

च इत्येवं भूर्भगवता न्यासितोरुभरा सती श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका २६ शोचत्यश्रुकला साध्वी
दुर्भगेवोज्झिता धना अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति २७ सूत उवाच॥ इति धर्मं महीं चैव सां
त्वयित्वा महारथः निशातमाददे खड्गं कलयेऽधर्महेतवे २८ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं तत्पा
दमूलं शिरसा समगाद्भयविह्वलः २९ पतितं पादयोर्वीरः कृपया दीनवत्सलः शरण्यो नावधीच्छ्लोक्य आ
६ ह चेदं हसन्निव ३० राजोवाच॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचन न वर्तितव्यं भवता कथं
चन क्षेत्रे मदीये त्वमधर्मबंधुः ३१ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा
च माया कलहश्च दंभः ३२ न वर्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवि यज्ञे
तानविज्ञाः ३३

कथंचन केनाप्यंशेन न वर्तितव्यं अयं लोको न व्यापनीयः यस्मात्त्वमधर्मस्य बंधुः ३१ तदेवाह राजदेहेषु वर्तमानं त्वामनु सर्वतः प्र
वृत्तः अनार्यं दौर्जन्यं अंहः स्वधर्मत्यागः ज्येष्ठा अलक्ष्मीर्माया कपटं ३२ ततस्माद्वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्तदेशे न वर्तितव्यं यत्र

यज्ञवितानविज्ञाः संगतः इति शेषः ॥

भा॰पु॰ ७२ राज्ञस्तक्षकदंशेन तस्य ब्रह्मशापेन निरूप्यते स चानुग्रह एवास्य जातो वैराग्यमावहन् १ परिक्षितो निर्याणमत्याश्चर्यं तत्र भावनापजन्मा
श्चर्यमनुस्मारयति यो वा इति विप्लुष्टो निर्दग्धः सः १ ब्रह्मकोपादुत्थितात्तक्षकात् प्राणविप्लवः प्राणनाशस्तत्कृभयं तस्मान्न संमुमो शतव २
ह अत्र हेतुः यस्तु भगवत्यर्पिताशय इति २ किंच उत्सृज्येति वैयासिकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिः स्वरूपं
येन सः ३ न चैतच्चित्रमित्याह उत्तमश्लोकस्य वार्ता येषु अत एव नित्यं तत्कथामृतं जुषतां संभ्रमो न स्यात् ४ तस्मिन्रा॰

सूत उवाच। यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः १ ब्रह्मकोपोत्थि
ताद्यस्तु तक्षकात्प्राणविप्लवात् न संमुमोहोरुभयाद्भगवत्यर्पिताशयः २ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थि
तिः वैयासिकेर्जहौ शिष्यो गंगायां स्वं कलेवरं ३ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतं स्यात्संभ्रमोंतका
त लेपि स्मरतां तत्पदांबुजं ४ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः यावदीशो महानुर्व्यामाभिमन्यव एक
राट् ५ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः ६ नानुद्वेष्टि कलिं स
म्राट् सारंग इव सारभुक् कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् ७ ॥ ॥

ज्ञि मुक्तवांतन्न चित्रं इत्याशयेनाह तावदिति आभिमन्योः पुत्रः एकराट् चक्रवर्ती ईशः पतिः यावत् ५ ननु दोर्नेकलेरप्रवेश एवास्तु
प्रविष्टोपि न प्रभवेदिति कुतः तत्राह यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः अधर्मस्य प्रभवो यस्मिन् ६
ननु अधर्महेतुं कलिं सर्वथा किं न हतवान् तत्राह नानुद्वेष्टीति सारंगो भ्रमर इव सारग्राही सारमाह यस्मिन्कुशलानि पुण्यानि राम
आशु संकल्पमात्रेण फलंति इतराणि पापानि तु आशु न सिध्यंति यतस्तानि कृतान्येव सिध्यंति न तु संकल्पमात्रेण ७ ॥ ७ ॥ १ ७२

चतुर्विधस्याप्यस्य कैतवान स्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् ततः सुवर्णदानात् अनृतं मदं काममिति स्त्री पुंसंग रज इति रजो
मूलां हिंसा एतानि चत्वारि पंचमं वैरं चादादिति ३९ अमूनि अमूष्वेषु स्थानेषु न्यवसदित्यर्थः ४० अथैतानि हेतोः बुभूषुः उद्भवेतुमिच्छुः स्त्री सुवर्ण
योः सेवनं नाम तयोरनाशक्तिः ४१ एवं कलिनिग्रहमुक्त्वा पादानां प्रतिसंदधे तप आदिनि प्रवर्तितवानित्यर्थः ४२ मुख्यदीयसत्रप्रवृत्तिनिमित्त

पुनश्च याचमानाय जातरूपमदात्प्रभुः ततोऽनृतं मदं कामं रजो वैरं च पंचमं ३९ अमूनि पंच स्थानानि ह्यधर्मप्रभवः
कलिः औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ४० अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् विशेषतो धर्म
शीलो राजा लोकपतिर्गुरुः ४१ वृषस्य नष्टांस्त्रीन्पादान् तपः शौचं दयामिति प्रतिसंदध आश्वास्य महीं च
समवर्धयत् ४२ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ४३ आस्ते
ऽधुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ४४ इत्थंभूतानुभावोयम
भिमन्युसुतो नृपः यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ४५ इति श्रीभा॰ महापुरा॰ प्रथम॰ सप्तदशोध्याय ७

प्रभावोदेवेत्याह एतर्हि इदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छता उपन्यस्तं समर्पितं आसनमध्यास्ते ४३ अधुना पालयत इति
वर्तमानसामीप्ये वर्तमानवन्निर्देशः स्मत्यध्याहाभावो ४४ सत्रायसत्रं कर्तुं दीक्षिताः दीक्षां कृतवंतः ४५ इति प्रथमे सप्तदशः॥१७॥ :.।

एवंसत्संगममभिनंद्य श्रवणौत्सुक्यमाविःकरोति कोनामेति रसवित्रसज्ञः महत्तमानामेकांतेन परं अयनं आश्रयो यः तस्य क
थायां अगुणस्य प्राकृतगुणरहितस्य कल्याणगुणानामंतं ये योगेश्वरास्तेपि न जग्मुः एतावंत इति न परिगणयांचक्रुः भवः शिवः
पाद्मो ब्रह्मा च मुख्यो येषां ते १४ नोऽस्माकं मध्ये भगवान् प्रधानो सेव्यो यस्य सः भवान् नः सुश्रूषतां हरेश्चरितं विस्तारयतु १५
तत्र शुकपरीक्षित्संवादं कथयिष्यन्नाह सवा इति द्वाभ्यां वैयासकिना शब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेन अपवर्ग

कोनाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममु
ख्याः १४ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु
विद्वन् १५ स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ज्ञानेन वैयासकिशब्दितेन भेजे खगेंद्र
ध्वजपादमूलं १६ तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नं
पारीक्षितं भागवताभिरामं ७

इत्याख्यायस्य तत् खगेंद्रध्वजस्य हरेः पादमूलं भेजे १६ तत् असंवृतार्थं यथा तथा आख्याहि तदेव निर्दिशति परीक्षितं क
थितं पारीक्षितं आख्यानं श्रीभागवतं पुराणं परं पुण्यं सत्त्वशोधकं अत्यद्भुते योगे निष्ठा यस्य अनंतस्याचरितैः उपपन्नं राम
युक्तं अतएव भागवतानां अभिरामं प्रियं एतैर्विशेषणैः कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितम् ७ ॥ ७ ७२

ननुदोषाधिक्यात्कृष्णएवयुक्तः नधीरेषु तस्याकिंचित्करत्वादि त्याह किंतुतेनभवेत्बालेषुअधीरेषुअप्रमत्तः अविहतःसन्योवृक
इववर्त्तते ८ पारीक्षितमाख्यानं अपृच्छतपृष्टवंतोयूयं ९ किंबहुनानेरेरे तावदेवकर्तव्यमितिसर्वशास्त्रसारं कथयति यायाइ
ति कथनीयानिउरूणिकर्माणियस्य तस्यगुणकर्मविषयाबुभूषुभिः सद्भावमिच्छद्भिः १० पुनर्विस्तरेणकथनार्थंसूतोक्तिं तत्संग
ति चाभिनंदंतिसूतेति त्रिभिः शाश्वतीःसमाः अनंतान्वत्सरान् जीवअमृतंतयोगाद्वितीयायतस्त्वंश्रीकृष्णस्यविशुद्धंयशः कीर्तयसित्वा

किंतुबालेषुशूरेणकलिनाधीरभीरुणा अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्त्तते ८ उपवर्णितमेतद्वःपुण्यंपारीक्षि
तंमयावासुदेवकथोपेतमाख्यानंयदपृच्छत ९ यायाःकथाभगवतःकथनीयोरुकर्मणः गुणकर्माश्रयाःपुं
भिःसंसेव्यास्ताबुभूषुभिः १० ऋषयऊचुः सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः यस्त्वंशंससिकृष्णस्य
मर्त्यानाममृतंहिनः ११ कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान् आपाययतिगोविंदपादपद्मासवंमधु
१२ तुलयामलवेनापिनस्वर्गंनापुनर्भवं भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः १३ ॥ ॥ १३

स्माकंमर्त्यानाममृतंमरणनिवर्तकं ११ किंच अस्मिन्कर्मणियज्ञे अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येनफलनिश्चयाभावा
त् धूमेनधूम्रोविवर्णश्च आत्माशरीरंयेषांतान् अस्मान्कर्मणिष्ठानासवंमकरंदंमधुमधुरं १२ भगवत्संगिनोविष्णुभक्तास्ते
षांसंगस्यलवः अत्यल्पकालः तेनापिस्वर्गंनतुलयामः सममपिनपश्यामः नचापवर्गसंभावनायांलोके मर्त्यानांतुच्छाआशिषोरा
ज्याद्यानतुल्याभवंतिकिमुतवक्तव्यं १३

धीराः उढं दृढं संगं त्यक्त्वा परमकाष्ठा यत्र तदा ह्यस्मिन्न हिंसा उपशमश्च. भाविको धर्मः २२

अथेत्यर्थांतरे यस्य पादनखादवसृष्टं निःसृतमपि विरंचिनोपहृतं समर्पितं अर्हणांभः अर्घोदकं ईशसहितं जगत्पुनाति विरंच्योपहृतं से शमिति चतयोरप्युपासकत्वमुक्तं तस्मात् मुकुंदव्यतिरिक्तः को नाम भगवत्पदसार्थः सर्वेश्वर इत्यर्थः २१ २२ एवं स्वभाग्यमभिनंद्य पारिक्षितोपाख्यानं वक्तुमाह अहमिति अर्यमणः हे सूर्याः नयोभर्तयः अत्र यावानात्मावगमः मम ज्ञानं तावत् आचक्षे प्रवक्ष्यामि तथा हि यथा पक्षिणो नभः आत्मासमं स्वसामर्थ्यानुरूपमेव उत्पतंति न कृत्स्नं तथा विपश्चितो पि विष्णोर्गतिं लीलां समं स्वमत्यनुरूपमेव

अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः
 २१ यत्रानुरक्ताः सहसैव धीराः व्यपोह्य देहादिषु संगमूढं व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वध
र्मः २२ अहं हि पृष्टोर्यमणो भवद्भिः आचक्ष आत्मावगमोत्र यावान् नभः पतंत्यात्मसमं पतत्रिणस्तथा समं
विष्णुगतिं विपश्चितः २३ एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं
२४ जलाशयमचक्षाणः प्रविवेश तमाश्रमं ददर्श मुनिमासीनं शांतं मीलितलोचनं २५ प्रतिरुद्धेंद्रि
यप्राणमनोबुद्धिमुपारतं स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं २६ ॥ ॥

वदंतीत्यर्थः २३ २४ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तस्मिन्मुनिं शमीकं २५ प्रतिरुद्धाः प्रत्याहृताः इंद्रियादयो ये
न अत एव उपरतं स्थानत्रयात् जाग्रदादिलक्षणात् परं तुरीयं पदं प्राप्तं अत एव ब्रह्मभूतत्वाद् अविक्रियं २६ २६ ॥

73

श्रीभगवत्तव्याख्यानेलब्धप्रसंगांमहत्तामादरपात्रमात्मानंश्लाघ्यंतेद्वाभ्यां अहोइत्याश्चर्येहेशौनकहर्षेवयमिति बहुवचनंश्लाघायांप्र
तिलोमजात्अपिअद्यजन्मभृतः सफलजन्मानः आसमजाताः वृद्धानामनुवृत्त्याआदरेणज्ञानवृद्धःशुकः तस्यसेवयेतिवा य
तोदुःकुलत्वंतन्निमित्तंआधिंमनःपीडांमहत्तमानांअभिधानयोगः लौकिकोपिसंभाषणसंबंधः विधुनोतिअपनयति १८
कुतःपुनः किंपुनर्वक्तव्यंतस्यअनंतस्यनामग्रहणतः पुंसांमहत्तमानामभिधानयोगोदौष्कुल्यंविधुनोतीति यद्वा नामग्रहणतः

सूतउवाच॥ अहोवयंजन्मभृतोद्यहास्मवृद्धानुवृत्त्यापिविलोमजाताः दौष्कुल्यमाधिंविधुनोतिशीघ्रंमहत्त
मानामभिधानयोगः १८ कुतःपुनर्गृणतोनामतस्यमहत्तमैकांतपरायणस्य योनंतशक्तिर्भगवाननंतोमहद्गु मह
णत्वाद्यमनंतमाहुः १९ एतावतालंननुसूचितेनगुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतोविभूति
यस्यांघ्रिरेणुंजुषतेनभीप्सोः २०

ग्र कुतःपुनर्दौष्कुल्यमिति यद्वा गृणतःपुंसस्तन्नाम दौष्कुल्यंविधुनोति किंवक्तव्यमितिकैमुत्यमेवाह अनंताःशक्तयोय
स्यसतोप्यनंत किंच महत्सुगुणायस्यसमहद्गुणस्तस्यभावस्तस्मात्तंगुणतोप्यनंतमाहुः १९ एतत्प्रपंचयंस्त्रिभिः एताव
तेति तस्यपदसाम्यंअनतिशायनंचगुणैस्तत्साम्यंतदाधिक्यंचानस्यना स्तीति अस्यार्थस्यसूचनेनएतावतासूचितेनअलं
पर्याप्तंकस्तद्विस्तरतोवक्तुंशक्नोतीतिदेवाह इतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वाविभूतिःश्रीअनभीप्सोरपियस्यांघ्रिरेणुंसेवतइति २०

श्री

भा०प्र० इतिवयस्यानुक्त्वाबालोनाम्नाशृंगीयस्यैकौशकीनदीतस्याः अपःसंस्पृश्यवाग्वज्रंशापं ३६ इतिएवंसर्पनिक्षेपेणधर्म्म
७४ तिदंक्ष्यतिभक्षयिष्यतिमार्गंतंरक्षमौक्तिकिष्यतिस्मेतियावत्पूर्वेणकुलस्यांगारतुल्यंमेमयानोदितोनितिद्रुह्यामार्थे ३७ गलेसर्पकले
वरंयस्येतिबहुकलेसमासःमुक्तकंठःउच्चैरित्यर्थः ३८ तंसर्पंविसृज्यकेनापकारःकृतः ४० अनभिनंदन्वाक्यंअहो

इत्युक्त्वारोषताम्राक्षोवयस्यान्ऋषिबालकान् कौशिक्याप उपस्पृश्यवाग्वज्रंविससर्ज्जह ३६ इतिलंघि
तमर्यादंतक्षकःसप्तमेहनि दंक्ष्यतिस्मकुलांगारंचोदितोमेततद्रुहं ३७ ततोभ्येत्याश्रमंबालोगलेसर्पक
लेवरं पितरंवीक्ष्यदुःखार्त्तोमुक्तकंठोरुरोदह ३८ सवाआंगिरसोब्रह्मन्श्रुत्वासुतविलापनं उन्मील्यश
नकैर्नेत्रेदृष्ट्वाचांसेमृतोरगं ३९ विसृज्यपुत्रंपप्रच्छवत्सकस्माद्धिरोदिषि केनवातेपकृतमित्युक्तःस
न्यवेदयत् ४० निशम्यशप्तमतदर्हंनरेन्द्रंसब्राह्मणोनात्मजमभ्यनंदत् अहोबताहोमहदद्यतेकृतं अल्पी
यसिद्रोहउरुर्दमोधृतः ४१ नवैनृभिर्नरदेवंपराख्यंसंमातुमर्हस्यविपक्वबुद्धे यत्तेजसादुर्विषहेणगुप्ताविं
दंतिभद्राण्यकुतोभयाःप्रजाः ४२ अलक्ष्यमाणेनरदेवनाम्निरथांगपाणावयमंगलोकः तदाहिचौरप्रचु
रोविनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ४३

इत्यादिवत्तत्कष्टं तेत्वयामहत्पापंकृतं द्रोहेअल्पेअपराधेदमोदंडः राम
४१ परोविष्णुरित्याख्याख्यातिर्यस्यतंनरदेवंनृभिः समातुंसमंद्रष्टुं ४२ अलक्ष्यमाणेअदृश्यमानेत्राविवरूथवत्मेषसं ७४
घवत् ४३

विप्रकीर्णाभिर्जटाभिराछन्नं रुरुर्मृगविशेषः तस्य चर्मणाच्छन्नं विशेषेण शुष्यत्तालुर्यस्य स तथाभूतं मुनिं न लब्धं तृणं तृणाधानं भूमिरुपवेशस्थानं च येन सः न संप्राप्तार्घः सूनृतं प्रियवचनं च येन सः २८ मत्सरः तदुत्कर्षासहनं २९ गतासुं मृतं धनुः कोट्याः चापाग्रेण ३० सर्पनिधानेन राज्ञोऽभिप्रायमाह एषः किं प्रत्याहृतसर्वेन्द्रियः सन् मीलिते क्षणे स्थितः पश्चात्तत्र वेदकाभिरागे नेर्वा किं नु स्यादित्येवं तयाम्रषा समाधिः सन्निति जिज्ञासयेत्यर्थः ३१ तस्य पुत्र शृंगाला

विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च विशुष्यत्तालुरुदकं तथाभूतमयाचत २७ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह २८ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च २९ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा विनिर्गच्छन्धनुःकोट्या निधाय पुरमागमत् ३० एष किं निभृताशेषकरणो मीलितेक्षणः मृषासमाधिराहोस्वित्किं नु स्यात्क्षत्रबन्धुभिः ३१ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः राज्ञाघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ३२ अहो अधर्मः पालानां पीव्नां बलिभुजामिव स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ३३ ब्राह्मणैः क्षत्रबन्धुर्हि गृहपालो निरूपितः स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ३४ कृष्णे गते भगवति शास्तर्युत्पथगामिनां तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ३५

ना:

मतेजस्वी तपोबलसंपन्नः अघं दुःखं तदपराधकृत्यमध्ये ३२ पालानां राज्ञां पीव्नां पुष्टानां अधर्ममेव निर्दिशति स्वामिनि दासानां यदघं पापाचरणं बलिभुजां काकानां इव शुनामिवेति ३३ दासत्वं दर्शयति ब्राह्मणैरिति सभाण्डं भाण्डैः सह स्थितं ३४ तत्तदनन्तरमहं

[illegible]

युक्तं चैतदित्याह प्रायश इति द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः सुखदुःखाद्याश्रयो न भवति ५० इति प्रथमे ऽष्टादशः ॥१८॥
प्रायोपविष्टं गंगायां राज्ञि योगिजनावृते शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके १ स्वकृतं तत्कर्म मुनिस्कंधे सर्पनिक्षे
पणं गर्ह्यं निंद्यं चिंतयन् सुदुर्मना जातः चिंतामेवाह सार्द्धाभ्यां अहो इति नीचं पापं अनीचमिति पाठे स एवार्थः ब्रह्मणि
ब्राह्मणे गूढं द्युन्नं तेजो यस्य तस्मिन् १ कृतं यद्देवहेलनं ईश्वरावज्ञापापमित्यर्थः तस्मान्मे व्यसनं भविष्यति तत्तु ना

75

प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः न व्यथंति न हृष्यंति यत आत्मागुणाश्रयः ५० इति श्रीभागवते म
हापुराणे प्रथमस्कंधे ऽष्टादशो ऽध्यायः ॥१८॥ सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सु
दुर्मनाः अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि १ ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्य
सनं नातिदीर्घात् तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा २ अद्यैव राज्यं बलमृद्धको
शं प्रकोपितब्रह्मकुलानलो मे दहत्वभद्रस्य पुनर्न मे भूत्पापीयसी धीर्द्विजदेवगोभ्यः ३ ३ ३

तिदीर्घात् कालात् अचिरादेवास्त्वत्रापि अप्रसादात् न पुनरादिवारेणेति प्रार्थना कामं अत्संकोचतः एवं प्रार्थनायाः
प्रयोजनं अघस्य निःकृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति च २ एवं साक्षात्स्वस्यैव व्यसनं प्रार्थ्य ततः प्रा
गेव किंचित्प्रार्थयते अद्यैवमे सराज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः पुनर्द्विजादीन् पीडयितुं अधर्मे धीर्मा भूदित्यभ
वेदित्यर्थः ३

नष्टोनाथोयस्यलोकस्यतस्यवसोवसुनोधनस्यविलुंपकादयदस्युभ्रोयादृहेतोर्यत्पापंभविष्यति तदस्मान्निमित्तत्वात् अस्मा
नुपैष्यति अनन्वयंसंबंधशून्यमेव तदेवपापंदर्शयति परस्परमिति शपंति परुषंवदंत्यबांधवम् वृजंतेअपहरंति पु
रुदस्यवश्चोरनहंताः ४४ अयंधर्मः सदाचारः शुनांकपीनामिवचार्थकामपरैरभिनिवेशितचित्तानां ४५ एवंराजमात्रस्यशापा
न्नहत्वमुक्तंप्रस्तुतेविशेषमाह धर्मपालइतिसार्द्धेनहयमेधराट्अश्वमेधयाजी ४६ ४७ अस्यमहापापस्यान्यस्यापि नमहद्दुष्टोपाप

तदघनःपापमुपैत्यनन्वयंयन्नष्टनाथस्यवसोर्वि लुंपकात् परस्परंघ्नंतिशपंतिवृंजतेपशून्स्त्रियोर्थान्पुरुद
स्यवोजनाः ४४ तदायंधर्मःविलीयतेनृणांवर्णाश्रमाचारयुतस्त्रयीमयः ततोर्थकामाभिनिवेशितात्मनां
शुनांकपीनामिववर्णसंकरः ४५ धर्मपालोनरपतिःसतुसम्राट्बृहच्छ्रवाः साक्षान्महाभागवतोराजर्षिर्हयमे
धराट् ४६ क्षुत्तृट्श्रमयुतोदीनोनैवास्मच्छापमर्हति ४७ अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना पापंकृ
तंतद्भगवान्सर्वात्माक्षंतुमर्हति ४८ तिरस्कृताविप्रलब्धाःशप्ताःक्षिप्ताहतास्तथापि नास्यतत्प्रतिकुर्वंतित
द्भक्ताःप्रभवोपिहि ४९ इतिपुत्रकृताघेनसोनुतप्तोमहामुनिः स्वयंविप्रकृतोराज्ञानैवाघंतदचिंतयत् ५०

मावेदयन्भगवंतंप्रार्थयते अपापेष्विति ४८ राजाचेत्प्रतिशापंदद्यात् तर्हिनिःक्षतिर्भवेत् अपितुनसंभवतितस्यमहाभाग
वतत्वादित्याह तिरस्कृतानिंदिताः विप्रलब्धावंचिताः क्षिप्ताअवज्ञाताः हतास्ताडिताः अस्यतिरस्कारादिकर्तुर्नत
त्प्रतीकारंकुर्वंतितद्भक्ताः विष्णुभक्ताः प्रभवःसमर्थाअपि ४९ विप्रकृतःअपकृतः अघंअपराधं ५१ ॥ ५२

भा॰प्र॰ तत्रतदातद्दर्शनार्थंमुनयः उपागताः नतुतीर्थस्नानार्थंकृतार्थत्वात् ॥ ननुतादृशानामपितीर्थयात्रादृश्यतेतत्राह ॥ प्रा
१९ येणेतितीर्थयात्राव्याजे ॥ ९ ॥ १० ॥ अरुणादयः कांडर्षित्वविशेषेणापृथङ्निर्दिष्टाः ॥ ननायान्यार्षेयाणिऋषीणांगोत्राणि

76

तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयःसशिष्याः ॥ प्रायेणतीर्थाभिगमापदेशैःस्वयंहितीर्था
निपुनंतिसंतः ॥ ८ ॥ अत्रिर्वशिष्टश्च्यवनःशरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरोगाधिसुतोथराम
उतथ्यइंद्रप्रमेदध्मवाहो ॥ ९ ॥ मेधातिथिर्देवलआर्ष्टिषेणोभरद्वाजोगौतमःपिप्पलादः ॥ मैत्रेयऔ
र्वःकवषःकुंभयोनिर्द्वैपायनोभगवान्नारदश्च ॥ १० ॥ अन्येचदेवर्षिब्रह्मर्षिवर्याराजर्षिवर्याअरु
णादयश्च ॥ नानार्षेयप्रवरान्समेतानभ्यर्च्यराजाशिरसाववंदे ॥ ११ ॥ सुखोपविष्टेष्वथतेषुभूयःकृत
प्रणामःस्वचिकीर्षितंयत् ॥ विज्ञापयामासविविक्तचेताउपस्थितोग्रेभिगृहीतपाणिः ॥ १२ ॥ १२

तेषुप्रवरान्श्रेष्ठान्शिरसाभुवंस्पृष्ट्वाववंदे ॥ ११ ॥ विज्ञापनार्थंपुनःकृतप्र णामः विविक्तंशुद्धंचेतोयस्य अभि राम
गृहीतौसंयोजितौपाणीयेनसः ॥ स्वचिकीर्षितंप्रायोपवेशनादियुक्तमयुक्तंचेतिविज्ञापयामास ॥ १२ ॥ १२ १९

इत्थं चिंतयन् स राजा मुनेः सुतेनोक्तः सप्तमेऽहनि निर्ऋतिर्मृत्युर्यथा भविष्यति तथाशृणोत् शमीकप्रेषितात्तच्छिष्यात् श्रुतवान् सः
तक्षकस्य विषाग्निं साधु मेने यतो विजयस्य प्रसक्तस्य विरक्तिकारणं ४ अथानंतरं उभौ लोकौ पुरस्तात् राज्यमध्य एव हेय
तया विचारितौ तौ विहाय श्रीकृष्णांघ्रिसेवामेव अधिमन्यमानः सर्वपुरुषार्थाधिकं जानन् प्रायमनशनं तस्मिन्नित्यर्थः तत्र
कृत्येनोपाविशत् यावत् यथा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ५ अमर्त्यनद्यामिति विशेषणस्य फलमाह या गंगा

स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः स साधु मेने न चिरेण तक्षकानलं प्रसक्त
स्य विरक्तिकारणं ४ अथो विहायेमममुं च लोकं विमर्शितौ हेयतया पुरस्तात् कृष्णांघ्रिसेवामधिमन्यमान
उपाविशत्प्रायममर्त्यनद्यां ५ या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री पुनाति लोकानु
भयत्र सेशान् कस्तां न सेवेत मरिष्यमाणः ६ इति व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां दध्यौ
मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ७

लसंती श्रीर्यस्याः तु[...]लस्याः तया विमिश्रिताः ये कृष्णांघ्रिरेणवः
तैरभ्यधिकं सर्वोत्कृष्टं यदंबु तस्य नेत्री तद्वाहिनी उभयत्र अंतर्बहिश्च सेशान् लोकपालैः सहितान् लोकान् पुनाति मरिष्य ला
माणः आसन्नमरणः मरणस्यानियतकालत्वात् सर्वोपि तथा अतस्तां को न सेवेत ६ इति एवं विष्णुपद्यां गंगायां प्रायो
पवेशं प्रति व्यवच्छिद्य निश्चित्य पांडवेय इति तत्कुलोचितत्वं दर्शयति न अन्यस्मिन् भावो यस्य सः उक्तः मुनिव्रतः उपशांतः
तत्कृतः मुक्तः समस्तसंगो येन सः ७

भा०प्र० प्रशस्यसाधु साध्विति उक्त्वामुदाव्यकिरन् देवसंघैर्वादितानेदुः १८ प्रजानुग्रहेशीलैर्मानवैरवलंच येयोत्तमश्लोकगुणैरभिन्नं यंसुदर्शि
७७ व १९ भवत्सु पांडोर्विशेषु पंजहुः इतियुधिष्ठिराद्यभिप्रायेण २० परस्परंमंत्रयंतेसर्वेइति परंश्रेष्ठत्वमेकं तत्रहेतुः विरजस्कंनिर्मायं
विशोकंयास्यतीति कुतस्तत्राह अयमिति २१ आश्रुत्यश्राकर्ण्यसंभ्रमपदयातसूत्रं भक्तच्युत् अमतत्वाविगुरुर्भीरार्य अव्यली गं

एवंचतस्मिन्नरदेवदेवेप्रायोपविष्टेदिविदेवसंघाः प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुदामुहुर्दुंदुभयश्चनेदुः १८ महर्षयोवै
समुपागतायप्रशस्यसाध्वित्यनुमोदमानाः ऊचुःप्रजानुग्रहशीलसारायदुत्तमश्लोकगुणाभिरूपं १९ नवाइदंराजर्षिवर्य
चित्रंभवत्सुकृष्णंसमनुव्रतेषु येध्यासनंराजकिरीटजुष्टंसद्योजहुर्भगवत्पार्श्वकामाः २० सर्वेवयंतावदिहास्महेथक
कं लेवरंयावदसौविहाय लोकंपरंविरजस्कंविशोकंयास्यत्ययंभागवतप्रधानः २१ आश्रुत्यतदृषिगणवचःपरीक्षितसमंमधु
च्युद्गुरुचाव्यलीकं आभाषतैनानभिनंद्ययुक्तान्शुश्रूषमाणश्चरितानिविष्णोः २२ राजोवाच ॥ समागताःसर्वतएवसर्वेवे
दायथामूर्तिधरास्त्रिपृष्ठे नेहाथवामुत्रचकश्चनार्थस्तेतेपरानुग्रहमात्मशीलं २३ ततश्चवःपृच्छ्यमिमंविपृच्छेविश्रभ्यवि प्र
प्राःइतिकृत्यतायां सर्वात्मनाम्रियमाणैश्चकृत्यंशुद्धंचतत्रामृशताभियुक्ताः २४

कंसत्यं २२ त्रयाणांलोकानांपृष्ठेउपरिसत्य
लोकेवेदायथामूर्तिधराभवंति तत्तुल्याःज्ञानातिशययुक्ताकृपालुतामहे नेहेतिभवतांप्रयोजनंपरानुग्रहंविनानास्तितर्हि
सएवार्थःस्यात्नश्चात्मशीलंस्वस्वभावं २३ पृच्छ्यंपृष्टव्यंविश्रभ्यविश्वासंकृत्वाएवंकर्त्तव्यमित्यस्याभावइतिकृत्यतातस्मिन्विष
येसर्वात्मनासर्वावस्थासुपरंकृत्यंविशेषतश्चम्रियमाणैः तच्चशुद्धंपापसंपर्करहितंआमृशतविचारयत २४ ॥ ॥ राम
७७

अनुमोदनेनानुग्रहमालक्ष्य आत्मानं श्लाघते अहो इति नृपाणां मध्ये महत्तमैरनुग्रहणीयं शीलं वृत्तं येषां ते एतच्च राज्ञाम
तिदुर्लभमित्याह ब्राह्मणानां पादशौचात् पादप्रक्षालनोदकात् दूरादुच्छिष्टविन्मूत्रपात्रं भांसि समुत्सृजेतिस्मृतेः दूरे हितैः ताद
दृश्यते तत्तादृग्राद्यैर्विसृष्टं हि तत्रापि स्यात् तेन योग्यमतमर्थः गर्ह्यं कर्म यस्य तेन तया त्वमनुद्धरेयकं १३ आस्तां तावदनु
ग्रहः ब्रह्मशापोपि भगवत्प्रसादादेव जात इत्याह तस्य गर्ह्यकर्मणा एवं अघस्य पापात्मनः गृहेष्वासक्तचित्तस्य मे स्वप्राप्तये परावर
णामीशः एव द्विजशापतया बभूव यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं यथा तेन निर्विण्णो भवति स्वयं यतो निर्वेदमूलः निर्वेदो वैराग्यं

॥ राजोवाच ॥ अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यक
र्म १३ तस्यैव मेघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते १४
तं मोपयातं प्रतियंतु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः १५
पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः १६ इति स्म रा
जाध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः १७ ॥ ७

मूले प्राप्तिकारणं यस्मिन् तस्यैव वैराग्यप्राप्यत्वात् तस्य च भयमूलत्वात् तदर्थं द्विजशापं कारितवानित्यर्थः १४ तान्प्रार्थयते त्वाम्मां
तं मायां उपयातं शरणागतं प्रतियंतु जानंतु देवी देवतारूपा गंगा च धृतं चित्तं येन कुहकः कपटी गाथा कथा १५ सत्संगं कथयेयं यां
तेषु प्रकृष्टः संगो भूयात् तस्यां तस्यां सृष्टौ जन्मनि जन्मनि १६ अध्यवसायो निश्चयः प्राचीनमूलेषु प्रागग्रेषु कुशेषु आस्ते स्म स्वसु
ते जनमेजयपितरि न्यस्तो भारो राज्यं येन १७ ॥ ॥ ७ ॥

भा० प्र० शिरसैवसपर्यामाजहारआत्मनिवेदनंकृतवान्तेनसहागतास्त्र्यपत्यादयस्ततोनिवृत्ताः सउपविवेशसंधिरा
७८ र्षैः २९ सभगवान्ब्रह्मर्षिसंघादिभिःसंवृतःसन् अलंव्यरोचतग्रहाःशुक्रादयःऋक्षाण्यश्विन्यादीनिअन्यास्ता

सविष्णुरातोतिथयआगतायतस्मैसपर्यांशिरसाजहार ततोनिवृत्ताह्यबुधाःस्त्रियोर्भकामहा
78 सनेसोपविवेशपूजितः २९ ससंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः व्यरोचतालं
भगवान्यथेंदुर्ग्रहर्क्ष तारानिकरैःपरीतः ३० प्रशांतमासीनमकुंठमेधसंमुनिंनृपोभागवतोभ्यु
पेत्य प्रणम्यमूर्ध्नावहितःकृतांजलिःनत्वागिरासूनृतयान्वपृच्छत् ३१ अहोअद्यवयंब्रह्मन्सत्सेव्या
ःक्षत्रबंधवः कृपयातिथिरूपेणभवद्भिस्तीर्थकाःकृताः ३२ येषांसंस्मरणात्पुंसांसद्यःशुध्यंतिवैगृ
हाः किंपुनर्दर्शनस्पर्शपादशौचासनादिभिः ३३ सांनिध्यात्तेमहायोगिन्पातकानिमहांत्यपि स
द्योनश्यंतिवैपुंसांविष्णोरिवसुरेतराः ३४

राः ३० नकुंठासर्वार्थेषुमेधायस्यप्रणम्यार्थंप्रमन्नत्वा ३१ सूनृतांगिरमाह अहोइतिपंचभिः सतांसेव्याजाताय राम
तः अतिथिरूपेणहेतुनातीर्थकायोग्याःकृताः ३२ ३३ विष्णोःसांनिध्यादसुराइव ३४ रामरामरामराम। ७८

तत्रतेषुयागयोगतत्परेषुदानादिभिर्विवदमानेषुसत्सुयदृच्छयागांपर्यटन्व्यासपुत्रः तत्रअभवत्प्राप्तः नलक्ष्यंआश्रमादिलिंगंयस्यं
अवधूतः अवज्ञायअन्यैस्त्यक्तोयः तस्यैववेषोयस्य २५ तमित्यादीनांप्रत्युत्थिताइतितृतीयश्लोकेनान्वयः द्विगुणान्यष्टौ
वर्षाणियस्यसुकुमाराःपादाःकरौ ऊरूबाहूअंसौकपोलौगात्रंचयस्यचारुणीआयतेअक्षिणीयस्मिनुन्नतानासायस्मि
वे न् तुल्येकर्णौचादैवभ्रुवौविनातुल्याकर्णौयस्मिन् शोभनेभ्रुवौयस्मिन्एवंभूतमाननंयस्य कंबुवद्रेखात्रयांकितःसुष्ठुजातःकं

तत्राभवद्भगवान्व्यासपुत्रोयदृच्छयागामटमानोनपेक्षः अलक्ष्यलिंगोनिजलाभतुष्टोवृतश्च
बालैरवधूतवेषः २५ तंद्व्यष्टवर्षंसुकुमारपादकरोरुबाह्वंसकपोलगात्रंचर्वायताक्षोन्नसतुल्यकर्णसुभ्र्वा
ननंकंबुसुजातकंठं २६ निगूढजत्रुंपृथुतुंगवक्षसंआवर्त्तनाभिंवलिवल्गूदरंच दिगंबरंवक्त्रविकीर्णकेशं
प्रलंबबाहुंस्वमरोत्तमाभं २७ श्यामंसदापीव्यवयोंगलक्ष्म्यास्त्रीणांमनोज्ञंरुचिरस्मितेनप्रत्युत्थितामुनयः ते
स्वासनेभ्यस्तल्लक्षणज्ञाअपिगूढवर्चसं २८

79 ग्रीवायस्य २६ कंठसंधौभागयोःस्थितेअस्थिनीजत्रुणी मांसेननिगूढे
जत्रुणीयस्यपृथुविस्तीर्णंतुंगमुन्नतंवक्षोयस्य आवर्त्तनाभिर्यस्य वलिभिस्त्रिस्त्रिभिर्निम्नरेखाभिर्वल्गुरम्यमुदरंयस्य
दिशएवअंबरंयस्यवक्त्रेविकीर्णाकेशायस्यप्रलंबौबाहूयस्य स्वमरेषुश्रेष्ठेषुदेवेषुउत्तमोहरिस्तद्वत्आभायस्य २७ स
दाअपीव्यंअत्यंतोत्तमंयद्वयोयौवनंतेनयाअंगलक्ष्मीर्देहकांतिः तयारुचिरस्मयेनचगूढवर्चसमपिप्रत्युत्थिताः तं
दृष्ट्वाप्रत्युज्जगमुःकृतवंतइत्यर्थः २८